ISSN No.:2278-0815

# भास्करोदयः

संदर्भित ज्योतिष – शोधपत्रिका
Referred Research Journal of Jyotish

त्रयोविंशोऽङ्कः
सत्रम् 2025–26

सम्पादकः
**प्रो.मदनमोहनपाठकः**
फलित-सिद्धान्तज्यौतिषाचार्यः, प्राप्तस्वर्णपदकः
विद्यावारिधिः (पी-एच. डी), शिक्षाशास्त्री (बी.एड.)
केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरः, विशालखण्डः-४,
गोमतीनगरम्, लखनऊ-२२६०१० (उ. प्र.)

सहसम्पादकौ
श्रीवेदप्रकाशपाठकः (फलित-सिद्धान्तज्योतिषाचार्यः, Research Scholar)
डॉ. आनन्दप्रकाशपाठकः सहायकाचार्यः (अ.) सिद्धान्तज्योतिषाचार्यः, (प्राप्तस्वर्णपदकः) विद्यावारिधिः

## भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

---

## भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याःरामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

भास्करोदयः ISSN - 2278-0815

# भास्करोदयः

## Referred Research Journal of Jyotish

त्रयोविंशोऽङ्कः - सत्रम्- २०२५ - २६

संरक्षकः-

**प्रो. श्रीनिवासवरखेड़ी**

**कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

सम्पादकः

**प्रो.मदनमोहनपाठकः**

**वरिष्ठाचार्यः (Senior Professor) ज्योतिषविभागः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः, लखनऊ - २२६०१० (उ०प्र०)**

### परामर्शदात्री-समितिः

**प्रो. रामचन्द्रपाण्डेयः**( राष्ट्रपतिसम्मानितः ) भू.पू.सङ्कायप्रमुखः, बी.एच.यू.

**प्रो. अर्कनाथचौधरी,** पूर्वकुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात

**प्रो. रामचन्द्रझाः-** पूर्वकुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा

**प्रो. शिवाकान्तझाः,** पूर्वकुलपतिः, नालन्दामुक्तविश्वविद्यालयः पटना,

**प्रो. सर्वनारायणझाः,** निदेशकः,केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः,

**प्रो. सुरेन्द्रझाः,** पूर्वप्राचार्यः,राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,

**प्रो. राधाकान्तठाकुरः,** पूर्वकुलपतिः i/c, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

सहसम्पादकौ-

**श्रीवेदप्रकाशपाठकः, डॉ.आनन्दप्रकाशपाठकः**

**लेखपर्यवेक्षक-मण्डलम्**

| | | |
|---|---|---|
| **प्रो.सर्वनारायणझाः** | **प्रो. हंसधरझाः** | **श्रीतेजस्करपाण्डेयः** |
| **निदेशकः** | **अध्यक्षः ज्योतिषविद्याशाखा** | **ज्योतिषाचार्यः, PCS** |
| केन्द्रीयसंस्कृतविश्वविद्यालयः | केन्द्रीयसंस्कृतविश्वविद्यालयः | उत्तरप्रदेशशासनम् |
| लखनऊपरिसरः, लखनऊ-२२६०१० | भोपालपरिसरः | लखनऊ-२२६०१० |


**प्रकाशक -**

**सम्पादकः, भास्करोदयः**

ज्योतिर्विज्ञान -अनुसन्धान-केन्द्रम्

वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स

गोमतीनगरम् (विस्तार), लखनऊ-२२६०१० (उ.प्र.)

**ISSN No:-2278-0815**

**संस्करणम् –**

प्रथमसंस्करणम् – २०००-०१ (संस्कृतवर्षे)

त्रयोविंशतिसंस्करणम् - २०२५-२६

**मुद्रकः**

गणपति प्रिन्टर

२९-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग

लखनऊ - २२६०१० (उत्तर प्रदेशः)

**(C) सम्पादकः**

**प्रो.मदनमोहनपाठकः**

मोबा. ७००७७९७८१३, ९४५५४३७०६६

e-mail:- pathak_guruji@rediffmail.com

website:- www.vedanandashram.in

# सम्पादकीयम्

महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य त्रयोविंशति (२३)तममङ्कं भवतां शास्त्रानुरागिणान्तत्रापि विशेषेण ज्योतिषशास्त्र-जिज्ञासूनां ज्योतिष-विभागीयानुसन्दधित्सूनाञ्च कर-कमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतिष-विभागीयच्छात्राणां लेखन-कलायाः विकासेन सह तेषु परम्परागतज्योतिषशास्त्रस्य प्रचारः प्रसारश्च वर्तते । अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतिषशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने ।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतर्विज्ञानस्य ज्योतिः-प्रसारिका च वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभिवर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेऽस्मिन् संस्मरणीयास्सन्ति येषां सर्वविधं सहयोगं सम्प्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्योतिष-जिज्ञासूनां सकलं मनोऽभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतयः शास्त्रमूर्त्तयः **प्रो.श्रीनिवासवरखेडीमहोदयाः** येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतामेति। अनन्तरं स्मर्यन्ते केन्द्रीय-संस्कृतविश्वविद्यालयस्य प्र.कुलसचिवाः प्रो. मुरलीकृष्णमहोदयाः, लखनऊपरिसरस्य निदेशकाः प्रो. सर्वनारायणझामहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायक-सम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मिणः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव अत्र वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति। अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादिति शम्।

विद्वच्चरणचञ्चरीको

मदन मोहन पाठकः

महाशिवरात्रिः
संवत् २०८२
दि. १५/२/२०२६

## भास्करोदयस्यानुक्रमणिका

त्रयोविंशोऽङ्कः- (सत्रम्-२०२५-२६)


| क्र.सं. विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| शुभसम्मतयः | | ०५ - ०८ |
| पर्यन्यविज्ञानम् | प्रो. मदनमोहनपाठकः | ९ - १४ |
| भारतीयज्ञानपरम्परायां शङ्कुविमर्शः | डॉ. आनन्दप्रकाशपाठकः | १५ - १९ |
| संहितोक्त-प्रासादलक्षणविमर्शः | डॉ. शैलेशकुमारतिवारी | २० - २५ |
| ग्रहगतेः सैद्धान्तिकसमीक्षणम् | श्रीकुन्दनकुमारझाः | २६ - ३२ |
| वेदाङ्गज्योतिषे नक्षत्रजातकसम्बन्धिविमर्शः | डॉ. उमेशकुमारपाण्डेयः | ३३ - ३५ |
| ज्योतिषशास्त्रे हृदयरोगविचारः | डॉ. श्रीमती विनीतामिश्रा | ३६ - ३९ |
| द्रव्यप्रयोग-ऋणग्रहणविचारविमर्शः | डॉ. रमानन्दभट्टः एन् | ४० - ४२ |
| वृद्धयवनजातकानुगुणं मृत्युविमर्शः | श्रीकृष्णमूर्तिः एन् | ४३ - ४८ |
| ज्योतिषशास्त्रे कूर्मचक्रविचारः | डॉ. भूपेन्द्रनारायणझाः | ४९ - ५८ |
| भास्कराचार्योक्तस्वयंवहयन्त्राणि | श्रीगिरिशभट्टःबि.,दिवाकरशर्मा | ५९ - ६६ |
| जीर्णोद्धारविधिः | डॉ. चित्तरञ्जननायकः | ६७ - ७५ |
| भारतीयज्ञानपरम्परायां मुहूर्त्तशास्त्रस्यावदानम् | श्रीअंकितकुमारमिश्रः | ७६ - ८६ |
| ज्योतिषशास्त्रे ऋतुविज्ञानम् | डॉ. चन्द्रश्रीपाण्डेयः | ८७ - ९१ |
| लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः | सम्पादकः | ९२ - ९६ |


**।। ॐ शम् ।।**

भास्करोदयः ISSN - 2278-0815

**प्रो. रामचन्द्रझाः**
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- ८४६००८
दूरभाषः- ०९४३००६३६४८
e-mail:-varunkjha@gmail.com




# शुभाशंसनम्

२०००-०१ तः प्रकाशमानां भास्करोदयनाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः । अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति।

ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्स्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु। भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविध-लौकिक-पारलौकिककार्य-सम्पादनाय मानवजीवनगत-शुभाशुभफल-ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते।

एवम्भूता ज्योतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम्।

- इत्याशास्ते
विदुषामनुचरो



स्थानम्- दरभङ्गा
दिनाङ्कः- ५/८/२०१३
विक्रमाब्दः२०७०
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः

**प्रो.विश्वमूर्त्तिशास्त्री**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Mob:-94191-38606
E-mail:- profvmshastri@gmail.com



# शुभाशंसनम्

**भास्करोदयः**

संस्कृतस्य प्रचाराय ज्योतिषस्य विशेषतः ।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः ।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः ।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः ।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया ।
सर्वदा देवभाषायां राजतां भास्करोदयः ।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले ।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः ।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः ।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः ।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः ।
असौ सर्वमनःपद्मं मोदयेद् भास्करोदयः ।।

- इत्याशास्ते
विदुषामनुचरो



श्रावणशुक्लपूर्णिमा,
संस्कृतदिवसः
विक्रमाब्दः२०६२
दि. 19/8/2005
शुक्रवासरः

**प्रो.अर्कनाथचौधरी**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
विशालखण्ड-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ.प्र.)
फोन (०५२२)२३०४०६३, २३९३७४८ (का.)
फोन (०५२२) २३०२९९३ (फैक्स)
e-mail- rskslucknow@yahoo.com



# शुभाशंसनम्

## भास्वानुदेष्यति

षट्त्सु वेदाङ्गेषु ज्योतिषं शास्त्रं परब्रह्मणो निच्छ्वसितस्य वेदशरीरस्य चक्षुरिति पाणिनिः स्वशिक्षाग्रन्थे उल्लिलेख । तदेव वयमपि मन्यामहे । नेत्रं विना अन्धो भवति जनः । लोकयात्रारूपे विषमे मार्गे धावन् कश्चिदपि अन्धः पतत्यवश्यम् । किन्तु नेत्राङ्गरूपिज्योतिषशास्त्रज्ञो विषमेऽपि लोकयात्रामार्गे न पतति । यतोहि-

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ "इत्यस्माकमृषीणामुद्घोषः"। प्रकाशपुञ्जयोः साक्षिभूतयोः समवस्थाने क्वान्धता? कस्यान्धता? न कस्यापि। पुनश्च इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति ज्ञानसिद्धान्तानुसारेणापि प्रकाशरूपेन्द्रियस्य अर्थस्य च सन्निकर्षेण यल्लब्धं ज्ञानमनन्तं प्रामाणिकं तदेव ज्योतिषं प्रकटयतीति महत्त्वातिशयमस्त्येव लोकजीवनेऽस्य शास्त्रस्य।

एतादृशस्य शास्त्रस्य विषये अनुदिनमनुसन्धानमाचरन्तो दृश्यन्ते विज्ञाः। राष्ट्रिय-संस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य (भारतशासन-मानव-संसाधन-विकास-मन्त्रालयाधीनस्य) लखनऊ-परिसरस्थः ज्योतिषशास्त्रमर्मज्ञो व्यवहारकुशलो ज्योतिषविभागाध्यक्षः प्रो.मदनमोहनपाठक "भास्करोदयः" इति नाम्ना ज्योतिषशोधपत्रिकां लोकाय समर्पयन् भृशमुपकारं जनयति पाठकानां सुधियां छात्राणाञ्चेति परिसरपक्षतोऽस्मत्पक्षतश्च साधुवादार्हः। मन्ये स्युरत्र बहवो लेखाः विदुषां शोधार्थिनाञ्च। एतैः लेखैः उदितो भास्वान् सर्वदैवोदितः स्थास्यतीति विश्वासः। तथापि लोकव्यवहारोपयोगिनो लेखाः अस्मिन्नङ्के भाविन्यङ्के चावश्यं योज्याः विदुषा सम्पादकेन प्रो.पाठकमहोदयेनेत्यनुरोधः। शतं जीव्यान्मदनमोहनपाठक इति मदीयं शुभाशंसनम्।

दिनाङ्कः- १५/१०/२०१३
संवत् २०७०पापाङ्कुशैकादशी
भौमवासरः

प्रो.अर्कनाथचौधरी

भास्करोदयः ISSN - 2278-0815

**प्रो.सर्वनारायणझाः**
**कुलपतिः**
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
मोबा. - ८४४७९७५२१३
email:- snjha62@gmail.com



।। ॐ नमश्चण्डिकायै ।।

## शुभाशंसनम्

दैवं फलति सर्वत्र न विद्या न च पौरुषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।

अथ च - प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि।।

किञ्च-
गुणोऽपि दोषतां याति वक्रीभूते विधातरि।
सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।

अपि च - भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन-मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊ-परिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहनपाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनाम्नीं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां तुष्यादिति मे शुभाशंसा ।

**प्रो.सर्वनारायणझाः**

संवत् २०७४ महाशिवरात्रिः
दिनाङ्कः- १४/०२/२०१८
बुधवासरः

भास्करोदयः ISSN - 2278-0815

# पर्यन्यविज्ञानम्

**प्रो. मदनमोहनपाठकः**
वरिष्ठाचार्यः ज्योतिषविभागे
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊपरिसरः उ.प्र.
profmmpathak@gmail.com

**अन्नाद्भवन्ति भूतानि पर्यन्यादन्नसम्भवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।**[1]

महाप्रभोः भगवतः श्रीकृष्णचन्द्रस्य मुखाम्बुजात् निर्गता इयं वाणी किमपि विशिष्टं विज्ञानं द्योतयति। अत्र अन्नादेव भूतानि जायन्ते। कलौ अन्नगताः प्राणाः इति स्कन्दपुराणेऽप्युक्तम्।[2] अन्नं वै प्राणाः[3] इति उपनिषदि। पर्यन्यं विना अन्नस्य परिकल्पना कर्तुं न शक्यते। पर्यन्यं नाम मेघः, वारिदः, जलदः, वृष्टिजलमित्यादयः। यथा अन्नस्य आधारः पर्यन्यः, तथैव पर्यन्यस्य आधारः यज्ञः। यज्ञादेव सुवृष्टयः भवन्ति। अद्यत्वे सुवृष्टिः स्वप्न इव अनुभूयते।

पर्यन्यविज्ञानविश्लेषणमिति विषयः यद्यपि महनीयः बहुविस्तृतश्च वर्तते। तथापि प्रकृतेऽस्मिन् शोधनिबन्धे पर्यन्यविज्ञानचिन्तनस्य मूलाधारे निम्नलिखिताः बिन्दवः विश्लेषिताः भविष्यन्ति। तद्यथा-

**१. पर्यन्यविज्ञाने आध्यात्मिकं चिन्तनम्-**
**२. पर्यन्यविज्ञाने भौगोलिकं चिन्तनम्-**
**३. पर्यन्यविज्ञाने पर्यावरणजन्यं चिन्तनम्-**
**४. पर्यन्यविज्ञाने ज्योतिषशास्त्रीयं चिन्तनम्**
**५. पर्यन्यविज्ञाने निमित्तजन्यं चिन्तनम्-**

## १. आध्यात्मिकं चिन्तनम्-

अखिलेऽपि विश्वे अस्माकं भारतदेशः देवभूमिरीति कथ्यते। इह भूमौ आगन्तुं देवाः अपि समुत्सुकाः भवन्ति। देवाः अपि अत्र जनिमतां जनानां प्रशंसां कुर्वन्ति। तद्यथा-

**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्।।**[4]

एवं भूते भारतदेशे अद्यत्वे सर्वाधिकी समस्या पर्यन्यसमस्या, पर्यावरणसमस्या च वर्तते। विंशतिशताब्द्याः षष्टितमे दशके, सप्ततितमे दशके, किमधिकम्? अशीतिदशकं यावत् वर्षाऋतौ शरदृतौ

1. श्रीमद्भगवद्गीता-३/१४
2. स्कन्दपुराणे अवन्तीखण्डे रेवाखण्डे श्रीसत्यनारायणव्रत माहात्म्ये
3. तैतरीयोपनिषदि
4. विष्णुपुराणम् -२/३/२४

च न्यूनातिन्यूनं मासत्रयपर्यन्तं सुवृष्टिः कदाचित् वृष्ट्याधिक्यमपि, क्वचित् कदाचिदेव वृष्ट्याभावः जायते स्म। न्यूनातिन्यूनं मासत्रयम् अथवा मासचतुष्टयं यावत् प्रचण्डः शीतस्तद्वदेव ग्रीष्मकाले प्रचण्डः उष्णं भवति स्म। सः कालः इदानीं कुत्र गतः? अस्याम् एकविंशतिशतब्द्यां तृतीये दशके एव भौतिक-विकास-यात्रायाम् अस्माभिः सर्वं नाशितम्। अस्माकं प्रकृतिः अस्मासु कुपिता। अत्र हेतुः विचार्यते चेत् यज्ञानामभाव एव प्रधानहेतुः। अत्र शास्त्रानुमोदितेषु पञ्चविधयज्ञेषु एकस्यापि प्रकारस्य यज्ञस्य कुत्रापि प्रचलनमायोजनं वा न दृश्यते। आदौ प्रसङ्गादत्र पञ्चविधयज्ञस्य प्रकारः उच्यते। तद्यथा-

**अध्यापनं ब्रह्मयज्ञं पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम्।।** [5]

अर्थात् पञ्चविधयज्ञेषु अध्यापनं ब्रह्मयज्ञं, तर्पणं पितृयज्ञं, होमः दैवयज्ञं, बलिः भूतयज्ञं, अतिथि-पूजनं नृयज्ञञ्चेति पञ्चविधयज्ञं मनुना प्रतिपादितम्। अनेन इदं सिद्ध्यति यत् विश्वस्य यस्मिन् भूभागे इदं पञ्चविधं यज्ञं भवति तत्रैव सुवृष्टेः सम्भावना कर्तुं शक्यते। ब्रह्मयज्ञमित्यनेन वेद-वेदाङ्गादि-शास्त्राणामध्ययनम् अध्यापनञ्च। ब्रह्मचर्याश्रमे ये ब्रह्मचारिणः ब्रह्मचारिण्यश्च भवन्ति तेषां वेद-वेदाङ्ग-उपनिषद्-दर्शन-पुराणादिशास्त्राणामध्ययनम् अध्यापनञ्च प्रथमं कर्तव्यम्। इदं **ब्रह्मयज्ञम्** इत्युच्यते। अत्रेदम् अवगन्तव्यं यत् पुरा ब्रह्मचर्याश्रमः स्वगृहात् बहिः कुत्रापि नैव अन्वेषणीयं भवति स्म। प्राक्काले जनाः आश्रमव्यवस्थायाम् एव तिष्ठन्ति स्म। पूर्वं प्रतिगृहे एव ब्रह्मचर्याश्रमस्य व्यवस्था आसीत्, विवाहात् पूर्वं सर्वे बालकाः बालिकाश्च स्वगृहे उषित्वा ब्रह्मचर्याश्रमस्य नियमान् पालयन्तः वेद-वेदाङ्ग-उपनिषद्-दर्शन-पुराणादिशास्त्राणामध्ययनं कुर्वन्ति स्म। परिवारस्य विज्ञाः कुत्रचित् अध्यापनं कारयन्ति स्म। अनेन विधिना प्रतिगृहं ब्रह्मयज्ञं प्रचलति स्म। एवमेव ब्रह्ममुहूर्ते सन्ध्यां विधाय पितृणां प्रीत्यर्थं तर्पणं भवति स्म। अनेन सन्तुष्टाः पितरः सुखं शान्तिं समृद्धिञ्च प्रयच्छन्ति स्म।[6] तर्पणानन्तरं प्रतिदिनं देवानां प्रीत्यर्थं होमस्य व्यवस्था आसीत्। इत्थं तर्पनेन पितरस्तथा हवनकर्मणा देवाः प्रसन्नाः भवन्ति स्म। एवमेव मनुष्येतरानां प्राणिनां प्रीत्यर्थं गृहे निर्मितभोज्यपदार्थस्य कश्चित् भागः श्वान-काक-पिपीलिका-प्रभृतिजीवानां प्रीत्यर्थं दीयते स्म। अनेन विधिना भूतयज्ञस्तथा गृहे आगतानाम् अतिथिनां श्रद्धया सत्कारेण नृयज्ञस्य परिपालनं भवति स्म। उपर्युक्तानाम् एतेषां पञ्चयज्ञानाम् आयोजनं प्रतिगृहे प्रतिदिनं प्रचलति स्म। यस्मात्काराणात् श्रीमद्भगवद्गीतायाः **यज्ञाद्भवति पर्यन्यो** इति वचनानुसारम् आकाशे पर्यन्यस्य निर्माणं तथा तद्द्वारा सुकाले सुवृष्टिः भवति स्म। अनेन इदं सिद्धं भवति यद् अन्नं विना भूतानां जीवनम् असम्भवं तथा पर्यन्यं विना सम्यक् शस्योत्पत्तिः असम्भवा वर्तते। इत्थम् अद्यत्वेऽपि यदि नित्यं पञ्चविधयज्ञानामायोजनं भवति चेत् सम्यक् सुवृष्टिः भवितुमर्हति।

**२. भौगोलिकं चिन्तनम् (Geographical Factors)-**

पर्यन्ये भूगोलस्यापि प्रभावः पतति। प्रवर्षणे न केवलं हेतुः ग्रहयोगः न च वारिदः(Cloud)।

5. मनुस्मृतिः-४/२१
6. श्रीजगन्नाथपञ्चाङ्गे तर्पणप्रकरणान्ते

प्रवर्षणे भौगोलिकीस्थितिः अपि महनीय-कारणभूता भवति। यतः ज्योतिषशास्त्रदृष्ट्या वृष्टिकारकग्रह-योगसत्त्वेऽपि राजस्थाने मरुभूमौ जलाभावस्तथा वृष्टिकारकग्रहयोगरहितेऽपि समुद्रतटवर्तिदेशेषु वृष्ट्या-धिक्यं दृश्यते। इत्थं पर्वततटवर्तिदेशेषु यत्र वृक्षानां बाहुल्यं भवति तत्रापि वृष्ट्याधिक्यं दृश्यते। एवमेव विशिष्य समुद्रकुलवर्तिस्थलेषु, महाराष्ट्रे मुम्बय्यां तथा कर्णाटकादि-राज्येष्वपि यथा शृङ्गगिरौ वृष्टिका-रकग्रहयोगाभावेऽपि अधिकाधिकं प्रवर्षणं दृश्यते। इत्थं इह पृथिव्यां यत्र कुत्रापि वृष्ट्याधिक्यम् अथवा वृष्टेः अल्पत्वं दृश्यते तत्र हेतुः भौगोलिकी स्थितिः अपि वर्तते। अतः सुवृष्टिः भवेदेतदर्थम् अत्यधिकं वृक्षाणां रोपणं कर्त्तव्यम्। अनेन सुकाले सम्यक् वृष्टेः सम्भावना वर्धते।

**३. पर्यावरणजन्यं चिन्तनम्-**

पर्यावरणशब्दः यौगिकशब्दः वर्तते। आङ्ग्लभाषायां Environment इति पदेन अस्य पर्या-वरणशब्दस्य अवबोधो भवति। परि एवं आवरणमित्यनेन पर्यावरणशब्दः निष्पन्नो भवति। परि अर्थात् चतुर्षु दिक्षुः, आवरणं नाम वेष्टनम्। पर्यावरणं प्रकृतेः अभिन्नं रूपमेव विद्यते। परि आ उपसर्गपूर्वकं वृञ् आवरणे धातोः करणे ल्युट् प्रत्ययेन आवरणशब्दः निष्पन्नो भवति। अर्थात् परि- परितः, आ-समन्तात् वृणोति- आच्छाद्य रक्षतीति पर्यावरणम्। यथोक्तम्-

**पृथिवीं परितो व्याप्य तामाच्छाद्य स्थितञ्च यत्।**
**जगदाधाररूपेण पर्यावरणमुच्यते।।**

अस्माकं जीवजगतः सर्वासु दिक्षुः विद्यमानाः वृक्ष-पर्वत-नदी-जल-पृथ्वी-वायु-अग्नि-सूर्यादयो घटकाश्च पर्यावरणस्य अङ्गभूताः भवन्ति। एतेषां समन्वयेन वर्षा सञ्जायते।

सूर्यस्य उष्णप्रभावात् समुद्राणां नदीनां जलं वाष्पं भूत्वा उपरि गच्छति। इयं प्रक्रिया वाष्पी-करण (Evaporation) प्रक्रिया उच्यते। अयं आकाशे गतः जलवाष्पः कालान्तरे शीतलं भूत्वा लघु-लघु-जलबिन्दवः वारिद(Cloud)रूपेण परिणतो भवति। इयं प्रक्रिया वैज्ञानिकानां मातानुसारं संघनन (Condensation) प्रक्रिया उच्यते। कालान्तरे एते जलविन्दवः परस्परं समवेताः भारयुक्ताः भवन्ति। ततो भारयुक्ताः घनीभूताः जलबिन्दवः पवन-वारिद-पर्वत-वृक्षादीनां परस्परं संघातेन गुरत्वाकर्षणसि-द्धान्तानुसारं वृष्टिं जनयन्ति। इदानीं कुत्रचित् वृष्टेः बहुलता, कुत्रचित् अल्पता, कुत्रचित् अल्पवृष्टिः, कुत्रचित् खण्डवृष्टिः, कुत्रचित् महाप्रलयङ्कारी वृष्टिः यद् दृश्यते, तत्र कारणभूता पर्यावरण-समस्या एव मुख्यतमा। अद्यत्वे पर्यावरणसमस्या विश्वस्य बहुव्यापकसर्वासु समस्यासु सर्वाधिका विस्तृता समस्या विद्यते। इयं पर्यावरणसमस्या अद्यत्वे वैज्ञानिकेषु सर्वाधिकचर्चायाः चिन्तनस्य च विषयः। पर्यावरणद्वारा अस्माकं तापमानं, पानीयं जलं, वायुः सर्वमप्येतत् संतुलितम् अथवा असन्तुलितं भवति। शहरीकरणं, औद्योगिकक्षेत्रस्य विस्तारः, पर्वतानाम् उत्खननं, वनानां कर्तनं, वाहनानां वृद्धिः, सर्वमप्येतत् पर्याव-रणस्य विध्वंसकाः सन्ति। पर्यावरणस्य असन्तुलनेनैव कुत्रचित् खण्डवृष्टिः, कुत्रचित् वृष्ट्याभावः, कुत्रचित् वृष्ट्याधिक्ये जलप्लवस्य विभीषिकाः संजायन्ते। अतः अस्माभिः पर्यावरणस्य सर्वतोभावेन परिरक्षणं विधेयं येन वृष्टिजन्या समस्या न भवेत्। वस्तुतः मानवाः यदा स्वार्थान्धाः सन्तः पर्यावरणे

अनुचितं हस्तक्षेपं कुर्वन्ति तदा वृष्टिजन्या समस्या यथा- अतिवृष्टिः, खण्डवृष्टिः, अनावृष्टि-प्रभृतयः अनेकाः समस्याः समुत्पन्नाः भवन्ति। परिणामतः वृष्टेः उपरि पर्यावरणस्य सर्वाधिकः प्रभावः पतति।

**४. वृष्टिविषयकं ज्योतिषशास्त्रीयं चिन्तनम्-**

संहिताग्रन्थेषु वृष्टिविषयको बहुविधाः विचाराः कृताः विद्यन्ते। वृष्टिवर्षणात् पूर्वं गर्भधारणम् भवति। तदनु संहितानिर्दिष्टे काले वृष्टिः सञ्जायते। तद्यथा-

**यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात्।**
**पञ्चनवते दिनशते तत्रैव प्रसवमायाति।।**[7]

अर्थात् यस्मिन् नक्षत्रे मेघस्य गर्भः दृष्टिगोचरो भवेत् सः गर्भः पञ्चनवते दिनशते अतिक्रान्ते सार्द्धैः षड्भिः मासैः गतैः तस्मिन्नेव नक्षत्रे चन्द्रयुक्तनक्षत्रवशात् प्रसवमायाति वृष्टिः भवतीत्यर्थः।
विषयेऽस्मिन् समाससंहितायामप्युक्तमस्ति। तद्यथा-

**पौषसितपक्षाद्यैः श्रावणशुक्लादयो विनिर्देश्याः।**
**सार्द्धैः षड्भिर्मासैर्गर्भविपाकः स नक्षत्रे।।**[8]

तत्रैव आकाशे गर्भलक्षणसम्भवलक्षणान्यपि कथितानि सन्ति। तद्यथा[9] -

**ह्लादिमृदुशिवशक्रदिग्भवो मारुततो वियद्विमलम्**
**स्निग्धसित बहुलपरिवेषपरिवृतौ हिममयूखार्कौ॥**
**पृथुबहुल स्निग्धधनं घनसूचीक्षुरकलोहिताभ्रयुतम् ।**
**काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम् ॥**
**सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यका शुभा सन्ध्या।**
**शशिशिवशक्राशास्थाः शान्तरवाः पक्षिमृगसङ्घाः॥**
**विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः ।**
**तरवश्च निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥**
**गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः।**
**स्वर्तुस्वभावजनितो गर्भविवृद्धयै तमभिधास्ये ॥**

अर्थात् मेघस्य गर्भधारणकाले यदि वायुः ह्लादकारकः, मृदुः, उत्तरदिशायाः वायुः, शिव(ईशान) दिशायाः वायुः, पूर्वदिशायाः वायुः असामान्यरूपेण प्रवहेत्, आकाशः निर्मलं, हिममयूखार्कौ स्निग्धौ सन्तौ परिवेषेण परिवृतौ भवेताञ्चेत् मेघस्य सम्यक् गर्भधारणं जातमिति ज्ञातव्यम्।

आकाशः स्निग्धबहुलमेघेन आवृत्तो भवेत् एवञ्च आकाशे मेघः घनसूची अर्थात् सूच्याकारः, क्षुरकाकारः, लोहित(रक्त)वर्णेन युक्तः, मेचकाभम् अर्थात् काकाण्ड इव नीलवर्णात्मकः, चन्द्रयुक्तनक्षत्रं निर्मलं भवेत् तदा मेघस्य सम्यक् गर्भधारणं जातमिति ज्ञातव्यम्।

7. बृहत्संहिता गर्भलक्षणाध्यायः श्लोक संख्या- ७, (२१/७)
8. बृहत्संहिता गर्भलक्षणाध्यायः श्लोक संख्या- ७, (२१/७) इत्यस्य भट्टोत्पलटीकायाम्
9. बृहत्संहिता गर्भलक्षणाध्यायः श्लोक संख्या- १४-१८ (२१/१४-१८)

पूर्वापरा संध्या इन्द्रधनुषा व्याप्ता, मधुरेण गर्जितेन मेघेन आकाशो व्याप्तो भवेत्, संध्यायाम् आकाशे प्रतिसूर्यः दृष्टिगोचरो भवेत्, पक्षिणां मृगाणाम् आरण्यपशूनाञ्च समूहाः शान्तरवाः स्युः, शशिशिवशक्राशास्थाः अर्थात् उत्तर-ईशान-पूर्व-दिशामधुरा मधुरस्वरयुक्ता भवेत्तदा मेघगर्भधारणस्य शुभलक्षणानि कथितानि सन्ति।

अपि च ग्रहाः विपुलाः प्रदक्षिणचराः, निरुत्पाताः स्युः, नर-चतुष्पदाः हृष्टाः स्युस्तदा मेघगर्भधारणं सम्यक् जातमिति वक्तुं शक्यते। एवमेव संहिताग्रन्थेषु मेघगर्भोपघातलक्षणानि कथितानि सन्ति। तद्यथा-[10]

**गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः।**
**क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः।।**
**रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः।**
**इत्युत्पातैरेतैस्त्रिविधैश्चान्यैर्हतो गर्भः ।।**

अर्थात् यदि मेघः उल्का-अशनी-पांशुपात-दिग्दाह-क्षितिकम्प-खपुर(गन्धर्वनगरं)तामस-कीलक- केतु-ग्रहयुद्ध-निर्घात-रुधिरादिवैकृत-परिघ-इन्द्रधनुषादीनां दर्शनेन मेघगर्भोपघाताः जायन्ते। इत्थं मेघगर्भोपघातप्रसङ्गे अन्यानि लक्षणानि अपि प्रतिपादितानि सन्ति। तद्यथा-

**स्वर्तुस्वभावजनितैः सामान्यैर्यैश्च लक्षणैर्वृद्धिः।**
**गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति॥**

अर्थात् स्वर्तुस्वभावानुसारं यदि आकाशे मेघगर्भधारणकाले लक्षणं यदि दृश्यते तदा मेघगर्भपुष्टि अवगन्तव्या। वैपरीत्ये गर्भस्रावत्वात् वर्षाकाले खण्डवृष्टिः वृष्ट्याभावो वा अवगन्तव्यः।
इत्थम् अन्यदपि गर्भपुष्टिलक्षणं प्राप्यते। तद्यथा-[11]

**पवनसलिलविद्युद्गर्जिताऽभ्रान्वितो यः**
**स भवति बहुतोयः पञ्चरूपाभ्युपेतः।**
**विसृजति यदि तोयं गर्भकालेऽतिभूरि**
**प्रसवसमयमित्वा शीकराम्भः करोति ॥**

अर्थात् मेघगर्भधारणकाले यः मेघगर्भः वायु-सलिल-विद्युद्-गर्जिताभ्रैः युक्तो भवेत् तदा सः गर्भः प्रवर्षणकालं संप्राप्य अर्थात् मेघगर्भधारणदिवसात् पञ्चनवते दिनशते अनन्तरं सस्योन्नतिकारकं प्रभूतं जलं प्रददाति।

मेघधारणकालस्य मतान्तराण्यपि प्राप्यन्ते। केचन मार्गशीर्षमासे, केचन पौषमासे, केचन ज्येष्ठमासे मेघस्य गर्भधारणं भवतीति संहिताकाराः वदन्ति। तद्यथा-

**ज्येष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।**

---

10. बृहत्संहिता गर्भलक्षणाध्यायः श्लोक संख्या- २५-२६ (२१/२५)
11. बृहत्संहिता गर्भलक्षणाध्यायः श्लोक संख्या- ३७ (२१/३७)

**मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च ॥**

अर्थात् ज्येष्ठशुक्लपक्षे अष्टम्याद्याश्चत्वारो ये दिवसाः सन्ति ते वायुधारणदिवसाः भवन्ति। एषु दिवसेषु सुखस्पर्शयुक्ताः पवनाः, मेघैः स्थगिताकाशयुक्ताः प्रशस्ताः भवन्ति।

**५. निमित्तजन्यं चिन्तनम्-**

अस्माकं भारतदेशः कृषिप्रधानदेशः विद्यते। अत्रत्याः कृषकाः अपि वृष्टिविज्ञानक्षेत्रे विपुल-ज्ञानसम्पन्नाः भवन्ति स्म। अद्यत्वेऽपि कृषकाः पर्यन्यविज्ञाननिपुणाः सन्ति। वृष्टिविज्ञानजन्यं निमित्तम् अद्यत्वेऽपि आधुनिकवैज्ञानिकानां कृते विशिष्टं कौतुहलम् उत्पादयन्ति। तद्यथा-

**विरसमुदकं गोनेत्राभं वियद्विमला दिशो**
**लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः।**
**पवनविगमः पोप्लूयन्ते झषाः स्थलगामिनो**
**रसनमसकृन्मण्डूकानां जलागमहेतवः ।।**[12]

अर्थात् पानीयं जलं स्वादुरहितं भवेत्, गोनेत्रसमम् आकाशं, विमला दिशः, लवणे आर्द्रता, काकाण्डसमं नभः, वायोः निरोधः, स्थलगमनशीलाः झषाः, मण्डूकानाम् असकृत् रसनम् अर्थात् शब्दः सद्यो वृष्टेः लक्षणानि सन्ति। अपि च-

**मार्जारा भृशमवनिं नखैर्लिखन्तो**
**लोहानां मलनिचयः सविस्त्रगन्धः।**
**रथ्यायां शिशुरचिताश्च सेतुबन्धाः**
**सम्प्राप्तं जलमचिरान्निवेदयन्ति ॥**[13]

अर्थात् मार्जाराः बिडालाः अनेकबारं स्वनखैः भूमिं लिखन्ति। लोहानां मलनिचयः (लोहकिट्टं) गन्धयुक्तं भवेत्। मार्गे शिशुरचिता सेतुबन्धाः दृष्टिपथे आगच्छेत्। अस्यां परिस्थितौ शीघ्रमेव मेघाः जलं मुञ्चन्ति।

अपि च कादम्बिनीग्रन्थे -

**विलिखन्ति नखैर्भूमिं मार्जाराः सुभृशं तथा।**
**लोहकिट्टं विस्त्रगन्धि न चिरात्तर्हि वर्षति।।**[14]

इत्थं संहिताग्रन्थे पर्यन्यविचारः बहुविस्तारेण वर्णितः अस्ति।

---

12. बृहत्संहिता सद्योवर्षणाध्यायः श्लोक संख्या- ४, (२८/४)
13. बृहत्संहिता सद्योवर्षणाध्यायः श्लोक संख्या- ५, (२८/५)
14. कादम्बिनी भूमिष्ठः निमित्तधिकारः श्लो. सं. ८१

# भारतीयज्ञानपरम्परायां शङ्कुविमर्शः

**डॉ. आनन्दप्रकाशपाठकः**
अतिथिप्राध्यापकः, ज्योतिषशास्त्रविद्याशाखा
के.सं.वि.वि. जयपुरपरिसरः

शङ्कुयन्त्रं भारतीयखगोलशास्त्रस्य प्राचीनतमम् उपकरणं वर्तते। वेदाङ्गज्योतिषकालादारभ्य दिशानिर्णयार्थं कालज्ञानार्थं च अस्य उपयोगः क्रियते स्म। ज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेषु अस्य नाम "शङ्कुः" अथवा "नरयन्त्रम्" इति प्रसिद्धम् अस्ति। विविधेषु कालखण्डेषु बहुभिराचार्यैः शङ्कोः नानाविधानि रूपाणि निरूपितानि सन्ति। आर्यभटेन निरूपितस्य शङ्कोः प्रमाणं तस्य लुप्तग्रन्थे "आर्यभटसिद्धान्त"नामके ग्रन्थे प्राप्यते। अयम् अंशः रामकृष्णाराध्यकृत् (१४७२ ई.) सूर्यसिद्धान्तटीकायां द्रष्टुं शक्यते। अस्मिन् ग्रन्थे शङ्कुः प्रकारत्रयेण निर्दिष्टो वर्तते। तद्यथा-

**तले द्व्यङ्गुलविस्तारः समवृत्तो द्वादशच्छ्रयः।**
**सारदारुमयी शङ्कुर्द्वितीयो द्वादशाङ्गुलः॥**
**सूच्यग्रस्थूलमूलोऽन्यस्तदुत्सेधस्तलाग्रयोः।**
**स तिर्यग्वेधसूच्योयस्तु लम्बसूची स्फुटो नरः॥**
**तुल्याग्रस्तलवृत्तोऽन्यः शङ्कुः स्याद् द्वादशाङ्गुलः।**
**या व्यक्ता शङ्कुभा यन्त्रात् सा व्यक्तैव नतप्रभा॥** [1]

प्रथमः शङ्कुः सारदारुणा निर्मितः समवृत्तो बेलनाकारः भवति। तस्योन्नतिः द्वादशाङ्गुला, तलस्य च व्यासः द्व्यङ्गुलः, तथा च अस्य आकारः उपरि अधश्च समानः भवति। द्वितीयः शङ्कुः शङ्क्वाकारः दृश्यते, अस्यापि उन्नतिः द्वादशाङ्गुला भवति। परन्तु अस्य मूलभागः स्थूलः अग्रभागश्च सूच्यग्रवत् तीक्ष्णः भवति। तृतीयः शङ्कोः उपरितलयोः व्यासः समानः तथा उन्नतिः द्वादशाङ्गुला एव। स प्रथमशङ्कुवत् भवति, किन्तु अयं सम्भवतः सुगमोपयोगार्थं निर्मितः। ब्रह्मगुप्तेन ब्रह्मस्फुटसिद्धान्ते (६२८ ई.) द्वाविंशतितमे यन्त्राध्याये अस्य विशेषप्रकारस्य शङ्कोः वर्णनं कृतम्। अयं शङ्कुः शङ्क्वाकारः आसीत्, यस्य शीर्षे मूलभागे च छिद्रे स्तः, येन साहुलसूत्रस्य (लम्बसूत्रस्य) सहाय्येन तस्य ऊर्ध्वाधरतायाः परीक्षा भवति स्म। यथा -

**मूले द्व्यङ्गुलविपुलः सूच्यग्रो द्वादशाङ्गुलोच्छ्रायः।**
**शङ्कुतलाग्रविद्धोऽग्रेवेधलम्बादृजुर्ज्ञेयः॥**[2]

अयं शङ्कुः मूलभागे द्व्यङ्गुलविपुलः तथा शीर्षे सूच्यग्रवत् तीक्ष्णः भवति। तस्योन्नतिः

1. Indian Journal of History of Science, Page no. 168
2. ब्राह्मस्फुटसिद्धान्त.यन्त्राध्यायः श्लो. ३९

द्वादशाङ्गुलपरिमिता भवति। अयं शङ्कुः तलाग्रयोः उभयत्र छिद्रयुक्तः भवति। शीर्षस्थछिद्रात् लम्बसूत्रं साहुलं वा निक्षिप्य तेन ज्ञातव्यं यत् शङ्कुः ऋजुः अस्ति न वा इति। भट्टोत्पलस्य टीकायां अपि स्पष्टीकृतं यत् अस्मिन् शङ्कौ उपरि अधश्च क्षैतिजछिद्रे स्तः। तयोः छिद्रयोः सूच्यादयः स्थाप्य ताभ्यां द्वे लम्बसूत्रे अवलम्ब्येते स्म। यदि ते लम्बसूत्रे शङ्कुं अस्पृशन्ते, स्वतन्त्रतया अवलम्बेते, अधस्तनसूच्याः अग्रभागं सम्यक् स्पृशन्ति च, तदा अयं शङ्कुः भूमौ सम्यग् नवत्यंशकोणे ऋजुरेव स्थितः इति निश्चितं ज्ञायते।

लल्लाचार्येण स्वग्रन्थे शिष्यधीवृद्धिदतन्त्रे एकविंशतितमे अध्याये शङ्कुनिर्माणविधिः निरूपितः। तेन अयं शङ्कुः 'भ्रमसिद्धः' इति कथितः, अर्थात् यन्त्रभ्रमणेन अथवा खरादयन्त्रेण सम्यग् निर्मितः इति। यथा -

**भ्रमसिद्धः सममूलाग्रपरिधिरतिसुगुरुसारदारुमयः।**
**जुरव्रणराजिलाञ्छनस्तथा च समतलः शङ्कुः॥**
**वृत्तः षड्ङ्गुलानि द्वादशदीर्घश्चतुर्भिरवलम्बैः।**
**स्थाप्यः सुसमः प्रथमे जलेन च सुसमीकृते फलके॥** [3]

अर्थात् शङ्कुः भ्रमयन्त्रेण निर्मीयेत, येन सः पूर्णतया समवृत्तः समरूपश्च भवेत्। तेन निर्देशितं यत् शङ्कुः दृढेन गुरुणा च सारदारुणा निर्मितः स्यात्। तस्य आकृतिः एवं भवेत् यत् उपरि अधश्च उभयत्र परिधिः समाना, सा च षडङ्गुलपरिमिता, तस्योन्नतिश्च द्वादशाङ्गुलपरिमिता भवेत्। सहैव शङ्कुः ऋजुः, अव्रणः, अकलङ्कः च स्यात्, येन सः यथार्थं शुद्धं च मापनं कर्तुं सम्यक् योग्यः सिद्धो भवेत्।

श्रीपतिना लल्लाचार्यस्य निरूपणमेव अनुवर्तितम्, किन्तु सः द्रव्यनिर्देशे द्विरददन्तस्य विकल्पमपि अयोजयत्। तेन उक्तं यत् शङ्कुः हस्तिदन्तेन वा दृढसारदारुणा निर्मातव्यः। यथा -

**भ्रमविरचितवृत्तस्तुल्यमूलाग्रभागो द्विरददनजन्मा सारदारूद्भवो वा।**
**गुरु ऋजुरवलम्बादव्रणः षट्कवृत्तः समतल इह शस्तः शङ्कुरर्काङ्गुलोः स्यात्॥** [4]

अयं शङ्कुः अपि 'भ्रमविरचितः' इति कथितः, अर्थात् अस्य निर्माणं भ्रमयन्त्रेण कार्यम्। अस्य निर्माणे द्विरददन्तं वा दृढं सारदारु वा उपयुज्यते इति निर्दिष्टम्। शङ्कोः गुरुत्वम् आवश्यकं मन्यते, येन सः वातादिभिः न चलति स्थिरश्च भवति। तस्य परिमाणे द्वादशाङ्गुलोन्नतिः तथा षडङ्गुलपरिधिः निर्दिष्टा।

आचार्यभास्करेणापि हस्तिदन्तनिर्मितस्य शङ्कोः उल्लेखः कृतः वर्तते। तद्यथा -

**समतल-मस्तक-परिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः।**
**तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्॥** [5]

**शङ्कुना कालसाधनम्-**

समतले भूमितले शङ्कोः परितः मण्डलं लिख्यते स्म। यदा प्रातः सायंकालयोः शङ्कुच्छाया

3. शिष्यधीवृद्धिद-तन्त्र.यन्त्राध्यायः श्लो. ३१-३२
4. सिद्धान्त-शेखरः,यन्त्राध्यायः, श्लो. १८
5. सि.शि.गोला.यन्त्र.श्लो.९

तन्मण्डलस्य परिधिं स्पृशति, तदा तौ द्वौ बिन्दू संयोज्यते स्म। अयं विधिः एतत् मान्यते स्म यत् प्रातःकालात् सायंकालपर्यन्तं सूर्यस्य क्रान्तिः समानैव भवति। किन्तु वस्तुतः सूर्यः दिने दिने किञ्चित् उत्तरदक्षिणदिशि सञ्चरति, विशेषतः अयनान्तकालेषु। अतः प्रातःसायंकालयोः छाया एका एव रेखा न भवति, किन्तु तयोः पन्थानौ अतिपरवलयरूपौ भवतः। यदि अयं परिवर्तनविशेषः न सम्यक् संशोधितः, तर्हि लब्धा प्राची–पश्चिमदिक् सूक्ष्मतया विपर्यस्ता भवति।

अयं दोषं निराकर्तुं भारतीयखगोलविदः गणिताधारितान् संशोधनान् निरूपितवन्तः, ये सूर्यस्य अग्राकोणस्य तथा क्रान्तिज्याया आधारेण व्यवस्थिताः आसन्। यतः सूर्यः प्रत्येकक्षणं क्रान्तिवृत्ते उत्तरदक्षिणदिशि गच्छति। अतः प्रातःकाले छायायाः मण्डलप्रवेशकाले सायंकाले निर्गमकाले च सूर्यस्य क्रान्तिः भिन्ना भवति। अस्य संशोधनाय श्रीपतिना उक्तम्[6] -

**छायानिर्गमनप्रवेशसमयार्कक्रान्तिजीवान्तरं क्षुण्णं**
**स्वश्रवणेन लम्बकहृतं स्यादङ्गुलाद्यं फलम्।**
**पश्चाद्बिन्दुमनेन रव्ययनतः संचालयेद्व्यत्ययात्**
**स्पष्टा प्राच्यपराऽथवाऽयनवशात् प्राग्बिन्दुमुत्सारयेत्॥**

अर्थात् छायामण्डले प्रवेशकाले निर्गमकाले च सूर्यस्य क्रान्तिज्ययोः यदन्तरं भवति, तत् छायाकर्णेन गुणयेत्, अनन्तरं तल्लम्बज्यया विभजेत्। एवं गणिते कृते सायंकाले यत्र छाया मण्डलं स्पृशति सः पश्चिमबिन्दुः स्वल्पं सञ्चालयितव्यो भवति। यतो हि सूर्यः यस्यां दिशि उत्तरे वा दक्षिणे गच्छति, तस्य विपरीतदिशि बिन्दोः सञ्चलनं करणीयम्। एवं संशोधितं बिन्दुं प्रातःकालिकबिन्दुना सह संयोज्य यथार्था प्राची-पश्चिमरेखा सम्यग् प्राप्यते।

**वराहमिहिरस्य त्रि-छाया-विधिः-**

वराहमिहिराचार्येण स्वग्रन्थे पञ्चसिद्धान्तिकायां दिशानिर्णयार्थम् एकः विशेषः विधिः निर्दिष्टा, या "त्रि-छाया-विधिः" इति प्रसिद्धा। अस्यां विधौ एतद् अभिमतम् आसीत् यत् यदि दिने त्रिषु भिन्नेषु कालेषु शङ्कुच्छायाया अग्रभागाः भूमौ चिह्निताः स्युः, ततः तैः बिन्दुभिः यः कश्चित् मण्डलः लिख्यते, स एव तस्य दिने छायापथस्य प्रतिनिधित्वं करिष्यति। यथा[7] -

**नाभ्यासुन्नच्छायाग्रमङ्कयेत् त्रिस्ततो लिखेन्मत्स्यौ।**
**तन्मत्स्यवदननिःसृतसूत्रद्वयपाततुल्येन॥**
**सूत्रेण बिन्दुकत्रयसंस्पर्शसमेन मण्डलं यत् स्यात्।**
**तेन कदाहनि छाया शङ्कोर्गच्छत्यमुंचन्ती॥**
**तन्मण्डलमध्याद्यच्छङ्कुतलश्व दक्षिणोत्तरं भवति।**
**तच्छङ्कुविवरमुदगास्थितं च माध्यन्दिनी छाया॥**

---

6. सिद्धान्त-शेखरः, अध्यायः ४, श्लो. ३
7. पञ्चसिद्धान्तिका, अध्यायः १४, श्लो. १४-१६

अर्थात् दिने त्रिवारं शङ्कुच्छायाया अग्रभागः भूमौ अङ्कनीयः। तेषां त्रयाणां बिन्दूनां साहाय्येन मत्स्याकृतिद्वयं निर्मातव्यं, येन तयोः लम्बसमद्विभाजकौ रेखाङ्कनीयौ भवेताम्। यत्र एते समद्विभाजकौ परस्परं मिलतः, तं केन्द्रं कृत्वा तादृशं मण्डलं लेखनीयम्। यत् बिन्दुत्रयं स्पृशति। वराहमिहिरस्य मतानुसारं तस्मिन् दिने शङ्कुच्छाया अस्यैव मण्डलपरिधौ सञ्चरति।

भास्कराचार्येण स्वग्रन्थे सिद्धान्तशिरोमणौ गोलाध्याये वराहमिहिरस्य अस्याः विधेः समीक्षा कृता। तेन स्पष्टं प्रतिपादितं यत् शङ्कुच्छायायाः पन्थाः न वृत्तरूपः भवति, अपि तु अतिपरवलयरूपः भवति। मध्याह्नसमये तु छायापथः कल्पितवृत्तेन सह प्रायेण साम्यं दर्शयति। अतः अयं विधिः व्यवहारार्थं अल्पदोषेण उपयुज्यते शक्या। तथापि सः प्रकारः सर्वथा सूक्ष्मफलप्रदो न भवति। एवं भास्करद्वितीयः ज्यामितीयसूक्ष्मतायाः आधारेण वराहमिहिरस्य सिद्धान्तं संशोध्य निरूपितवान् यत् शङ्कुच्छायायाः मार्गः अतिपरवलयरूप एव भवति।

**शङ्कुना कालसाधनम्-**

शङ्कुच्छायायाः दीर्घतया दिवसभागस्य कालः ज्ञायते स्म। ब्रह्मगुप्ताचार्येण स्वग्रन्थे ब्रह्मस्फुटसिद्धान्ते शङ्कुच्छायया कालज्ञानार्थं सरलाऽपि एका विधिः प्रदर्शिता। एषा विधिः त्रिकोणमितिगणनायाः सूक्ष्मविधिभ्यः भिन्ना आसीत्, शीघ्रफलप्राप्त्यर्थं च प्रयुज्यते स्म। ब्रह्मगुप्तेन एषा विधिः गणिताध्याये निर्दिष्टा। अस्य प्रयोजनं छायालम्बमानं तथा दिवसभागपरिमाणं ज्ञात्वा सूर्योदयात् आरभ्य कियत् कालः अतीतः (पूर्वाह्णे) अथवा सूर्यास्तपर्यन्तं कियत् कालः अवशिष्टः (अपराह्णे) इति निर्धारणम् आसीत्। यथा[8] -

**छायानरसैकहृतं द्युदलं प्रागपरयोर्युगतशेषम्।**

अर्थात् छायालम्बमानं नरमाननेन (शङ्कोः उन्नत्या) विभजेत्, तस्मिन् चैकं योजयेत्। अनन्तरं तेन दिवसभागार्धेन विभजेत्। एवं प्राप्तं फलं पूर्वाह्णे अतीतकालं, अपराह्णे च अवशिष्टकालं सूचयति। ब्रह्मगुप्तस्य टीकाकारः चतुर्वेदाचार्यः पृथूदकस्वामी (८६४ ई.) अस्य प्रकारस्य आलोचनां कृतवान्। तेन उक्तं यत् अयं विधिः विषुववृत्तेऽपि न सम्यक् फलप्रदो भवति। अन्येषु अक्षांशेषु तु कथं पुनः इति।

यथार्थकालगणना तु अस्मिन् सिद्धान्ते आधृता आसीत् यत् द्वादशाङ्गुलोन्नतः शङ्कुः, तस्य छाया, छायाकर्णश्च येन त्रिभुजः निर्मीयते, सः सूर्यस्थित्या, खगोलीयक्षितिजेन, शिरोबिन्दुना (Zenith) च निर्मितेन खगोलीयगोलीयत्रिभुजेन सह समरूपः भवति। अस्यां विधौ मुख्यतः सूर्यस्य नतांशस्य अथवा उन्नतांशस्य ज्या (R-sin) ज्ञायते, अन्ते च नतकालः (Hour-angle) निश्चितः क्रियते। प्रथमं द्वादशाङ्गुलोन्नतस्य शङ्कोः ($g=12$) तस्य छायालम्बमानस्य ($s$) च साहाय्येन छायाकर्णः ($h$) निर्धार्यते। समकोणत्रिभुजस्य नियमेन कर्णः एतेन प्रकारेण ज्ञायते-

h=(g^2+s^2 )=(12^2+s^2 )

---

८. ब्राह्मस्फुटसिद्धान्तः, गणिताध्यायः, अध्यायः १२, श्लो. ५२

अनेन सूत्रेण शङ्कोः छायायाः कर्णः लभ्यते, यस्य आधारेण अनन्तरं सूर्यस्य उन्नतांशः, नतांशः, कालज्ञानं च क्रियते।

अनन्तरं सूर्यस्य उन्नतांशस्य ज्या गणनीया भवति। सिद्धान्तग्रन्थेषु एषा ज्या "महाशङ्कु" इति कथ्यते। अस्य निर्धारणं निम्नप्रकारेण भवति—

"महाशङ्कुः"=(R×12)/h

(अत्र Rखगोलीयगोलस्य त्रिज्या, या प्रायः ३४३८ इति स्वीक्रियते, तथा h छायाकर्णः भवति।) भूमौ स्थितः शङ्कुत्रिभुजः खगोलीयगोले स्थितत्रिभुजेन सह समरूपो भवति। तत्र खगोलीयत्रिभुजे-

कर्णः = R, लम्बः = Rsin, समरूपत्रिभुजयोः अनुपातः-12/h=(Rsin)/R

अतः Rsin=(R×12)/h

अनन्तरं "छेदः" (Divisor) निर्धार्यते, यः दर्शकस्य अक्षांशे निर्भरति। अस्य गणना निम्नप्रकारेण क्रियते—

"छेदः"=("महाशङ्कुः" ×R)/"लम्बज्या" =("महाशङ्कुः" ×R)/(Rcos)

(अत्र R खगोलीयगोले त्रिज्या, दर्शकस्य अक्षांशः, तथा Rcos लम्बज्या इति कथ्यते।) तस्मात् परं सूर्यस्य क्रान्तेः आधारेण "कुज्या" (पृथिवीज्या) अपि निर्धार्यते। तस्याः गणना निम्नप्रकारेण भवति-

"कुज्या"=("विषुवतीय-मध्याह्न-छाया" ×Rsin)/12

(अत्र Rsin सूर्यस्य क्रान्तिज्या, "विषुवतीय-मध्याह्न-छाया" विषुवदिनस्य मध्याह्नकाले प्राप्ता छाया, तथा १२ शङ्कोः उन्नतिः भवति।)

कालज्ञानस्य प्रमुखतमः चरणः सूर्यस्य नतकालस्य (Hour-angle) निर्धारणम् अस्ति। अस्य गणनायाम् "इष्टान्त्या" एवं "द्युज्या" (दिनत्रिज्या) इत्येतयोः उपयोगः क्रियते। भास्कराचार्येण ब्रह्मगुप्तेन च निर्दिष्टं यत् कस्यापि क्षणस्य "इष्टान्त्या" निम्नलिखितेन सूत्रेण ज्ञायते—

"इष्टान्त्या"=("मध्याह्नकर्णः" ×"अन्त्या (द्युज्या)")/"इष्टकर्णः"

अत्र "मध्याह्नकर्णः" मध्याह्नकाले छायाकर्णः, "अन्त्या" (Day-radius), तथा "इष्टकर्णः" तत्क्षणस्य छायाकर्णः भवति।

यदा "इष्टान्त्या" प्राप्ता भवति, तदा सा "अन्त्या" इत्यस्मात् व्यावर्त्य सूर्यस्य नतकालस्य उत्क्रमज्या (Versed-sine) लभ्यते। तदिदं सूत्रम्—

**R"vers"(h)="अन्त्या"-"इष्टान्त्या"**

अत्र h सूर्यस्य नतकालः भवति। एतया उत्क्रमज्यया ज्या-सारण्या साहाय्येन कोणमानं ज्ञायते। इत्थं भारतीयज्ञानपरम्परायां विशिष्य निखिलज्ञानमये वेदे तत्रापि वेदाङ्गेषु महानीये सिद्धान्तस्कन्धे शङ्कोः महनीयं स्थानं वर्तते। इति दिक् ।।

भास्करोदयः ISSN - 2278-0815

# संहितोक्त-प्रासादलक्षणविमर्शः

**डॉ.शैलेशकुमारतिवारी**
सहायकाचार्यः (ग्रेड) ,ज्योतिषविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः,वेदव्यासपरिसरः,
बलाहरः, काङ्गड़ा, हिमाचलप्रदेशः
अणुसङ्केतः-dr.shaileshk.tiwari@csu.co.in
दूरवाणीसंख्या- 9198823227

**शोधसारः-** भारतवर्षस्य गौरवभूतं श्रद्धास्थानं चास्माकं देवमन्दिरम्। मन्दिराणि भारतीयसनातनजनानाम् आस्थाकेन्द्राणि सन्ति। परमात्मशक्तेः प्रतिष्ठाया आधारभूतत्त्वेन सर्वेषां सनातनधर्मरतानां जनानां भावना देवमन्दिरे देवविग्रहेषु च सर्वदैव भवति। देवप्रासादनिर्माणेन ईश्वरसन्निधेरनुभवः तथा शिल्पविद्या-स्थापत्यकलादीनां दर्शनं च साक्षाद्वयं कर्त्तुं प्रभवामः।

**कूटशब्दाः-** देवतायतनम्, वापी, कूपः, तडागः, प्रासादः, शृङ्गम्, भौमः, शिखरम्, सर्वतोभद्रः।

**प्रस्तावना-** प्र उपसर्गात्मकं सद् धातोः घञ् प्रत्यये कृते प्रासादशब्दस्य निष्पत्तिर्भवति। “प्रसीदन्त्यस्मिन्निति प्रासादः” इति निर्वचनेन यस्मिन् स्थाने गमनेन वासेन वा प्रसन्नता भवति तस्य स्थानस्य प्रासादसंज्ञा ।विंशतिप्रकारकाणां प्रासादानां वर्णनम् आचार्यवराहेण कृतं विद्यते ।तेषां विस्तरेण विमर्शः प्रस्तूयते ।

**विषयोपस्थापनम्-**

“देवतायतनं कुर्याद् यशोधर्माभिवृद्धये” इति वराहमिहिराचार्यस्य वचनेन प्रासादानां (देवालयानां) निर्माणस्य प्रयोजनं समुद्घाटितं भवति। कथनस्य भावोऽयं वर्तते यत् मानवजीवने कीर्तेर्धर्मस्य चाभिवृद्धये देवतागृहं विदध्यात्। जनाः यज्ञकर्मणा, वापी-कूप-तडागादीनां निर्माणेन च ये स्वर्गादीनामक्षयलोकान् प्राप्तकरणे समर्थाः भवन्ति ते लोकाः पुण्यफलानि वा सुराणामालयनिर्माणेन सम्यक्रूपेण दृश्यते। यथोक्तम्-

**इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता।**
**देवानामालयः कार्यो द्वयमप्यत्र दृश्यते ।।**

प्रसङ्गेस्मिन् महर्षिकाश्यपः-

**इष्टापूर्तादिभिर्यज्ञैर्यावत् कुर्वन्ति मानवाः ।**
**अग्निष्टोमादिपशुभिरिष्टं यज्ञं प्रकीर्तितम्।।**
**वापीकूपतडागादिदेवतायतनानि च ।**
**स्वर्गस्थितिं सदा कुर्यात्तद्दानं पूर्तसंज्ञितम्।**
**देवानामालयः कार्यो द्वयमप्यत्र लभ्यते।।**

यतो हि भारतीयसंस्कृतौ देवालयानां महती प्रतिष्ठा वरीवर्ति। सम्पूर्णेऽस्मिन् राष्ट्रे विविधानां

देवलयानां दर्शनं कर्तुं शक्यते। देवालयैस्सह जनानां श्रद्धा-भक्ति-विश्वासभावनाश्च सन्नद्धाऽस्ति। प्रसीदन्त्यस्मिन्निति अर्थात् "प्र" उपसर्गात्मकं सद्धातोः घञ् प्रत्ययेन अयं प्रासाद-शब्दः निष्पद्यते। यस्यार्थो भवति-देवायतनं नृपसदनञ्चेति।
यथा श्रीमद्देवीभागवते-

**इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्षकान्।**
**कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम् ।।**

कीदृशेषु स्थानेषु सुराणामालयनिर्माणं कर्तुं शक्यते। अर्थात् देवानां वासः कीदृशेषु स्थानेषु भवतीति प्रसङ्गेऽस्मिन् आचार्यवराहेण निगद्यतम्। तद्यथा -

**सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च ।**
**स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः ।।**

निष्पादितेषु अकृतकेषु जलोपवनसमन्वितेषु स्थानेषु देवानां समागमनं भवति। एवं विधौ यस्मिन् सरोवरे पद्मपत्रसमन्वितं जलं भवति उत यत्र हंस-कारण्डव-क्रौञ्च-चक्रवाकादयः पक्षिविशेषाः शब्दा उच्चारयन्ति एवञ्च यत्र सरोवरतटे निचुलवृक्षविशेषास्तेषां याश्छायास्तासु छायासु जलजीवाः विश्रमन्ति तेषु नित्यं देवाः रमन्ति। अपि च-

**सरःसु नलिनीछत्रनिरस्तरविरश्मिषु।**
**हंसासाक्षिप्तकह्लारवीथीविमलवारिषु।।**
**हंसकारण्डवक्रौञ्चचक्रवाकविराविषु।**
**पर्यन्तनिचुलच्छायाविश्रान्तजलचारिषु।।**
**क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वराः ।**
**नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः।।**
**फुल्लतीरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः ।**
**पुलिनाभ्युन्नतोरस्या हंसवासाश्च निम्नगाः ।।**

वन-नदी-पर्वत-निर्झरोपान्तेषु स्थानेषु उद्यानवत्सु नगरेषु देवाः विहरन्ति। यथोक्तम्-

**वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु ।**
**रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च ।।**

सर्वदेवानां सामान्येन प्रतिष्ठास्थानविषये देवालयचन्द्रिकाकारेणोच्यते-

**तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे।**
**शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा।**
**सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने।**
**देशेऽन्यत्र मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत्।।**

तत्र ब्राह्मणादीनां कृते गृहनिर्माणे यथा शुभावहा भूमिः कथिता तथैव देवालयनिर्माणार्थमपि

भूमिः प्रशस्ता भवति। यथोक्तम्-

**भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि।**
**ता एव तेषां शस्यन्ते देवतायतनेष्वपि।।**

वास्तुप्रसङ्गे शास्त्रे एवं प्रतिपादितो विद्यते। तद्यथा-

**सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते भूमिः ।**
**गन्धश्च भवति यस्यां घृतरुधिरान्नाद्यमद्यसमः ।।**
**कुशयुक्ता शरबहुला दूर्वाकाशावृता क्रमेण मही।**
**अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च ।।**

सुरगृहं सदैव चतुःषष्टिपदं कार्यं तथा तस्मिन् देवतायतने मध्यमं द्वारं समदिक्स्थं भवेत्तदा श्रेयस्करम् । यथोक्तम्-

**चतुःषष्टिपदं कार्यं देवतायतनं सदा ।**
**द्वारं च मध्यमं तस्मिन् समदिक्स्थं प्रशस्यते।।**

प्रासादानां निर्माणविधानं एवं प्रतिपादितं विद्यते यत् देवगृहस्य यो विस्तारो भवेत् तद्विस्ताराद् द्विगुणा समुन्नतिर्भवेत्। उन्नतेः तृतीयांशतुल्या देवगृहस्य कटिः भवति। कटि इत्युक्ते सोपानोपरि यतो देवगृहस्य प्रारम्भो भवति। देवगृहस्य यो विस्तारः तस्यार्धो भागः गर्भसंज्ञकः। अन्यासु सर्वासु दिक्षु भित्तयो निर्मिताः भवन्ति। गर्भस्य चतुर्थांशमानेन विस्तीर्णं द्वारं, द्वारविस्ताराद्विगुणमुच्छ्रितं भवति। मेरु-मन्दर-कैलाश-विमानच्छद-नन्दन-समुद्ग-पद्म-गरुड-नन्दिवर्धन-कुञ्जर-गुहराज-वृष-हंस-सर्वतोभद्र-घट-सिंह-वृत्त-चतुष्कोण-षोडशाश्रि-अष्टाश्रीत्यादयो विंशतिप्रकारकाः प्रासादाः वराहमिहिराचार्येण कथिताः सन्ति। उक्तञ्च-

**मेरुमन्दरकैलाशविमानच्छन्दनन्दनाः ।**
**समुद्गपद्मगरुडनन्दिवर्धनकुञ्जराः ।।**
**गुहराजो वृषो हंसः सर्वतोभद्रको घटः ।**
**सिंहो वृत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा ।।**
**इत्येते विंशतिः प्रोक्ताः प्रासादा संज्ञया मया ।**
**यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः ।।**

**तत्रादौ मेरुप्रासादलक्षणम्-**

अस्मिन् प्रासादे षट्कोणाः, द्वादशभौमाः, विविधप्रकारकाः गवाक्षाः,चतसृषु दिक्षु द्वाराणि,द्वात् रिंशद्धस्तपरिमिताः विस्तीर्णता उच्चता च चतुःषष्टिहस्तात्मिका भवन्ति । उक्तञ्च-

**तत्र षडश्रिर्मेरुर्द्वादशभौमो विचित्र कुहरश्च ।**
**द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः ।।**

**मन्दरप्रासादलक्षणम्-**

अस्य प्रासादस्यायामः त्रिंशद्धस्तपरिमितः, षडश्रिसमन्वितः,दशभिर्भूमिकाभिर्युक्तः विविधैः शिखरैः सुसज्जितश्च भवति।

**कैलाशप्रासादलक्षणम्-** कैलाशनामकोयं प्रासादः शिखरवान्, अष्टाविंशतिर्हस्तो विस्तीर्णः, षट्पञ्चाशद्धस्तास्तस्यौच्यम्, अष्टभौमसंयुक्तः,षडश्रिश्च भवति। यथोक्तम्-

**त्रिंशद्धस्तायामो दशभौमो मन्दरः शिखरयुक्तः ।**
**कैलाशोऽपि शिखरवानष्टाविंशोऽष्टभौमश्च।।**

**विमानच्छदप्रासादलक्षणम्-**

विमाननामकः प्रासादः जालगवाक्षयुक्तः, एकविंशतिर्हस्तो विस्तीर्णः,द्वाचत्वारिंशद्धस्तस्यौच्च्यता, अष्टभूमिकः, षडश्रियश्च भवति ।

**नन्दनप्रासादलक्षणम्-**

नन्दननामप्रासादःषड्भूमिकःषडश्रियश्च,द्वात्रिंशद्धस्तोआयामः,चतुःषष्टिर्हस्तास्तस्यौच्च्यता, षोडशशिखरैः संयुक्तश्च भवति । तद्यथा-

**जालगवाक्षयुक्तो विमानसंज्ञस्त्रिसप्तकायामः ।**
**नन्दन इति षड्भौमो द्वात्रिंशः षोडशाण्डयुतः ।।**

समुद्ग-पद्मप्रासादलक्षणम्-

अयं समुद्गप्रासादो वृत्ताकारः, एकेन शृङ्गेण संयुक्तः, एकभूमिकासमन्वितो भवति। तथैव पद्मप्रासादस्य कमलाकृतिः अर्थात् अष्टभिर्दलैर्युक्तः, अष्टौ हस्तविस्तीर्णः एवञ्च षोडशहस्तास्तस्योच्चता, एकशृङ्गभूमिकाभ्यां संयुक्तो भवति। यथोच्यते-

**वृत्तः समुद्गनामा पद्मः पद्माकृतिः शया अष्टौ ।**
**शृङ्गेणैकेन भवेदेकैव च भूमिका तस्य ।।**

**गरुड-नन्दिवर्धनप्रासादलक्षणम्-**

स्वनामानुगुणं गरुडसदृशो गरुडप्रासादो भवति। तथैव नन्दिवर्द्धनोऽपि गरुडाकृतिकः किन्तु पक्षपुच्छरहितश्च भवति। एतौ प्रासादौ चतुर्विंशतिहस्तपरिमितौ विस्तीर्णौ, अष्टचत्वारिंशद्धस्तोच्छ्रतिसंयुक्तौ, सप्तभौमिकौ, चतुर्विंशतिशिखरैः समन्वितौ भवतः। उक्तञ्च-

**गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुश्कविस्तीर्णः।**
**कार्यस्तु सप्तभौमो विभूषितोऽण्डैस्तु विंशत्या।।**

**कुञ्जर-गुहराजप्रासादलक्षणम्-**

कुञ्जरप्रासादः हस्तिपृष्ठाकारः, मूलात् चतुर्दिग्भागेषु षोडशहस्तपरिमाणो विस्तारः, द्वात्रिंशद्धस्तपरिमितोच्चता, एकभूमिकश्च भवति। एतैः पूर्वोक्तैः सर्वगुणविभूषितैः गुहराजप्रासादो स्वनामानुरूपं गुहाकारो भवतीति विशेषो दृश्यते। अनयोर्द्वयोरपि त्रिचन्द्रशाला वलभी भवति। तद्यथा-
कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो मूलात्।

गुहराजः षोडशकस्त्रिचन्द्रशाला भवेद् वलभी ।।

**वृष-हंस-घट-प्रासादलक्षणम्-**

वृषनामकः प्रासादः एकभूमिकः, शिखरैकेन युक्तः,द्वादशहस्तविस्तृतः, चतुर्विंशतिहस्तमुच्चता, सर्वासु दिक्षु परिवर्तुलो भवति । एतैर्गुणविभूषितैः हंसस्वरूपसदृशः हंसप्रासादः,कलशाकारः घटनामकः प्रासादः अष्टहस्तो विस्तीर्णः,विष्कम्भात् षोडशहस्तास्तस्यौच्च्यम्, शृङ्गेणैकेन संयुक्तस्सन् एकभूमिकश्च भवति। यथोक्तम्-

**वृष एकभूमिशृङ्गो द्वादशहस्तः समन्ततो वृत्तः ।**
**हंसो हंसाकारो घटोऽष्टहस्तः कलशरूपः ।।**

**सर्वतोभद्रप्रासादलक्षणम्-**

**द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः ।**
**बहुरुचिरचन्द्रशालः षड्विंशः पञ्चभौमश्च ।।**

**सिंह-वृत्त-चतुष्कोण-षोडशाश्रि-अष्टाश्रिप्रासादलक्षणम्-**

सिंहनामको प्रासादः सिंहप्रतिमाभिश्शोभितः, प्रासादेऽस्मिन् द्वादशकोणः अष्टहस्तो विस्तीर्णता च भवति। अन्ये ये वृत्त-चतुष्कोण-षोडशाश्रि-अष्टाश्रियभिधानानि सन्ति ते स्वनामानुसाराकृतिकाः भवन्ति। उक्तञ्च-

**सिंहः सिंहाक्रान्तोद्वादशकोणोऽष्टहस्तविस्तीर्णः ।**
**चत्वारोऽञ्जनरूपाः पञ्चाण्डयुतस्तु चतुरस्रः ।।**

**समीक्षणम्-**

देवस्थानं नाम देवमन्दिरं यत्र गमनस्य इच्छामात्रेण पुण्यलाभः यशप्राप्तिश्च भवति। प्रासादनिर्माणेन धर्मपालनं तु भवत्येव परञ्च वास्तुकलानां संरक्षणं संवर्धनञ्चापि भवति येन शास्त्रेषूपनिबद्धं स्थापत्यजन्यज्ञानं समाजे दृष्टिपथे समागच्छति। अतएव देवशिल्पिविश्वकर्मणा दनुजशिल्पकर्त्रा मयासुरेण प्रतिपादितं कश्यपऋषिणा गर्गमुनिना आचार्यवराहमिहिरप्रभृतिभिः विद्वद्वर्यैरनुमोदितं प्रासादनिर्माण-ज्ञानानुगुणं मन्दिराणां निर्माणं भवेत्।

**स्वानुशीलनम्-**

मानवजीवने देवतायतननिर्माणेन पुण्यलाभः यशोवृद्धिः स्वधर्मरक्षणञ्च भवति। लोके जनाः विविधयज्ञानुष्ठानकर्मणा वापी-कूप-तडागादीनां निर्माणेन च पुण्यफलानि प्राप्नुवन्ति एवं स्वर्गादीनामक्षयलोकान् प्राप्तयेऽपि अभिलाषयुक्ताः भवन्ति। प्रायशः तैः सर्वैः सुराणामालयनिर्माणे प्रत्यक्षपरोक्षरूपेण च सम्यक्योगदानं नूनमेव भवति। अतः देवस्थाननिमित्तं स्थानचयनं एवं देवप्रासादं कुत्र निर्मातव्यं अथ च तस्य स्वरूपं कीदृशं भवेत् इत्यादिकं विविधचिन्तनं प्रायशः प्रचलति। साम्प्रतिके युगे देवप्रासादनिर्माणस्य भौगोलिकस्थानानुगुणं नैकाः विधयः प्रचलन्ति। यथा उत्तरभारते नागरशैली दृश्यते यत्र शिखरोच्छृतिः विस्तृतिश्च भवति यथा सौराष्ट्रे सोमनाथमन्दिरम्, अयोध्यानगर्यां

श्रीरामजन्मभूमौ नूतननिर्मितं श्रीराममन्दिरम्, प्राचीनतमं खजुराहोस्थितमन्दिरं तथा उत्कलराजधान्यां भुवनेश्वरस्थे श्रीलिङ्गराजमन्दिरम्, महाराष्ट्रप्रदेशे औरंगाबादजनपदे वेरुलग्रामे श्रीधृष्णेश्वरज्योतिर् लिङ्गमन्दिरम्, दक्षिणभारते द्रविडशैलीदर्शनं भवति तत्र गोपुरम् (प्रवेशद्वारं)- विमानकस्वरूपस्थितिः विद्यते यथा- सागरतटे रामेश्वरे श्रीरामनाथस्वामीमन्दिरम्, हम्पीस्थिते विरूपाक्षमन्दिरम्, तञ्जावुरस्थे बृहदेश्वरमन्दिरम्, मदुरैस्थानकं मीनाक्षीमन्दिरम्, मध्यभारते (विन्ध्य-कृष्णानद्योर्मध्यभागे) च नागर-द्रविडमिश्रणेन निर्मिता वेसरशैली (विश्रा) दृष्टिपथे समायाति यस्यां शैल्यां उत्कलप्रदेशे पुरीस्थिते श्रीजगन्नाथमन्दिरम्, कर्णाटकप्रदेशे पट्टदकले मल्लिकार्जुन-पापनाथमन्दिरञ्च, बेलूरस्थे चेन्नाकेशवमन्दिरम्, हलेबिदुस्थे होयसलेश्वरमन्दिरम्, नुग्गेहल्यां लक्ष्मीनरसिंहमन्दिरम्, लाडखान-मन्दिरम्, महाराष्ट्रप्रदेशे औरंगाबादजनपदे वेरुलग्रामे एलोरासन्निकटे कैलाशनाथमन्दिरसहितानि बहूनि मन्दिराणि सम्पूर्णे भारतवर्षे विराजितानि सन्ति। एतेषां निर्माणार्थं समग्रज्ञानं ज्योतिषशास्त्रस्य संहितास्कन्धे विस्तरेण विद्यते। शास्त्रदिशा कृतप्रासादनिर्माणेन निर्मिताः प्रासादाः चिरकालपर्यन्तं तिष्ठन्ति, लोके धर्मप्राणजनैः समादृताश्च भवन्ति।

**उपसंहारः-** देवप्रासादाः आस्थाविश्वासरूपाः भवन्ति । वास्तुशिल्पकलादिभिः धर्मसंस्कृतेः संरक्षणाय संवर्द्धनाय च एतेषां भूमिका महनीया भवति। अस्मिन् आस्थाकेन्द्रे वयं स्वेष्टदेवानां समर्चनपुरस्सरं श्रद्धासमर्पणं मानवजीवनप्राप्तये च कृतज्ञताज्ञापनं प्रार्थनामपि कुर्मः । अनेन आचरणेन देवानामाशीर्वादः प्राप्यते मनसि शान्तिरपि लभ्यते। वयं जानीमः यत् भारतवर्षे पुराकालात् प्रतिष्ठापिताः देवप्रासादाः भारतीयवास्तुविज्ञान-शिल्प-मूर्ति-चित्रकलादीनां साक्षात् ज्ञानराशय एव सन्ति। निर्मितेषु देवप्रासादेषु भारतीयज्ञान-विज्ञान-सत्कर्मपरम्परा-धनसमृद्धि-सौन्दर्य-धर्मतत्त्वनिष्ठा-कालमीमांसा-धर्मचेतनादीनामपि दर्शनं सहजरूपेण भवति। धर्मानुकूलमाचरणं, समाजस्य ऐक्यं,पर्यावरणसंरक्षणम्,उत्सवादीनामायोजनं, श्रुति-स्मृति-पुराणविहितानि यज्ञानुष्ठानादीनि, दिव्य-दैवीयवातावरणञ्च देवमन्दिरेण नूनमेव भवति।

**निष्कर्षः-** शास्त्रेषु प्रतिपादितविधिना निर्मितानां प्रासादानां स्थितिः चिरकालादेव तिष्ठति। समाजे स्थापत्य- शिल्पविद्या-वास्तुशास्त्रज्ञानादीनां महत्ता प्रतिष्ठा च वर्धिता भविष्यति।

**केचन ज्ञातव्य-विषयाः-**

देवद्विजगुरुप्राज्ञ-पूजनं शौचमार्जवम्।<br>
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।<br>
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।<br>
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।<br>
मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।<br>
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।

-श्रीमद्भगवद्गीता

# ग्रहगतेः सैद्धान्तिकसमीक्षणम्

**श्रीकुन्दनकुमारझाः**
सहायकाचार्यग्रेड(ज्योतिषविभागः)
के.सं.वि.वि.श्रीरणवीरपरिसरः जम्मू

**प्रस्तावना**

आकाशे दृश्यमानानां ज्योतिष्पिण्डानां मध्ये ग्रहाः गतिमन्तः भवन्ति, नक्षत्राणि तु स्थिराणि। ग्रहाणां गतिः, तस्याः स्वरूपं, मार्गः, परस्परसम्बन्धः तथा नियन्त्रकशक्तिः इति विषयाः प्राचीनकाले एव भारतीयखगोलशास्त्रे गम्भीरतया विचारिताः। आधुनिकविज्ञानेनापि एते प्रश्नाः समाधानं प्रापिताः, किन्तु प्राचीनभारतीयसिद्धान्तानां योगदानं महत्त्वपूर्णम् अस्ति।

**उद्देश्यम्-**

अस्मिन् शोधे भारतीयप्राचीनग्रन्थेषु (वेदाङ्गज्योतिषे, सूर्यसिद्धान्ते, आर्यभटीये, सिद्धान्तशिरोमणौ च) वर्णितानां ग्रहगतिसिद्धान्तानां सैद्धान्तिकं समीक्षणं कृत्वा ग्रहाणां गतेः स्वरूपं, दिशां, प्रकारान् तथा गणितीयमानानि स्पष्टीकर्तुम् प्रयत्नः कृतः अस्ति।

**मुख्यविषयाः-**

1. ग्रह-नक्षत्रभेदः- "गच्छति इति ग्रहः", "न क्षरति इति नक्षत्रम्" इति परिभाषया ग्रहाणां गतिमत्त्वं नक्षत्राणां च स्थिरत्वं प्रतिपादितम्। ग्रहाः प्रवहवायोः प्रभावेन पश्चिमाभिमुखं दृश्यन्ते, किन्तु स्वीयया पूर्वाभिमुख्यागत्या दीर्घकालीनं स्थानपरिवर्तनं कुर्वन्ति।

2. ग्रहगतीनामष्टविधत्वम्- (सूर्यसिद्धान्तानुसारम्)- वक्रा, अतिवक्रा (अनुवक्रा), विकला (कुटिला), मन्दा, मन्दतरा, समा, शीघ्रा, अतिशीघ्रा (शीघ्रतरा) इति अष्टविधाः गतयः। एतासु पञ्च ऋजुगतयः (मार्गी) तथा तिस्रः वक्रगतयः।

3. दैनिकगतिः तथा दिशा- आर्यभटेन, भास्कराचार्येण, कमलाकरभट्टेन च प्रतिपादितम् यत् ग्रहाः दैनिकं पश्चिमाभिमुखं दृश्यन्ते किन्तु वास्तविकं पूर्वाभिमुखं गच्छन्ति। एतत् कुलालचक्रे कीटदृष्टान्तेन भास्कराचार्येण सुन्दरं स्पष्टीकृतम्।

4. कक्षाक्रमः- भूमेः अनन्तरं चन्द्रः, बुधः, शुक्रः, सूर्यः, मङ्गलः, बृहस्पतिः, शनिः, नक्षत्रमण्डलञ्च। कक्षादूरीनां भेदात् कोणात्मकदैनिकगतौ भिन्नता भवति।

5. गतिहेतवः- शीघ्रोच्च-मन्दोच्च-पाताः ग्रहगतेः मुख्यकारणानि। मन्दोच्च-शीघ्रोच्च-बिन्दू पूर्वाभिमुखं, पाताः तु विलोमगत्या (पश्चिमाभिमुखं) चरन्ति।

6. गणितीयमानानि- कल्पीयभगणाः, दैनिकगतिः(अंश/दिन), भगणपूर्तिदिवसाः तथा पृथिव्याः दूरी (योजनेषु) इति भास्कराचार्यकृतायाः तालिकायाः उल्लेखः कृतः। चन्द्रस्य गतिः १३.१७६ अंश/दिन, सूर्यस्य ०.९८५ अंश/दिन इत्यादयः।

**7. चन्द्र-सूर्यगतिविशेषवर्णनम्-**

चन्द्रस्य गतिः शीघ्रा (२७.३२२ दिने नक्षत्रभ्रमणम्), असमानगतिः च। सूर्यस्य गतिः नक्षत्रसापेक्षं ज्ञातव्या, सायन-निरयनवर्षमानानाञ्च विवेचनम्।

**विषयोपस्थापनम्-**

तमोमयी-रात्रौ आकाशं प्रति दृष्टिं कृत्वा विभाव्यन्ते ज्योतिरस्नानाः अनेके पिण्डाः। तेषु कश्चिदपि ग्रहपिण्डः अस्ति तथा कश्चित् नक्षत्रपिण्डः अस्ति। 'न क्षरति इति नक्षत्रम्' एवं 'गच्छति इति ग्रहाः' इति नियमाधारेणैव एषां ज्योतिःपिण्डानां स्थिरपिण्डाः नक्षत्रपिण्डाः, तथा गतिमान् एवं चलायमान्-पिण्डाः ग्रहपिण्डाः। एते चलपिण्डाः आकाशे कं मार्गं अनुसरन्ति? एषां गत्योः स्वरूपं किमस्ति? तथा एषु परस्परं सम्बन्धः कः अस्ति? प्रकृतेः का शक्तिः एषां गतिं नियन्त्रयति? तस्य नियन्त्रणस्य स्वरूपं किमस्ति? इत्यादयो विविधाः प्रश्नाः अपि गम्भीरतां पुरस्कृत्य निरन्तरं विचार्यमाणाः सन्ति। आधुनिके युगे वैज्ञानिकाः एषु प्रश्नेषु स्वविचारान् उपस्थाप्य उत्तमनिष्कर्षमानेतुं प्रति प्राप्नोतितुं यत्नशीलाः सन्ति। आकाशीयपिण्डानां गत्याः अध्ययनं चिरकालात् प्रचलितं अस्ति। प्राचीनैः सिद्धान्तैः अवलोक्यते यत् प्रवहवायोः प्रभावेणैव ग्रहनक्षत्राणां भ्रमणं भवति। इयं तयोः स्वाभाविकी गतिः नास्ति, यतः ते आत्मनः स्थानं न परिवर्तयन्ति। किन्तु अनयोः ग्रहाः परिवर्तनशीलाः भवन्ति। ते पूर्वाभिमुख्या गत्या आत्मनः स्थानं परिवर्तयन्ति। अस्मात् कारणात् ग्रहेषु गतिमत्वात् ग्रहत्वं सिद्ध्यति।

वैदिके काले प्रसङ्गवशात् नैव कदापि ग्रहगतेः विवरणं लभ्यते। किन्तु वैदिककाले एव यज्ञादिकृत्येषु पूर्णिमा-अमावास्ययोः विशेषप्रधानता आसीत्। सूर्यचन्द्रयोः गतिः एव तिथीनां ज्ञानस्य कारणं भवति। अस्य ज्ञानस्य विना पर्वज्ञानं न सम्भवति। अतः वैदिककाले वैदिकर्षयः सूर्यचन्द्रगतयोः ज्ञानं प्राप्तवन्तः आसन्। तस्य विस्तृतं विवेचनं वेदाङ्गज्योतिषे लभ्यते। खगोलीयपदार्थानां स्थितिः तेषां गतयोः नियमित्वं ऋतु-परिवर्तनं वर्षमासदिनादीनां कालविभागे सूर्यचन्द्रगतयः अवलोकनं एव आधारितम् अस्ति। ज्योतिषशास्त्रे ग्रहगतेः विशेषप्रयोजनं उक्तम् अस्ति। गतिज्ञानस्य विना ग्रहस्पष्टीकरणं न कर्तुं शक्यते। सूर्यसिद्धान्ते भौमादिपञ्चताराग्रहाणां वक्रा- अनुवक्रा- कुटिला- मन्दा- मन्दतरा- समा- शीघ्रतरा- शीघ्रा इति अष्टविधाः गतयः वर्णिताः सन्ति। तद्यथा-

**वक्राऽतिवक्रा विकला मन्दा मन्दतरा समा।**
**तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः ।।**[1]

अस्मिन् परिप्रेक्ष्ये ग्रहाणां अष्टविध- गतेः विशिष्टतां दृष्ट्वा इदं ज्ञातुं शक्यते यत् अतिशीघ्रा, शीघ्रा, तथा मन्दा- मन्दतरा एतौ समौ स्तः। अस्मात् कारणात् पञ्च ऋज्वी गतयः सन्ति, एताः मार्गी-गतयः भवन्ति। वक्रा- अनुवक्रा- कुटिला च एते त्रयः वक्रगतयः सन्ति। यथा सूर्यसिद्धान्ते वर्णितम्-

अस्य सिद्धान्तस्य विश्लेषणं न केवलं विज्ञानस्य क्षेत्रे अपितु खगोलविज्ञानस्य तथा ज्योतिषस्य विकासे अपि महद् योगदानं दत्तम् अस्ति।

---

1. सूर्यसिद्धान्तः स्पष्टाधिकारः श्लोकः-12

**तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरा समा।**
**ऋज्वीति पञ्चधा ज्ञेया या वक्रा सातिवक्रगा।।** [2]

ग्रहाः नक्षत्राणि च तेषां दैनिकगतिवशात् पूर्वतः पश्चिमं प्रति गच्छन्तः दृश्यन्ते। आर्यभटः स्वस्य आर्यभटीय ग्रन्थे ग्रहाणां पश्चिमाभिमुखगति-विषये उक्तवान्।

आर्यभटः महान् गणितज्ञः तथा खगोलशास्त्री आसीत्। यस्य सिद्धान्ताः अद्यापि प्रासङ्गिकाः सन्ति। तेन आकाशीय-पिण्डानां गतयः, सौरमण्डलस्य रूपरेखा सुव्यक्तरूपेण विवेचिता। तद्यथा-

**अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।**
**अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।।** [3]

वस्तुतस्तु दैनिकगतेः विपरीता पूर्वाभिमुखी गतिः अस्ति। यत् पूर्वदिशां प्रति गच्छन्ति। अस्मिन् भूमण्डले ग्रहाः प्रवहवायोः प्रभावेन, नक्षत्रैः सह शीघ्रगत्या पश्चिमदिशां प्रति गच्छन्ति। परन्तु नक्षत्राणां अपेक्षया ग्रहाणां पूर्वदिशां प्रति गमनं भवति। एवं ज्ञायते यत् प्रवहवायोः विनापि ग्रहेषु पूर्वाभिमुखी गति अस्ति। अस्मिन् विषये कमलाकरभट्टः सिद्धान्ततत्त्वविवेके उक्तवान्-

**प्रत्यग्भ्रमेण प्रवहानिलस्य भ्रमत्यपि द्राक् सखगे भचक्रे ।**
**तदल्पगत्येन्द्रदिशं चरन्ति स्वमार्गगास्ते खचराः सदैव।।** [4]

ग्रहाणां गतिः स्पष्टतया दृष्टिगोचरमपि कर्तुं शक्यते। यथा केनचित् जनेन कश्चित् ग्रहं केनचित् नक्षत्रेण सह प्रातःकाले उदयक्षितिजे दृष्टः, तथा द्वितीये दिने अपि तस्मिन्नेव काले पुनः वेधं कृत्वा पश्यति यत् नक्षत्रस्य उदयानन्तरं ग्रहस्य उदयः जातः अस्ति। अपि च पूर्वदिवसे तयोः उदयः सहैव जातः। अनेन सिद्ध्यति यत् ग्रहाणां पूर्वाभिमुखी गतिः अस्ति। विषयेस्मिन् सूर्यसिद्धान्ते अपि उक्तं यत्-

**पश्चात् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः ।**
**जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः ।।**
**प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः ।**
**परिणाहवशाद्भिन्ना तद्वशाद्भानि भुञ्जते ।।**
**शीघ्रगस्तान्यथाल्पेन कालेन महताल्पगः ।।** [5]

अस्मिन परिप्रेक्ष्ये भास्कराचार्येण अपि स्वस्मिन् ग्रन्थे "सिद्धान्तशिरोमणि" गोलाध्याये ग्रहाणां पूर्वाभिमुखगतिं दृष्टान्तमाध्यमेन उक्तम् अस्ति।

**यान्तो भचक्रे लघुपूर्वगत्या खेटास्तु तस्यापरशीघ्रगत्या।**
**कुलालचक्रभ्रमिवामगत्या यान्तो न कीटा इव भान्ति यान्तः।।** [6]

---

2. सूर्यसिद्धान्तः स्पष्टाधिकारः श्लोकः-13
3. आर्यभटीयम्, गोलपादः श्लोकः-9
4. सिद्धान्ततत्त्वविवेक, मध्यमाधिकार, श्लोक-22
5. सूर्यसिद्धान्तः, मध्यमाधिकारः श्लोकः-25-26
6. सिद्धान्तशिरोमणि गोलाधिकार मध्यगतिवासना श्लोक 4

भारतीयाचार्यैः ग्रहाणां कक्षायाः दूरीक्रमेण विवरणं प्रदत्तम् अस्ति। भास्कराचार्येण अपि स्वस्मिन् ग्रन्थे "सिद्धान्तशिरोमणि" इत्यस्मिन् ग्रहाणां कक्षाक्रमस्य विषये उद्धृतम् अस्ति।

**भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षाः ।**
**वृत्तैर्वृत्तो वृत्तः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्** ।।[7]

अर्थात् मृतिका- वायु- जल- आकाश- तेजतत्त्वैः निर्मितः एषः भूपिण्डः अनुक्रमेण चन्द्रमाः, बुधः, शुक्रः, सूर्यः, मंगलः, बृहस्पतिः, शनैश्चरः च नक्षत्राणां कक्षायाः वृत्तैः परिवृतः अस्ति। कस्यचित् ग्रहस्य कक्षा बृहती अस्ति तथा कस्यचित् क्षुद्राः कक्षा अस्ति। समेषामपि ग्रहाणां योजनमानं तुल्यम् अस्ति। यद्यपि ग्रहकक्षायाः कलादीनां मानं भिन्न-भिन्नं भवति। एतसमादेव कारणात् ग्रहाणां शीघ्राः तथा मन्दा गतयो भवन्ति। पृथिव्याः चतुर्दिक्षुः ग्रहाः आत्मनः वृत्ताकारे पथं समानं कालं समानं दूरीं च चरन्ति। एतेन एव कारणेन, पृथिव्याः समीपे यः ग्रहः अस्ति तस्य कोणात्मिका दैनिकी गतिः तावत् न्यूना अस्ति, तथा यः ग्रहः यावत् दूरम् अस्ति तस्य कोणात्मिका दैनिकी गतिः तावती अधिका अस्ति। तद्यथा भास्कराचार्येण उक्तम्-

**समा गतिस्तु योजनैर्नभः सदां सदा भवेत्।**
**कलादिकल्पनावशान्मृदुर्द्रुता च सा स्मृता**।।[8]
**'शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः''** [9]

उपर्युक्तस्य अस्य नियमस्य अधारेण खगोलशास्त्रे क्रान्तिवृत्ताश्रिताः शीघ्रोच्च-मन्दोच्च पातादिकाः कालस्य अदृश्याः मूर्तयः ग्रहाणां गतौ कारणीभूताः भवन्ति। एकस्मिन् कल्पे पूर्वाभिमुखं गच्छतां ग्रहाणां यावत् भगणाः भवन्ति, ते सर्वे आचार्येभिः स्वग्रन्थेषु उद्धृताः सन्ति। शीघ्रगतिकाः ग्रहाः अल्पकालेन तथा मन्दगतिकाः ग्रहाः अधिकेन कालेन राशीनां भोगं कुर्वन्ति। अश्विनीनक्षत्रस्य आदितः रेवतीनक्षत्रस्य अन्तं यावत् क्रान्तिवृत्ते स्थित-द्वादशराशीनां भोगं भचक्रभोगं वा ग्रहभगणं इति कथ्यते। ६० विकलायाः एका कला, ६० कलानां एकः अंशः, ३० अंशानां एकः राशि, तथा १२ राशीनां एकः भगणः भवति।[10] तद्यथा-

**विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।**
**तत् त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते।।**

महायुगीयभगणान् सहस्रेण गुणयित्वा कल्पीयभगणः कृतः भवति, यतः सहस्रमहायुगानां एकः कल्पः भवति। सूर्यसिद्धान्ते कल्पीयः सूर्यादिग्रहाणां भगणाः निम्नलिखिताः सन्ति- रविः, बुधः, शुक्रः= ४३२००००००, चन्द्रः= ५७७५३३३६०००, मङ्गलः= २२९६८३२०००, बुधः = १७९३७०६००००, गुरु = ३६४२२००००, शुक्रः = ७०२२३७६०००, शनि = १४६५६८००० इत्यादिकाः भगणाः पठिताः सन्ति।

7. सिद्धान्तशिरोमणि गोलाधिकार भुवनकोश श्लोक 2 अ
8. सिद्धान्तशिरोमणि मध्यमाधिकार श्लोक 26
9. सूर्यसिद्धान्तः स्पष्टाधिकारः श्लोकः 1
10. सूर्यसिद्धान्तः मध्यमाधिकारः श्लोकः 18

इयं तु व्याख्यारूपेण खलु सत्यं यत् ग्रहाणां मन्दोच्च-शीघ्रोच्च शक्तिपुञ्जाः अपि स्वीयया गत्या पूर्वाभिमुखं गच्छन्ति। मन्दोच्चानां स्थानं प्रायः मन्दगत्या चरन्ति। अपि च शतशः वर्षाणां अपि तेषां गतिं ज्ञातुं कठिनं भवति। एकस्मिन कल्पे पूर्वाभिमुखं गच्छतां सूर्यादिग्रहाणां मन्दोच्चानां भगणसंख्या एवं अस्ति- सूर्यस्य ३७८, मङ्गलस्य २०४, बुधस्य ३६८, गुरोः ९००, शुक्रस्य ५३५, शनेश्चरस्य ३९ मन्दोच्चाः सूर्यसिद्धान्ते पठिताः सन्ति। एवं भगण मार्गवृत्तस्य तथा राशिवृत्तस्य सम्पातबिन्दुं यत् पात इति कथ्यते। 'पातानां वामतो गतिः' इति कथनं यत् सम्पातचलनं कुर्वन् पूर्वाभिमुखं न गच्छति किन्तु पश्चिमाभिमुखं गच्छति। अतः एतत् विलोमगतिकः इति कथ्यते। गणितागतः पातः यदा द्वादशराशिषु विशोध्यते तदा सः वास्तविकः पातः भवति। पश्चिमाभिमुखं गच्छतां भौमादिग्रहाणां पातानां भगणसंख्या एवं अस्ति - मङ्गलस्य २१४, बुधस्य ४८८, गुरोः १७४, शुक्रस्य ९०३, शनिश्चरस्य ६६२ पातभगणाः पठिताः सन्ति।

ग्रहाणां दैनिकगतिं ज्ञातुं कल्पे ग्रहभगणानां ज्ञानं परमावश्यकं भवति। ग्रहाणां भगणैः एव ग्रहाणां दैनिकगतिः साध्यते। ग्रहाणां दैनिकगतिं ज्ञातुं त्रैराशिकगणितस्य अनुपातेन साध्यते। यदि कल्पे दिनसंख्यायां कल्पे ग्रहभगणाः प्राप्ताः भवन्ति, तदा एकस्मिन् सावनदिने किं? फलतः ग्रहस्य दैनिकगति प्राप्ता भवति। यथा -

सूर्यस्य एकस्मिन् दिने गतिः कियत् अस्ति? अस्य ज्ञानाय (4320000000 × 1) / (15779116450000) = 0/59/8/10/21। एतत् अंशादिकं एकस्मिन् दिने रविगतिः भवति। एतत् एव प्रकारेण अन्येषां ग्रहाणां भगणैः तेषां दैनिकगति सिद्ध्यते।

निम्नलिखिता तालिकायाः अनुसारं ग्रहाणां गतिः, भगणपूर्तिदिवसः तथा पृथिव्याः दूरी भास्कराचार्येण कल्पिता कक्षाक्रमेण प्रदत्तः -

| **ग्रहः** | **गति (अंश/दिन)** | **भगणपूर्तिदिवसः** | **पृथिव्याः दूरी (योजन)** |
|---|---|---|---|
| चन्द्रः | 13.1763583 | 27.322 | 51566 |
| बुधः | 4.09233871 | 87.969 | 1643893.93 |
| शुक्रः | 1.60213057 | 224.708 | 4199015.24 |
| सूर्यः | 0.9856091 | 365.256223 | 6825596.25 |
| मङ्गलः | 0.52403299 | 686.979 | 12837685.33 |
| गुरुः | 0.08309127 | 4332.561 | 80963629.34 |
| शनिः | 0.03345967 | 10759.221 | 20105908.15 |

**चन्द्रगतिः** - आकाशीय-पिण्डेषु चन्द्रस्य गतिं निर्दिष्टुं सरलम् अस्ति यतः अन्यग्रहाणां तुलनायां अतीव शीघ्रगत्या चरति। आकाशे पश्चिमतः पूर्वं प्रति चलन् एषः केवलं २७.३ दिनेभ्यः स्वल्पकाले एव नक्षत्रमण्डलस्य एकं चक्रं परितः चलति। परिणामस्वरूपेण २४ घण्टेषु एषः १३ डिग्री १० मिन्नट् इति लगभग चरति। अतः प्रत्येकघण्टे एषः स्थानपरिवर्तनं दृष्टुं शक्यते। प्रतिदिनं चन्द्रमसः गतिः निरीक्ष्य

एतत् ज्ञातुं शक्यते यत् एषः दैनिकगति समानः नास्ति। आकाशस्य कस्मिंश्चित् प्रदेशे एषः शीघ्रगत्या चरति, अन्यत्र न्यूनगत्या। न्यूनतमा गतिः ११ डिग्री, अधिकतमा गतिः १५ डिग्री, ५० मिनट भवति।

**रविगतिः** - दिनदर्शक तारकाणां सापेक्षेण सूर्यस्य गतिं निर्दिष्टुं न शक्यते, यतः सूर्येण सह कश्चन नक्षत्रः न दृष्टिगोचरः भवति। किन्तु सूर्यास्तस्य अनन्तरं पश्चिमक्षितिजे कस्यचित् नियतकालस्य तारकस्य उन्नतिं नापयित्वा, किञ्चित् दिनानां अनन्तरं पुनः तस्मिन्नेव तारके कोणात्मक उन्नतिं नापयित्वा, पश्चिमक्षितिजे तस्य तारकस्य उन्नतिः न्यूनाः, पूर्वक्षितिजे च अधिकाः प्राप्ताः भवति। अस्य तात्पर्यम् यत् सूर्यः तारकाणां सापेक्षेण पश्चिमतः पूर्वं प्रति गच्छति। किञ्चित् दिनानां निरीक्ष्य एतत् दृष्टुं शक्यते यत् पश्चिमक्षितिजे यः तारः सूर्येण सह ऊर्ध्वतः दृष्टः आसीत्, सः इदानीं क्षितिजं त्यक्त्वा उपरि गतः अस्ति, अन्यः तारा तस्य स्थानं गृहीतवान् अस्ति। एवं तारकाणां सापेक्षेण सूर्यस्य गतिः ज्ञाता भवति।
सूर्यः क्रान्तिवृत्तस्य पूर्णचक्रम् अर्थात् ३६० अंशानाम् लगभग ३६५.२५ दिनेभ्यः समाप्तिं प्राप्नोति, किन्तु चन्द्रमस्य गतिरिव तस्यापि गतिः समानः न भवति। जून-जुलाई मासयोः मन्दगत्या चरति, दिसम्बर-जनवरी मासयोः शीघ्रगत्या च। परिणामतः सूर्यः पूर्वमासेषु ३० दिनानां मध्ये २७.५ अंशं च तथा अनन्तरमासेषु २९.५ अंशं चरति। चन्द्र-सूर्ययोः गतिः ज्ञातुं सर्वप्रथम चान्द्रमासानां लम्बित्वं सावनदिनैः ज्ञात्वा चान्द्रमासेभ्यः सौरमासानां अपि लम्बित्वं कर्तुं शक्यते। कोणमापनविधिना चन्द्र-सूर्ययोः वेधैः चान्द्रमासानां सौरवर्षाणां च आकलनं कृत्वा वास्तविकतायाः समीपं प्राप्यते।

कोणमापनविधिना सर्वप्रथमं मध्याह्नकाले सूर्यस्य नतांशाः याम्योत्तरवृत्ते आनेतव्याः। ततः स्वस्थानस्य अक्षांशेन (यः ध्रुवतारकस्य कोणात्मकं मानं भवति) तस्य अन्तरं ज्ञातव्यम्। अस्य नाम रविक्रान्तिः इति कथ्यते। यतः सूर्यः विषुवद्वृत्तस्य क्रान्तेः तुल्यम् मध्याह्ने उत्तरदक्षिणे भविष्यति। यदा सूर्यः विषुवद्वृत्तस्य उत्तरदिशि भविष्यति, तदा उत्तराक्रान्तिः तथा दक्षिणदिशि भविष्यति तदा दक्षिणा क्रान्तिः भवति। किन्तु एषा क्रान्तिः प्रतिदिनं परिवर्तनशीलः अस्ति। कश्चित् दिनं भवति यदा क्रान्तिः घटतः अक्षांशस्य तुल्यः नतांशः उत्पादयति अर्थात् मध्याह्नकाले नतांशः स्थानीय-अक्षांशस्य तुल्यो भवति। तस्मिन् दिने अक्षांशः नतांशस्य अन्तरं शून्यं भविष्यति। अतः रविक्रान्तिः अपि शून्यं भविष्यति। तद् दिनं विषुवद् दिनं कथ्यते। यतः तस्मिन् दिने सूर्यस्य दैनिकभ्रमणं विषुवद्वृत्ते एव भवति।

वेदाङ्गज्योतिषे रविवर्षस्य मानं ३६६ दिनानि निर्दिष्टानि। पितामहसिद्धान्ते तस्मात् सूक्ष्मः ३६५ दिनानि ३५ घटिकाः निर्दिष्टाः, किन्तु मानद्वयमपि वास्तविकतायाः दूरे वर्तते। वास्तविकं सौरवर्षं नक्षत्राणां वेधात् एव ज्ञातुं शक्यते। अर्धरात्रे काचित् तारा याम्योत्तरलंघनं करोति चेत्, तां तारिकां वेधं कृत्वा प्रतिदिनं तस्य याम्योत्तरलंघनकालं दृष्ट्वा अंकनीयम्। एवं ३६५ दिने यदा सा तारा अर्धरात्रौ याम्योत्तरलंघनं करोति, तदा तस्य कालः लेखनीयः। अन्यदिने, ३६६ दिने यदा अर्धरात्रे पूर्वं तस्य याम्योत्तरलंघनं भवति, तदा तं कालं अपि लेखनीयम्। तदनन्तरं तयोः कालयोः योगं कृत्वा, तस्मिन् अनुपातेन वर्षमासदिनानां यः मानः भविष्यति, सः ३६५ दिनेभ्यः संयुज्यते, सः सावयवः रविनक्षत्रवर्षस्य दिनात्मकं मानं भवति। सूर्यसिद्धान्ते रविनक्षत्रवर्षस्य मानः ३६५ दिनानि १५ घटिकाः ३१.५ पलानि इति

निर्दिष्टम् अस्ति। भास्कराचार्येण मानमिदं ३६५ दिनानि, १५ घटिकाः, ३० पलानि, २२ विपलानि, ३० प्रतिविपलानि इति निर्दिष्टमस्ति। किन्तु तेन मानमिदं सूर्योदयवेधशात् लब्धः, यः अग्राणां अन्तरात् लब्धः सायनवर्षमानं भविष्यति। ब्रह्मगुप्तेन अपि सायनमानम् एव अनुमतम् अस्ति।

अनेन प्रकारेण उपरोक्तेन विवेचनेन ज्ञायते यत् ग्रहाणां नक्षत्राणां च गतिमानयोः भेदः अस्ति, यस्मात् ते आकाशीय-परिमण्डले विभिन्नस्थितिं दर्शयन्ति। सकलब्रह्माण्डे प्रवहवायुः विद्यमानः अस्ति, यस्मात् ग्रहाः नक्षत्राणि च चलायमानो दृश्यन्ते। नक्षत्राणि प्रवहवायोः एव गतिः कुर्वन्ति, तेषां स्वगतिः नास्ति। किन्तु ग्रहाः स्वल्पपूर्वाभिमुखी गत्या पश्चिमतः पूर्वं प्रति गच्छन्ति, सा गतिः तावत् न्यूनम् अस्ति यत् प्रायः चर्मचक्षुषा न दृश्यते। सर्वे पिण्डाः पश्चिमं प्रति गच्छन्तः दृश्यन्ते। अतः "गच्छति इति ग्रहः" तथा "न क्षरति इति नक्षत्रम्" इति परिभाषा उपर्युक्तसिद्धान्तविवेचनात् स्वतः दृष्टिगोचरो भवति।

**निष्कर्षः-**

भारतीयप्राचीनखगोलशास्त्रे ग्रहगतेः सूक्ष्मं निरीक्षणं, गणितीयसाधनञ्च आश्चर्यजनकम् अस्ति। प्रवहवायुः, शीघ्रोच्च-मन्दोच्च-पातसिद्धान्ताः, कक्षाक्रमः, भगणगणना च आधुनिकग्रहगतिसिद्धान्तानां (यथा केप्लरनियमाः) मूलभूतावधारणाः प्राचीनकाले एव विकसिताः इति दर्शयन्ति। एते सिद्धान्ताः न केवलं ज्योतिषस्य अपितु खगोलविज्ञानस्य विकासे महत्त्वपूर्णयोगदानं प्रदत्तवन्तः सन्ति।

## सुभाषितम्

यो दुःखितानि भूतानि दृष्ट्वा भवति दुःखितः।
सुखितानि सुखी चापि स धर्मात्मेति गीयते।

(विक्रमार्कचरित- १३/१७२)

अर्थात् जो व्यक्ति कष्ट में पड़े हुए प्राणियों को देखकर दुःखी होता है और सुखी व्यक्ति को देखकर प्रसन्न होता है, वह व्यक्ति धर्मात्मा उपाधि की धारण करने योग्य माना जाता है।

# वेदाङ्गज्योतिषे नक्षत्रजातकसम्बन्धिविमर्शः

- डॉ. उमेशकुमारपाण्डेयः
सहायकाचार्यः (सं)(ज्योतिष)
ज्योतिषशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊपरिसरः उ०प्र०

"द्यु" द्योतने धातोः निष्पन्नोऽयं ज्योतिषशब्दः। अयं वस्तुतः ग्रहनक्षत्रादीनां खगोलीयपिण्डानां कृते एव प्रयुज्यते । अतः ग्रहनक्षत्रादीनां विवेचकं शास्त्रं ज्योतिषशास्त्रमिति नाम। ज्योतिषशास्त्रस्योपयोगित्वं ग्रहनक्षत्राणां सर्वत्र द्रष्टुं शक्यते। धर्माचरणस्याधारभूताः वेदाः यज्ञादीनां सम्पादनार्थं प्रवृत्ताः। तत्र यज्ञादयोऽपि कालसापेक्षत्वात् तेषां सम्पादने ज्योतिषशास्त्रस्य (कालविधायकशास्त्रस्य) नितरामावश्यकता अभूत्। अतः शास्त्रमिदं वेदस्याङ्गभूतेनैव नापितु श्रेष्ठाङ्गत्वेन स्थानं प्राप्तवान्। उच्यते-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।**[1]

अपि च-

**यथा शिखा मयूराणां नागानां मणयो यथा।**
**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ।।**[2]

वेदानां संहितारचनाकाले महर्षिभिः आवश्यकतानुरूपं ज्योतिषशास्त्रसम्बन्धिनः तथ्याः विषयाः वेदाङ्गत्वेनैव वेदसंहितासु यत्र तत्र समायोजिताः आसन्। वेदाङ्गज्योतिषरचनाकाले महात्मना लगधेन वेदसंहितासु उपलब्धमानानां ज्योतिषतथ्यानां संग्रहणं कृत्वा वेदांगज्योतिषमित्यपि स्वतन्त्रग्रन्थः व्यरचि। सम्प्रति वेदाङ्गज्योतिषस्य त्रयः ग्रन्थाः प्राप्यन्ते। यथा- ऋग्ज्योतिषम्, याजुषज्योतिषम्, आथर्वणज्योतिषञ्च। तत्र ऋग्-यजुर्-ज्योतिषयोः तु कालनियामकाः सैद्धान्तिकाः विषयाः एव प्राप्यन्ते। परन्तु आथर्वणज्योतिषे फलितसम्बन्धिनः विषयाः सन्ति। तत्र नक्षत्राणामाधारेण जातकस्य शुभाशुभफलादेशसम्बन्धीनि तथ्यानि निरुपितानि सन्ति। तद्यथा- जन्मनक्षत्रात् तारामवगम्य तद्वशात् प्रतिपादितानि अथर्वणज्योतिषोक्तानि शुभाशुभफलानि इह उच्यते। तत्रादौ ताराणां नामानि-

**जन्मसम्पद्विपत्क्षेमप्रत्यरिसाधकस्तथा।**
**नैधनो मित्रवर्गश्च परमो मैत्र एव च ।।**[3]

अर्थात् जातकस्य जन्मनक्षत्रादारभ्य क्रमेण जन्म-सम्पत्, विपत्-क्षेम-प्रत्यरि-साधक-वध-

---

1. वेदांगज्योतिषम् (अथर्वज्योतिष श्लोक ३)
2. वेदांगज्योतिषम् श्लोक 5-
3. वेदांगज्योतिषम्,(अथर्वण ज्योतिष), श्लोक 8

मित्रातिमित्रसंज्ञकानि नक्षत्राणि भवन्ति। विशदतया भावस्यास्य स्पष्टता यथा-

**दशमं जन्मनक्षत्रात्कर्मनक्षत्रमुच्यते।**
**एकोनविंशतिश्चैव गर्भाधानमुच्यते ।।**
**द्वितीयमेकादशं विंशमेष स्पत्करो गणः ।**
**तृतीयमेकविंशं तु द्वादशं तु विपत्करम् ।।** [4]

**क्षेम्यं चतुर्थं द्वाविंशं तथा यच्च त्रयोदशम्।**
**प्रत्वरं पञ्चमं विद्यात् त्रयोविंशं चतुर्दशम् ।।**
**साधकं तु चतुर्विंशं षष्ठं पञ्चदशं च यत्।**
**नैधनं पञ्चविंशं तु षोडशं सप्तमं तथा ।।**
**मैत्रे सप्तदशं विद्यात् षड् विंशमिति चाष्टमम्।**
**सप्तविंशं परं मैत्रं नवमष्टादशं च यत्।।** [5]

अत्र सम्पत्-क्षेम-साधक-मैत्र-परममित्रसंज्ञकानि नक्षत्राणि शुभफलप्रदानि। तथान्यानि नक्षत्राण्यशुभफलप्रदानि भवन्ति। अतः जातकस्य एतेषां नक्षत्राणां सम्बन्धितगोचरकालं नक्षत्राणि चाधिकृत्य ग्रहाणां दशाऽपि जातकस्य कृते सौख्यप्रदाः उन्नतिकारकाश्च भवन्ति। इति।

जन्मनक्षत्राद् द्वितीयमेकादशं विंशतिः नक्षत्राणि सम्पद्वर्गे कथ्यन्ते। तृतीयं द्वादशमेकविंशं च नक्षत्राणि विपद्वर्गेऽभिधीयन्ते। चतुर्थं त्रयोदशं द्वाविंशं चेति नक्षत्राणि क्षेम्यवर्गे आयान्ति। पञ्चमं चतुर्दशं त्रयोविंशञ्च नक्षत्राणि प्रतिवर्गं समाख्यातानि। षष्ठं पञ्चदशं चतुर्विंशं-च नक्षत्राणि साधकवर्गे कथितानि। सप्तमं षोडशं पञ्चविंश च नक्षत्राणि नैधनवर्गे समुल्लिखितानि। अष्टमं, सप्तदशं षड्विंशञ्चेति नक्षत्राणि मैत्रवर्गे पठितानि सन्ति। परममैत्रवर्गे नवममष्टादशं सप्तविंशं नक्षत्राणि समायान्ति। ऐतेषां समेषां नक्षत्राणां गणना जन्मनक्षत्राद् भवति। वैखानसस्मार्तसूत्रे केवलं नक्षत्राणां पञ्चधा विभागो विहितः। जन्मकर्म सङ्घातिक-सामुदायिकवैनाशिकभेदात्। बृहद्यात्रायां वराहमिहिरेण प्रोक्तं यज्जन्मननक्षाद् दशमं नक्षत्रं कर्म भवति, षोडशं साङ्घातिकम्, अष्टादशं सामुदायिकं, त्रयोविंशं वैनाशिकं, पञ्चविंशञ्च मानसमभिधीयते। एवं षड्भिः नक्षत्रैः सम्बद्धाः मानवाः भवन्ति। राजानस्तु नवनक्षत्रैः सम्बद्धाः भवन्ति। वाराहमिहिररचितायां योगयात्रामुक्तमिदम्-

**जन्माद्यं कर्म ततो दशमं साङ्घातिकं च षोडशभम्।**
**समुदायमष्टादशभं विनाशसंज्ञं त्रयोविंशम्।।** [6]
**आद्यस्तु पञ्चविंशं मानसमेवं नरस्तु षड्क्षम्।**

4. वेदांगज्योतिष (आर्य ज्योतिष श्लोक ३)
5. वेदांगज्योतिष
6. वेदांगज्योतिष ( अथर्वण ज्योतिष )

**नवनक्षत्रो नृपतिस्स्वजातिदेशाभिषेकर्क्षैः।।** [7]

**जन्मभे नैधने चैव तथाधाने विपत्कटेरे ।**

**प्रत्यरो भगणे यात्रां प्रयत्नेन विवर्जयेत् ।।**

अथर्वणज्योतिषे कथितं यदाधाननैधनप्रत्यरिगणे जातकः क्षौरं, विवाहं, चिकित्साकर्म, यात्रां, सेनाप्रयाणं च न कुर्यात्। सर्वमंगलकार्येषु वर्जनीया एते नक्षत्रवर्गाः। विष्णुधर्मोत्तरपुराणकारेण अप्यभ्यधायि यत् निषिद्धानि कर्माणि यदि जातक एषु नक्षत्रेषु सम्पादयति तर्हि नितरां हानिरेव भवति।

जातकः स्वसम्पत् करनक्षत्रेषु विद्यारम्भं तपोदानं मार्जनं भैषज्यक्रियां सेवकभरणादिकृत्यं च सम्पादयेत्-[8]

**विद्यारम्भं तपोदानं मार्जनं भैषजक्रियाम्**

**भरणं च सुभृत्यानां कुर्यात्सम्पत्करे गणे।** [9]

अथवर्णज्यौतिषे लिखितं यद् यात्रारम्भः गोप्यार्थगोपनं वाहनानां पोषणमार्थिककृत्यानि च सक्षेम्यसंज्ञकनक्षत्रगणे जातको यदि कुर्यात्तर्हि निश्चप्रचमेव साफल्यं लभते।

**क्षेम्येऽध्वानं प्रपद्येत् गोप्यार्थाश्चात्र गोपयेत् ।**

**वाहनानि च पोषेत बहुषोडर्थाश्च योजयेत्।।**[10]

कदाचन प्रत्वरसञ्ज्ञकभेषु समेषां कार्याणामारम्भे शोभनो, न च दुर्गप्रवेशः कर्तव्यः-

**प्रत्वरे तु न कर्तव्याः सर्वारम्भाः कदाचन।**

**दुर्गं च न प्रवेष्टव्यं न च किञ्चित्समाचरेत्।।**[11]

शुभाकाङ्क्षी जातकः स्वप्रत्वरसंज्ञकेषु नक्षत्रेषु कार्यस्य कस्यचिदपि नारम्भं प्रकुर्यात्। एषु भेषु यानि कृतानि कार्याणि तानि न सिध्यन्ति।

**सुभाषितम्**

**न देवा दण्डमादाय रक्षन्ति पशुपालवत्।**

**यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम्॥**

अर्थात् - देवता किसी मनुष्य की रक्षा करने के लिए हाथ में लाठी लेकर किसी चरवाहे की तरह उसके पीछे नहीं घूमते हैं। वे जिसकी रक्षा करना चाहते हैं, उसे सही समय पर सही निर्णय लेने के लिए उत्तम बुद्धि (सद्बुद्धि) प्रदान कर देते हैं। बुद्धिमान व्यक्ति अपनी समझ का उपयोग करके अपनी रक्षा स्वयं कर लेता है।

---

7. वेदांगज्योतिष (आर्यज्योतिषश्लोक ३)
8. वेदांगज्योतिष
9. वेदांगज्योतिष( अथर्वणज्योतिष)
10. आथर्वण ज्योतिषे श्लोक १०४-१०९
11. वैखानशस्मार्त सूत्रके ४/१५

भास्करोदयः ISSN - 2278-0815

# ज्योतिषशास्त्रे हृदयरोगविचारः

**डॉ. श्रीमतीविनीतामिश्रा**
फलितज्योतिषाचार्या
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊपरिसरः, गोमतीनगरम्, लखनऊ-२२६०१०
E-mail:-mishravineeta674gmail.com

वेदार्थानामवबोधनाय वेदाङ्गानि[1] प्रादुर्भूतानि। ज्योतिषशास्त्रं तेषु अन्यतमं शास्त्रमस्ति। ज्योतिषशास्त्रस्य विविध-विषयाः संहिता-तन्त्र-होरारूपाः त्रिषु स्कन्धेषु समाहिताः।[2] यस्मिन् स्कन्धे ग्रहाणां समष्टिगतफलवर्णनमस्ति तस्य भागस्य संहिता संज्ञा, यस्मिन् भागे विविधगणितवर्णनं विद्यते तस्य भागस्य सिद्धान्तसंज्ञा, यत्र वैयक्तिकं शुभाशुभफलवर्णनं प्राप्यते तस्य स्कन्धस्य नाम होरास्कन्ध इति संज्ञा कृता विद्यते। अनेन प्रकारेण ज्योतिषशास्त्रस्य त्रिस्कन्धाः- संहिता-तन्त्र-होरेति नाम्ना शास्त्रेषु विख्याता विद्यन्ते। ज्योतिषशास्त्रे फलादेशक्रमे द्वादशभावानां माध्यमेन सम्पूर्णस्यापि जीवनस्य शुभाशुभफलविचारो भवति। तत्र रोगस्य विचारः षष्ठाष्टमद्वादशभावेभ्यः एवञ्च तत्र स्थितेभ्यः ग्रहेभ्यः तत्तत् स्थितेभ्यः राशिभ्यः क्रियते। अतः यस्य अङ्गस्य सबलत्व-निर्बलत्व-रोगादिविचारश्च अपेक्षितो भवति तत्सन्बन्धितभावस्य ग्रहस्य च विचारः नूनमेव कर्तव्यः।

तत्र जगत्स्रष्टुः ब्राह्मणः मनसः चन्द्रस्य, अक्ष्णोः सूर्यस्य उत्त्पतिः संजाता। ततः ब्रह्मणः पञ्चमहाभूतानामुत्त्पतिः संजाता। तत्र पञ्चमहाभूतेभ्यः भौमादिपञ्चताराग्रहाणामुत्पत्तिः संजाता। यथा-तेजसः भौमस्य, बुधस्य भूतत्त्वेन, गुरोः आकाशतत्त्वेन, शुक्रस्य जलतत्त्वेन, शनेः वायु तत्त्वेन उत्पत्तिः समजायत। तत्र सर्वेष्वपि पिण्डेषु पञ्चभूतानां संमिश्रणम् अस्ति। मानवशरीरमपि पञ्च भूतानां सम्मिश्रणं अस्ति। अत एव सर्वेषां ग्रहाणां प्रभाव अस्माकं शरीरे अवश्यमेव भवति।[3] ज्योतिषविज्ञानमिदं मानवजीवनस्य अतीत-वर्तमान-भविष्यत्-घटनानाम् आधारभूतं विज्ञानमस्ति। अनेन शास्त्रमाध्यमेन मानवानां सकल-समस्यानां समाधानं सम्यक्तया कर्तुं शक्यते। मानवानां शारीरिकीसमस्या भवतु मानसिकी समस्या वा, दैवजरोगाः भवन्तु कर्मजरोगाः वा सर्वत्र समाधानं नाम ज्योतिषशास्त्रम्।

---

1. छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षु निरूक्तं श्रोत्रमुच्यते।।
   शिक्षाघ्राणं तु वेदस्य मुख्य व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।
   पाणिनिशिक्षायाम् श्लोक -४१-४२
2. ज्योतिषः शास्त्रमनेक भेद विषयं स्कन्धत्रयाधिष्ठितं
   तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
   स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
   होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।। बृहत्संहिता- उपनयनाध्यायः श्लोकः - १
3. अग्नोसोमौ भानुचन्द्रौ तत्स्वङ्गारकादयः।
   तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्चजज्ञिरे ।। सूर्यसिद्धान्तः भूगोलाध्यायः श्लोकः - २४

अत्र प्रकृतविषयमनुसरन् ज्योतिषशास्त्रे हृदयरोगविषये विचार्यते। कस्यां परिस्थितौ जातकः हृदयरोगेन प्रपीडितो भवति? इत्यस्य विचारः अस्य शोधलेखस्य प्रमुखो विषयः। कस्यचिदपि रोगस्य अन्वेषणात्पूर्वं कालपुरुषस्य अङ्गविभागेन सह परिचयः परमावश्यकः। कालपुरुषस्य येन राशिना सह यस्य अङ्गस्य संबन्धः भवति सः राशिः शुभाशुभग्रहैः प्रभाविते सति तस्य अङ्गविशेषस्य कृते सबलत्वस्य दुर्बलत्वस्य च निर्द्धरणं करोति। शुभप्रभाविते सति तद्राशिसम्बन्धितमङ्गं सबलमन्यथा दुर्बलमवगन्तव्यम्।

**कालपुरुषस्य मेषादिद्वादशराशिक्रमेण अङ्गविभागाः-**

मेषादयो द्वादशराशयः कालपुरुषस्य शीर्ष-मुख-बाहु-हृदयादयो द्वादशअवयवाः विचारिताः सन्ति। यथा-मेषराशिः कालपुरुषस्य शीर्षस्थानीयः राशिः। तद्वदेव वृषराशिः मुखस्थानीयः, मिथुनराशिः बाहुस्थानीयः, कर्कराशिः हृदयस्थानीयः, इत्थम् अग्रे उदर-कटि-वस्ति-गुह्य-उरु-जानु-जङ्घे-चरण-आदि-अवयवेषु अवशेषाः राशयः परिकल्पिताः सन्ति। उदाहरणं यथा- कर्कराशिः कालपुरुषस्य हृदयं भवति।[4] जन्माङ्गे यदि कर्कराशिः पापाक्रान्तो भवति तदा तस्य जातकस्य कालान्तरे हृदयं रोगाक्रान्तं भवति।

एवमेव ज्योतिषशास्त्रे जातकस्य रोगान्वेषणार्थं षष्ठभावः तदधिपतिश्च अवलोकनीयः। षष्ठभावात् रोगविचारः क्रियते। ग्रहेषु सूर्यः हृदयकारको ग्रहः वर्तते। सूर्यस्य केतुना सह संयुतिः जातकस्य हृदयकम्पनं करोति।

**द्रेष्काणात् कालावयवस्य (जातकावयवस्य)ज्ञानम्-**

राशित्रिभागो द्रेष्काणः इति कथ्यते। शून्य ० अंशात् १० अंशाभ्यन्तरे द्रेष्काणस्य प्रथमो भागः, तदग्रे २० अंशाभ्यन्तरे द्वितीयो भागः, तदग्रे राश्यन्तं यावत् तृतीयो भागः। ग्रहः लग्नं वा यदि प्रथमे भागे तिष्ठति तदा स राशिः एव द्रेष्काणराशिः भवति, द्वितीये भागे यदि तिष्ठति तदा स्वराशितः पञ्चमराशिः द्रेष्काणराशिः भवति। यदि तृतीये भागे तिष्ठति तदा स्वराशितः नवमराशिः द्रेष्काणराशिः भवति। तद्वदेव शरीरं त्रिधा विभज्य एकैकस्मिन् भागे द्वादश-द्वादशराशिनां स्थापनां विधाय तत्र-तत्र शरीरावयवेषु रोगानुमानं कर्तव्यम्।

अर्थात् जन्मसमये यदि लग्ने प्रथम द्रेष्काणः स्यात् तदा लग्न मस्तकं भवति, द्वितीय-द्वादशभावौ क्रमशः दक्षिण-वामनेत्रे, तृतीय-एकादशभावौ क्रमशः दक्षिण-वामकर्णौ, चतुर्थ-दशमभावौ क्रमशः दक्षिण-वामनासिके, पञ्चम-नवम-भावौ क्रमशः दक्षिण-वाम-कपोलौ, षष्ठाष्टमभावौ क्रमशः दक्षिण-वामहनू, सप्तमभावः मुखं द्योतयति।

यदि लग्नं द्वितीयद्रेष्काणे भवेत्तदा लग्नं ग्रीवा, द्वितीयद्वादशभावौ क्रमशः दक्षिण-वामस्कन्धे. तृतीय-एकादशभावौ क्रमशः दक्षिण-वामहस्तौ, चतुर्थ-दशमभावौ क्रमशः दक्षिण-वामपार्श्वभागौ, पञ्चमनवमभावौ क्रमशः दक्षिणवामहृदये, षष्ठाष्टमभावौ क्रमशः दक्षिण-वामक्रोडौ, सप्तमभावः नाभिः।

---

4. कालात्मकस्य च शिरोमुखदेशवक्षोहृत्कुक्षिभागकटिबस्तिरहस्यदेशः
उरु च जानुयुगलं परतस्तुजङ्घे पादद्वयं क्रियामुखावयवाः क्रमेण।। जातकपारिजातः, राशिशीलाध्यायः श्लोकसं.- ८

जन्मसमये यदि लग्नं तृतीयद्रेष्काणे भवेत्तदा लग्नं वस्ति(उपस्थ-नाभिप्रदेशस्य मध्यभागं), द्वितीयभावः लिङ्गं, द्वादशभावः गुदा, तृतीयएकादशभावौ क्रमशः दक्षिण-वामअण्डकोशः चतुर्थदशमभावौ उरू, पञ्चम-नवमभावौ क्रमशः दक्षिण-वामजानू, षष्ठ-अष्टमभावौ क्रमशः दक्षिण-वामजंङ्घे, सप्तमभावः पादौ। इत्थं प्रकारेण सर्वेषु अङ्गेषु रोगानां सम्भावना अवगन्तव्या।

इदानीं विशेषरूपेण हृदयाघातस्य कारणभूतान् ग्रहयोगान् अत्र उपस्थाप्यन्ते। तद्यथा-

अष्टमेशः यदि चतुर्थभावे भवति तदा जातकः हृदयरोगी भवति।[5] रोगविचारः रोगभावे (षष्ठभावे) स्थितग्रहानुसारं, अष्टम-द्वादशभावस्थ-ग्रहेभ्यः,[6] षष्ठेशात्, षष्ठेशसंयुक्तेभ्यः ग्रहेभ्यश्च[7] व्याधिः विचारणीया भवति। यदि पापग्रहाः चतुर्थ-पञ्चम-गृहेषु स्थिताः, शुभप्रभावहीनाः स्युस्तदा तदा जातकः हृदयसम्बद्धरोगैः पीड़ितो भवति।[8] यदि सर्वे ग्रहाः स्व-स्व नीचराशिषु स्थिताः स्युस्तर्हि जातकः हृदयरोगेन पीडितो भवति।[9] अस्मिन् योगे उत्पन्नः जातकः विविधशारीरिक- दुःखेन पीडां प्राप्नोति। जातकः धन-धान्यरहितः सदा पराश्रितः अत्यन्त-कृपणश्च भवति।

जातकस्य कस्मिन् अङ्गविशेषे व्याधिः भविष्यतीति विचार्यते- सर्वप्रथमं राशिचक्रस्य स्वरूपमवगन्तव्यम्। कः राशिः कस्य अङ्गविशेषस्य प्रतिनिधित्वं करोति। अपि च प्रश्नमार्गग्रन्थानुसारं कश्चित् ग्रहविशेषः कस्यचित् अङ्गविशेषस्य प्रतिनिधित्वमपि करोतीति प्रतिपादितं विद्यते। तद्यथा- कुक्षि हृन्मूर्द्धावक्षांस्यूरूवक्तव्यो जानुनी चांघ्रियुगम्

सूर्यात् कुक्षिः, चन्द्रात् हृदयं, भौमात् मूर्द्धा, बुधात् वक्षस्थलं, गुरुतः ऊरू, शुक्रात् जानू, शनैश्चरात् अङ्घ्रियुगं विचार्यते। जन्मपत्रे यः ग्रहः दुर्बलः पीड़ितो वा भवेत् तर्हि तत्सम्बन्धित-अङ्गे व्याधयः भवन्ति अथवा तदङ्गं दुर्बलं भवति।[10] हृदयरोगस्य विचारः मुख्यतः सूर्य-चन्द्राभ्यां क्रियते। हृदयरोगस्य मूलं कारणं मस्तिष्कचापः (मस्तिष्कदबाव) (Mentel Pressure)भवति। हृदयाघातस्य मूल कारण आवेश-क्रोध-उद्वेग-संवेगादीनां अधिकता भवति। मनसः विचारः चतुर्थभावात्, मस्तिष्क(मानसिकचिन्तनस्य) विचारः पञ्चमभावात् भवति।

---

5. हृत्क्रोडज व्याधीन्वक्ति। फलदीपिका चतुर्दशोऽध्यायःश्लोक -२
6. रन्ध्रर्क्षोक्तरुजाथवा- फलदीपिका रोग चिंता अध्याय श्लोक -१२
7. रोगस्य चिन्तामपि रोगभावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः ।
   रोगेश्वरेणापि तदन्वितैर्वा द्वित्र्यादिसंवादवशाद्वदन्तु।। फलदीपिका चतुर्दशोऽध्यायः श्लोकः- १
8. हृद्रोगी पञ्चमे पापे सपापे च रसातले।
   क्रूरषष्ट्यंशसंयुक्ते शुभदृग्योगवर्णिते।। जातक पारिजात पञ्चम-षष्ठ भावफलाध्यायः—१३ श्लोक -६९
9. जनुषि नीचगताःसकला ग्रहा यदि भवन्ति तदा हृदसंज्ञकः ।
   हृद्भवो विकलो विभवोनितो रिपुहृतो नितरां शठतायुतः।। भावकुतुहलम्- ७/४७
10. सूर्यादीनां कुक्षिहृन्मूर्द्धवक्षांस्यूरूवक्तव्यो जानुनी चांघ्रियुगम्।
   अङ्गानि स्युर्व्याधयोऽङ्गे ग्रहाणां वक्तव्या दौर्बल्यदौस्थ्यादिभाजाम्।। प्रश्नमार्गः १२/७

एवमेव प्रसंगेऽस्मिन् सूर्यचन्द्रयोः स्थिति अवलोकनीया। अर्थात् एतौ सूर्य-चन्द्रो नीचस्थौ न भवेतां, शत्रुक्षेत्री अथवा केन्द्रुमदोषेण पीड़िता न स्याताम् इति सर्वे विषयाः विचारणीयः।[11] हृदयरोगविषये ज्योतिषशास्त्रस्य अन्य ग्रन्थानां परिशीलनेन अनेके योगाः प्राप्यन्ते। तद्यथा-[12]

१. चतुर्थ-पञ्चमभावयोः क्रूरग्रहाणां संयुतिः।

२. सूर्यचन्द्रौ क्रूरग्रहेण संयुतौ भवेताम्।

३. अष्टमेशः यदि चतुर्थभावे भवेत्।

४. षष्ठेशः सूर्यस्य नवमांशे भवेत् तर्हि हृदयरोगो भवति।

५. वृषस्य कर्कस्य वा चन्द्रः पापयुक्तो भवेत्।

६. यदि क्रूरेण संयुतः षष्ठेशः चतुर्थभावस्थः भवेत् तर्हि हृदयरोगो भवति।

७. शनिगुरुभ्यां संयुतः षष्ठेशः लग्नात् चतुर्थभावस्थः क्रूरग्रहेण संयुक्तो भवेत्तर्हि हृदयरोगो भवति।

८. क्रूरेण संयुतः शनिः गुरुर्वा चतुर्थस्थः भवेत्तर्हि जातकः हृद्रोगेन पीडितो भवति। कदाचित् हृदये क्लेशकारी व्रणाः भवन्ति।

९. षष्ठेशः सूर्यस्य नवमांशे भवति तर्हि हृदयरोगो भवति।

१०. नीचस्थः रिपुगृहस्थः अस्तङ्गतो वा चतुर्थेशः व्ययभावे व्ययेशेन संयुक्तो भवेत् तर्हि हृदयरोगो भवति।

११. पापग्रहैः दृष्टः चतुर्थस्थः राहुः, निर्बलः लग्नेशः पापग्रहैः संदृष्टश्च भवेत् तर्हि शूलरोगो भवति।

१२. सूर्यचन्द्रभौमाः शत्रुक्षेत्रे भवन्ति तर्हि जातकः शूलरोगेन पीडितो भवति।

इत्थं ज्योतिषशास्त्रे विविधहृदयरोगाणां कारणानि भवन्ति। तस्य निवारणाय ग्रहस्य शान्तिविधानं कृत्वा कुयोगानां प्रभावं न्यूनीकर्तुं शक्यते।

ॐ ॐ ॐ

## - सुभाषितम् -

**विद्यातपोवित्तवपुर्वयः कुलैः सतां गुणैः षड्भिरसत्तमेतरैः।**
**स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसाम्।।**

(श्रीमद्भागवत - ०४/०३/१७)

अर्थात्- विद्या, तप, वित्त, शरीर, अवस्था और उच्च-कुल, ये छः सज्जनों के लिए गुण स्वरूप होता है। यही छः दुर्जनों के लिए दुर्गुण होते हैं, जिनके कारण विवेक के नष्ट होने पर अभिमानी और दोषपूर्ण दृष्टि वाले होकर वे धृष्ट-जन महापुरुषों की तेजस्विता को नहीं देख पाते हैं।

---

11. पित्तोष्णज्वरतापदेहपतनापस्मारहृत्क्रोडज- व्याधीन् शक्ति रर्विदृगात्यारिभयं त्वग्दोषमस्थिस्रवम् ।
कुष्ठाग्न्यस्त्रविषार्त्तिदारतनव्यापच्चतुष्पादभयं चोरक्ष्मापतिधर्मदैवफणभृत्भूतेशभूताद्भयम् ।। प्रश्नमार्गः- १२/६७

12. ज्योतिषपीयूष- निरोगता विचार- पृष्ठसंख्या - २४४

# द्रव्यप्रयोग-ऋणग्रहणमुहूर्तविचारविमर्शः

**डा. रमानन्दभट्टः एन्**
सहायकप्राध्यापकः (संविदा)
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
श्रीराजीवगान्धीपरिसरः, शृङ्गेरी
Email – dr.ramananda.bhat@csu.co.in, rnbhat1987@gmail.com
Mob - 9686548489

सन्तु नमांसि सहस्रं श्रीमद्भ्यश्चन्द्रशेखरगुरुभ्यः ।
येषां वदने हृदये नाम्नि पूते च भारती लसति ॥

Keywords
मुहूर्तः, ऋणम्, धनप्रयोगः, नष्टं वस्तु, Investment

Abstract

अस्मिन् लेखने मुहूर्तस्य सर्वत्र उपयोगः प्रपञ्चितः। वर्तमाने एतादृशधनविषयस्य महत्त्वं वर्तते इत्यतः तद्विषये चिन्तनं कृतम् । अत्र कर्तॄणां विषये विमतिः क्वचिद्दृष्टा। तस्या अपि परिहारः शास्त्रबलेन दर्शितः ।

Article:- अथ च मुहूर्तस्य सर्वत्र प्रसक्तिः। लोके क्रियमाणानां समेषां शुभाशुभकर्मणां योग्यकालस्य अपेक्षा वर्तत एव। वर्तमाने तु काले कलौ प्रायः सर्वेऽपि धनलुब्धाः। कुत्र धनस्य प्रयोगेण धने वृद्धिः स्यादिति जनाः चिन्तयन्ति। share market, LIC, Finance, FD, RD, PPF, SIP, GOLD इत्यादिभिः सह Companies, Shops, Hotels, Apartments इत्यादिषु व्यवहारेषु वा, द्यूते वा, भूमौ वा धनप्रयोगं कुर्वन्ति। यदि अयं धनप्रयोगः विहितसमये कृतः तदा महान् लाभः आप्यत एव। तथैव ऋणग्रहणे अपि मुहूर्तस्य अपेक्षा वर्तते। अयोग्ये समये ऋणं गृहीतं चेत् ऋणस्यैव वर्धनं स्यात्। अतः वर्तमाने तु सर्वं गृह-वाहनादिकम् ऋणेनैव (Loan) सम्पाद्यते इत्यतः अत्रापि मुहूर्तस्य विचारः कर्तव्य एव।

धन(द्रव्य)प्रयोगे (Investment) निषेधः।

धनप्रयोगः चतुर्धा विभक्तः। दत्तम्, निवेशितम्, प्रयुक्तम्, विनष्टं चेति तस्मिन् चत्वारो भेदाः। सुवर्णादिकं द्रव्यं कलान्तरं (Interest) विना दत्तं दत्तमित्युच्यते। अत्र स्वसत्तात्यागः न वर्तते, किन्तु कलान्तरमपि न भवति। इदं दत्तमित्युच्यते (अत्र परिगृहीतुरेव द्रव्यस्य अपेक्षा वर्तते)। निवेशितन्नाम स्वसत्तापरित्यागं विना स्वेष्टसमीपे प्रत्ययेन स्थापितम् (अत्र दातुरेव द्रव्यरक्षणाद्युद्देश्यं भवति)। कलान्तरेण सह रीतिपुरस्सरम् उत्तमर्णाधमर्णव्यवहारेण कस्मैचिद्दत्तं प्रयुक्तमित्युच्यते (अत्र दातुरेव धनलाभोद्देश्यं भवति)। विनष्टं चोराद्यपहृतं वा स्वयमेव क्वचित्त्यक्तं द्रव्यम्। एतस्य सर्वविधस्यापि धनप्रयोगस्य निषिद्धनक्षत्राण्युच्यन्ते ।

**तीक्ष्णमिश्रध्रुवोग्रैर्यद् द्रव्यं दत्तं निवेशितम् । प्रयुक्तं च विनष्टं च विष्ट्यां पाते च नाप्यते॥** [1]

1. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २४

**तीक्ष्णसंज्ञकनक्षत्राणि-** (मूलम्, ज्येष्ठा, आर्द्रा, आश्लेषा), मिश्राणि- (विशाखा, कृत्तिका), ध्रुवनक्षत्राणि-(उत्तरा, उत्तराषाढा, उत्तराभाद्रा, रोहिणी), उग्राणि- (पूर्वा, पूर्वाषाढा, पूर्वाभाद्रा, भरणी, मघा) च द्रव्यप्रयोगे निषिद्धाणि। यदि धनं प्रयुज्यते तर्हि तर्हि तत्पुनः नाप्यते। तथैव भद्रायां व्यतीपात-वैधृत्योः ग्रहणे च नष्टादिकं नाप्यते एव। अत्र चोरैर्हतं वा स्वयमेव क्वचित्त्यक्तमपि धनप्रयोगे एव योज्यते । अत्र कर्तुः मुहूर्तस्य विचारः नास्तीत्यतः नष्टे नक्षत्रनिषेधः इति न युज्यते। किन्तु विनष्टकालस्य चिन्तनं कर्तव्यमिति तल्लक्षणमत्र प्रतिपादितम्। तेन नष्टस्य प्राप्त्यादिविचारः चिन्तयितुं शक्यः। प्रकरणवशात् एतत्सम्बद्धतया अन्धकादिनक्षत्रवशादपि नष्टवस्तुप्राप्तिविचारः प्रस्तूयते।

**नक्षत्राणाम् अन्धकादिसंज्ञाः-**

**अन्धाक्षाणि –** धनिष्ठा, पुष्यः, रोहिणी, पूर्वाषाढा, विशाखा, उत्तराफल्गुनी, रेवती ।

**मन्दाक्षाणि –** हस्तः, उत्तराषाढा, अनुराधा, शतभिषक्, आश्लेषा, अश्विनी, मृगशिरः ।

**मध्याक्षाणि –** आर्द्रा, मघा, पूर्वाभाद्रा, चित्रा, ज्येष्ठा, अभिजित्, भरणी ।

**स्वक्षाणि –** स्वातिः, पुनर्वसुः, श्रवणः, कृत्तिका, उत्तराभाद्रा, मूला, पूर्वाफल्गुनी।

**अन्धकादिनक्षत्राणां फलानि-**

**विनष्टार्थस्य लाभोऽन्धे शीघ्रं मन्दे प्रयत्नतः। स्याद्दूरे श्रवणं मध्ये श्रुत्याप्ती न सुचोलने॥** [2]

किञ्चिद्वस्तु नष्टं वा हृतं तद्दिननक्षत्रं यदि अन्धसंज्ञकं तर्हि नष्टवस्तुनः प्राप्तिः अप्रयत्नतः शीघ्रं भवति। मन्दाक्षे तु प्रयत्नतः भवति। मध्याक्षे विनष्टार्थस्तु स्वनगराद् दूरे वर्तते अथवा त्वद्द्रव्यम् अमुकेन हृतम् अमुकस्मिन् स्थले तिष्ठति इति वार्ता तु श्रूयते, लब्धिस्तु नास्त्येव। सुलोचने तु श्रवणम् आप्तिश्च न भवतः। एवं नष्टार्थस्य प्राप्त्यादिकं चिन्त्यम्।

**धन(द्रव्य)प्रयोगे विधिः-**

**नक्षत्राणि-** स्वातिः, पुनर्वसुः, मृदुनक्षत्राणि (मृगशिरः, रेवती, चित्रा, अनुराधा), विशाखा, पुष्या, श्रवणः, धनिष्ठा, शतभिषा, अश्विनी चेत्याहत्य एकादश भानि प्रशस्तानि ।

**लग्नम्-** चरलग्नं (मेषः, कर्कः, तुला, मकरः) स्यात् ।

**लग्नशुद्धिः-** त्रिकोणाष्टमशुद्धिः (५, ९, ८) अपेक्ष्यते । अर्थात् एतेषु भावेषु ग्रहाभावः स्यात्।

अत्र पूर्वं धनप्रयोगनिषिद्धनक्षत्रेषु मिश्रनक्षत्रत्वात् विशाखायाः निषेधो विहितः। अत्र पुनः विहितनक्षत्रेषु विशाखायाः ग्रहणं कृतम्। एवं चिन्तामणिकारेण परस्परं विरुद्धमुक्त्वा व्याहतदोषः समजायत। किन्त्वेतस्य समाधानं स्वयमेवाह प्रमिताक्षर्यां श्रीरामः "मिश्रनक्षत्रत्वाद्विशाखायाः निषेधे प्राप्ते ऋणदाने एव विधिः, हृते नष्टादौ निषिद्धैव " इत्युक्त्वा पूर्वोक्तनिषेधस्य हृतनष्टादावेवेति सङ्कोचं कृतवान्। द्रव्यप्रयोगे तु दोषः नास्त्येवत्यर्थः। तत्रैव भीमपराक्रमस्य वाक्यम्-

**मृदुपुष्याश्विनी चैव विशाखाश्रवणत्रयम् ।पुनर्वसौ च शंसन्ति धनादिविधिवर्तनम् ॥** [3]

---

2. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २३

3. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २७, पीयूषधारा टीकायां भीमपराक्रमस्य वाक्यम् ।

**ऋणग्रहणमुहूर्तः-**

ऋणग्रहणकर्त्रा मुहूर्तः द्रष्टव्यः। अन्यथा ऋणस्य वंशे एव अनुवर्तनं स्यात्। तदर्थम् ऋणग्रहणे निषिद्धः कालः प्रोक्तः। ऋणं कुजवासरे, रविसङ्क्रमदिने, वृद्धियोगे, हस्तनक्षत्रे, रविवासरे च न ग्राह्यम्। यदि गृह्यते तर्हि ऋणं तद्वंशेषु भवेत्। ऋणपरिहारः न भवति। अत्र "करेऽर्केऽह्नि " इति मूलम्। अस्य व्याख्याने प्रमिताक्षर्यां "करे हस्तनक्षत्रे अर्केऽह्नि रविवारे" इति यावत् इत्युक्तम्। **पीयूषधारायां तु-** "करेऽर्केऽह्नि हस्तनक्षत्रसहिते रविवारे। हस्तार्के इति यावत्" इति अमृतसिद्धियोगरूपः हस्तार्कयोगः अत्र उक्तः। अतः मूलकारस्य अभिप्रायः अत्र अस्पष्टः एव । किन्तु उभयत्रापि **"हस्तेऽर्कवारे सङ्क्रान्तौ ...."** इत्यादि ज्योतिःप्रकाशकारोक्तिः दर्शिता ।

पुनश्च **"न च बुधे देयं कदाचिद्धनम्"**[4] इत्युक्तम्। अतः बुधवासरे धनं न देयम्। इदमेव सम्यगुक्तं **ज्योतिःप्रकाशे– ऋणं भौमे न गृह्णीयान्न देयं बुधवासरे। ऋणच्छेदं कुजे कुर्यात् सञ्चयं सोमनन्दने॥**[5] एवमेव ऋणग्रहणायोग्यमुहूर्तेषु ऋणच्छेदः शुभो भवति। प्रसङ्गात् वर्तमाने स्वर्णेऽपि धनं स्थाप्यते इत्यतः स्वर्णादिद्रव्यसङ्ग्रहणमपि धनप्रयोगविषयः इति कृत्वा मुहूर्ताः अधुना उच्यन्ते। तच्च **माधवीये-**

**जीवोदये नभसि भास्वति कामबन्ध्वोः चन्द्रे नवद्रविणसङ्ग्रहणं विदध्यात् ।**
**स्वांशे गुरौ वपुषि वाथ खलाभलग्नवित्तेषु चार्कभृगुजेन्दुसुतार्चितेषु ॥**[6]

लग्ने गुरौ, दशमे सूर्ये, सप्तमे चतुर्थे वा चन्द्रे नूतनस्वर्णादेः सङ्ग्रहणं कुर्यात्। लग्ने स्वांशे गुरुश्चेत् अन्यो योगः। दशमे रवौ, भृगौ लाभे, चन्द्रे लग्ने, द्वितीये गुरौ सति अपरो योगः। एते त्रयोऽपि योगाः द्रव्यसङ्ग्रहणे सिद्धिदाः। **स्वर्णसङ्ग्रहे मुहूर्तः-**

**इष्टगृहे सुरपूज्ये स्वांशगते तनुसंस्थे । सङ्ग्रहणं नवहेम्नः कोटिगुणं कुरुते ॥**

नीचारिवर्जितराशौ स्वांशस्थः गुरुः लग्नगतश्चेत् नवहेमसङ्ग्रहणं कर्तव्यम्। अस्मिन् समये स्वर्णसङ्ग्रहणं कृतं चेत् तत्तु कोटिगुणितलाभयुक्तं भवति। **रजतादिसङ्ग्रहकालः-**

**एकांशकोपगतयोरुदये चन्द्रशुक्रयोः। रजताम्बरधान्यादि सङ्गृह्णीयात् समृद्धये ॥**

क्वचिद्राशौ एकांशस्थयोः चन्द्रशुक्रयोः उदये रजतादिसङ्ग्रहः कार्यः। तेन समृद्धिः स्यात्। आदिपदेन धान्यपूगफलादीनां ग्रहणम्। एवं शास्त्रे द्रव्यप्रयोग-ऋणग्रहणमुहूर्तः प्रोक्तः।

Bibliography

१. मुहूर्तचिन्तामणिः- श्रीरामदैवज्ञविरचितः, स्वोपज्ञप्रमिताक्षर्या सहितः- डा. शिवलोचन झा, सत्यं पब्लिशिंग हाऊस, नवदेहली- २०१२ ।
२. मुहूर्तचिन्तामणिः- श्रीरामदैवज्ञविरचितः, श्रीमद्गोविन्दविरचितपीयूषधारया सहितः – श्रीकेदारदत्तजोषी, मोतीलाल बनारसीदास, नवदेहली - २००८ ।
३. विद्यामाधवीयम्- विद्यामाधवप्रणीतम्, तत्पुत्रविष्णुकृतमुहूर्तदीपिकायुक्तम्, डा.आर्.शर्मा शास्त्री, मैसूरुविश्वविद्यालयः, प्राच्यविद्यासंशोधनालयः- १९२६ ।
४. मुहूर्तपदवी – वरदीपिकाव्याख्यासहिता, ज्योतिर्निधिः अनन्तपद्मनाभतन्त्री, अनन्तपद्मनाभतन्त्रिणामभिनन्दनसमितिः, बैलूरु, उडुपी- २००९ ।
५. ज्योतिषरत्नमाला – श्रीपतिभट्टप्रणीता, बिहारीलालशर्मवासिष्ठः, श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू- १९७८।

4. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २७,
5. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २७,
6. मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् श्लो.सं. २७ इत्यस्य पीयूषधाराटीकायाम् विद्यामाधवीये

भास्करोदयः ISSN - 2278-0815

# वृद्धयवनजातकानुगुणं मृत्युविमर्शः

**कृष्णमूर्तिः एन्**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धिपरिसरः, शृङ्गेरी

**शोधसारः –**

ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकाचार्येषु यवनाचार्यः अन्यतमः इति तु प्रसिद्धमेव। यवनाचार्याणां परम्परायां अनेके आचार्याः यवननाम्ना प्रसिद्धाः आसन्। तेष्वन्यतमः मीनराजाख्यः यवनाचार्यः। मीनराजः वृद्धयवनजातकाख्यं ग्रन्थं रचयामास। ग्रन्थोऽयं यवनपरम्परायाम् अतीव प्रसिद्धः तथा सर्वश्रेष्ठ-ग्रन्थत्वेन स्वीकृतः वर्तते। तथैव यवनपम्परायां आधुनिककाले लभ्यमानेषु ग्रन्थद्वयेषु अयं ग्रन्थः अन्यतरः। अयं हि ग्रन्थकारः ज्योतिषप्रपञ्चे वराहमिहिरादि-आचार्याणाम् पूर्ववर्तित्वेन स्वीकृतः वर्तते। यवनपरम्परायाः प्रसिद्धिः सर्वाधिका वर्तते। ज्योतिषदेवेन्द्रो वराहमिहिरोऽपि यवनेश्वरं बारं बारं स्वकीये बृहज्जातकाख्ये ग्रन्थे स्मरति। अतः एतादृशस्य महापुरुषद्वारा लिखितग्रन्थस्याध्ययनेन ज्योतिश्शास्त्रस्योपरि पाण्डित्यस्य वृद्धिः निश्चप्रचं भवति इति मत्वा अस्यां शोधपत्रिकायां अयं विषयः शोध-लेखत्वेन स्वीकृतः। वृद्धयवनजातके नानाविधाः योगाः निरूपिताः। मृत्युभावचिन्तनं तेष्वन्यतमम्। अस्मिन् प्रकरणे ग्रहाणां विवधस्थलेषु स्थितिवशात् विशिष्य अष्टमभावस्थितग्रहस्थित्यनुसारं केन प्रकारेण मृत्युः भवति इत्यस्मिन् विषये आचार्यः चारुतया सरलतया निरूपितवान्। अस्य अवगमनेन दैवज्ञः सुष्ठुमरणकालं तथा मरणकारणञ्च स्पष्टतया वक्तुं पारयिष्यति। इतः परं ग्रन्थोक्तविषयाः प्रतिपाद्यन्ते।

**कूटशब्दाः –**

होरा, मृत्युः, मूलत्रिकोणम्, नवांशः, निधनम्, मृत्युः, रन्ध्रभावः, छिद्रभावः, वर्गोत्तमनवांशः।

**प्रस्तावना -**

सुविदितमेव यत् ज्योतिषाख्यः महाशास्त्रार्णवः सिद्धान्त-संहिता-होरा चेति त्रिषु स्कन्धेषु विभक्तः इति। तदेवोक्तं प्रश्नमार्गे यथा –

**स्कन्धत्रयात्मकं ज्योतिश्शास्त्रमेतत् षडङ्गवत्।**
**गणितं संहिता होरा चेति स्कन्धत्रयं मतम्॥** [1]

तेष्वन्यतमः होरास्कन्धाख्यः व्यक्तिगतमानवानां कृते फलप्रवचनक्रमः विविधयोगानाम् आधारेण निरूपितः वर्तते। न केवलं योगानामाधारेण फलप्रवचनं कृतं वर्तते अपितु प्रत्येकस्मात् भावात् अपि फलानि प्रदिपादितानि सन्ति। एतेषां समेषां विषयाणां निरूपणं नानाचार्याः आकर्षकशैल्या सरलशैल्या च स्वस्वग्रन्थेषु प्रतिपादितवन्तः।

1. प्रश्नमार्गः, अ.ध.1, श्लोक.5

**विषयवस्तु -**

उक्तेषु विषयेषु अष्टमभावविमर्शः अन्यतमः। अष्टभावात् सामान्यतः मनुष्यस्य मृत्युचिन्तनं क्रियते। मृत्युविषयकप्रश्नाः सामान्यतया जनाः न कुर्वन्ति चेदपि, केषाञ्चित् जनानां मनसि प्रश्नानि समुद्भवेयुः यत् "मम मरणं कदा भवेत्? केन प्रकारेण मृत्युः भवेदिति"? एतादृशप्रश्नाः आधिक्येन वृद्धाः एव पृच्छन्ति। अथवा कस्यचित् व्यक्तेः आकस्मिकमरणादि-सन्दर्भेष्वपि तत्कालग्रहस्थितम् अधिकृत्य सः जनः कथं पञ्चत्वमवाप्तवान्? इति दैवज्ञाः वक्तुं पारयन्ति। अतः एतेषां समाधानार्थमयम् मृत्युविमर्शाख्यः विषयः शास्त्रे उपदिष्टः। अस्य विषयस्योपस्थापनं बहवः ज्योतिषाचार्याः स्वस्वग्रन्थेषु स्वस्वसामर्थ्यानुगुणं कृतवन्तः सन्ति। तद्वदेव हि आचार्यः मीनराजः स्वकीये वृद्धयवनजातकाख्ये ग्रन्थे अमुं विषयं मृत्युभावफलाध्याये निरूपयामास। अस्मिन् अध्याये आचार्यः सूर्यादयः ग्रहाः अष्टमभावे स्थिताः भवन्ति चेत् तेषां मरणं कथं? कदा? तथा कीदृक् प्रकारेण? भवतीति अतीव गभीरतया विमृष्टवान्। अष्टमभावात् तु सामान्यतया सर्वे चिन्तनं कृतवन्तः, किन्तु उच्च-नीचक्षेत्रेषु ग्रहाणां स्थितिवशात्, पापग्रहयोगवशात् मरणविषयकाः विचाराः अङ्गुलिगणनीयाः आचार्याः एव कृतवन्तः, मीनराजाचार्यः तेष्वन्यतमः।

**१) सूर्यात् मृत्युविमर्शः –**

तत्रादौ सूर्यवशात् मृत्युचिन्तनं प्रदर्श्यते। तदुक्तं यथा- यदि भास्करः अष्टमस्थः भूत्वा स्वोच्चे स्थितः भवति चेत् जातकः अग्नेः सम्पर्ककारणात् मृत्युं प्राप्नोति। स्पष्टतार्थं उदाहरणं प्रदर्श्यते- कुण्डल्यां कन्यालग्नं भवेत्, सूर्यश्च मेषराशौ स्थितो भवेत्। एतादृशी स्थित्यां जातकः अग्नेः सम्पर्कवशात् मरणं प्राप्नोति। यतो हि कन्यालग्नम्, लग्नात् अष्टमे सूर्यः स्व-उच्चक्षेत्रे संस्थितः वर्तते। अतः योगानुगुणं मरणं प्राप्नोति।

सहस्रकिरणः स्वोच्चनवांशे भवेत्। एतादृशयोगात् मानवः लोकनिन्दाकारणतः अथवा लज्जा कारणात् मरणं व्रजेति। अस्मिन् सन्दर्भे कदाचित् प्रश्नस्य अवसरः भवेत् यत् लोकनिन्दा कारणात् कथं मरणं प्राप्यते, यतो हि निन्दा तु शब्दैः क्रियते, शब्दात् तु मरणं नैव सम्भवति। तर्हि एतादृशस्य योगस्य का अपेक्षा? तस्य समाधानं यथा- सामान्यनिन्दा कारणात् कोपि जनः दुःखितः न भवति, किन्तु सामूहिकस्थलेषु अतीव-कठोरशब्दानां उपयोगेण, ताडनादिहिंसात्मक-निन्दां प्राप्य सर्वेषां पुरतः लज्जां अनुभूय मनसि पीडाम् ऊढ्वा, सः मानवः आत्म-हत्यादि कुकर्मेषु प्रवृत्तः भवति। अनया रीत्या सः यमलोकं गच्छति।

षड्वर्गः शुद्धः सूर्यस्य स्थितिवशात् मानवः त्रुटिकारणात्, प्रमादात् आलस्य कारणात् वा दिवङ्गच्छति। अष्टमस्थः रविः नीचगृहे स्थितश्चेत् जातकः वनाग्निकारणात् मृत्युं प्राप्नोति। नीचनवांशस्थः रविः दम्भप्रदर्शनेन, असत्यकथनेन वा मृत्युं प्राप्नोति। एवं हि पापग्रहाणां वर्गे तीक्ष्णांशुः गतश्चेत् वह्निप्रदीपनेन मृत्युलोकं गच्छति। मित्रराशौ सूर्यस्य सानिध्येन विषस्य सेवनेन मनुष्यः पञ्चत्वं प्राप्नोति तथा हि स्वमित्रनवांशे सूर्यः स्थितः चेत् निबन्धनेन देहावसानं भवेदिति दैवज्ञैः

अवगन्तव्यम्। वर्गोत्तमनवांशे रवेः स्थितिकारणात् मनुष्यः सन्तापकारणात् यमलोकं व्रजेति। शत्रुक्षेत्रस्थः अष्टमभावस्थश्च हिरण्यगर्भः रक्तविकारेण नश्यति, तथाहि शत्रुनवांशस्थः सूर्यः कासरोगतः मरणं प्राप्नोति। अष्टमभावस्थः मूलत्रिकोणाश्रितः आदित्यः स्त्रीदोषकारणात् पुरुषः नश्यति इति आदेश्यम्। इत्थं प्रकारेण सूर्यात् मृत्युचिन्तनं विहितम्।

**इतः चन्द्रसम्बद्धमृत्युलक्षणानि विशदीक्रियन्ते -**

कुण्डल्यां अष्टमस्थः स्वोच्चस्थः शशिः जलौ निमज्जनेन मरणं प्राप्नोति। चन्द्रः उच्चनवांशे अष्टमस्थः भवति चेत् हिमकणानां पतनात् जातकस्य मरणं सञ्जायते। षड्वर्गशुद्धः चन्द्रः वज्रपातनेन मनुष्यः यमपुरं प्राप्नोति। तदेवोक्तं वृद्धयवनजातके[2] –

**चद्रोऽष्टमस्थो यदि तुङ्गसंस्थः करोति मृत्युं सलिलप्रवेशात्।**
**तुङ्गांशकस्थः करकाभिघातात् षड्वर्गशुद्धस्त्वशनिप्रपातात्॥**

इतोऽपि उच्यते –

निशापतिः अष्टमस्थः सन् नीचक्षेत्रे यदि संस्थितः तर्हि स्त्रीकारणात् आशु मरणं प्राप्नोति। नीचनवांशस्थः रन्ध्रभावस्थः शशिः कफपित्तादिदोषसञ्चारेण दिवङ्गच्छति तथैव चन्द्रः पापग्रहाणां वर्गे संस्थितश्चेत् सन्निपातरोगेण विनश्यति। अष्टमस्थः मित्राश्रयस्थः शीतकिरणः उदररोगात् पञ्चत्वं प्राप्नोति, एवं हि मित्रनवांशस्थः अष्टमस्थः चन्द्रः गुदरोगद्वारा स्वर्गलोकं प्राप्नोति। चन्द्रस्य स्थितिः वर्गोत्तमनवांशे भवेत् एवं चन्द्रः अष्टमभावेऽपि स्थापितः भवेत्। एतादृशयोगे उत्पन्नस्य पुरुषस्य मरणं पशुपादघातनेन सम्भवति। विधुः अष्टमभावस्थः सन् शत्रुक्षेत्रस्थः यदि भवति तर्हि बहुगुप्तरोगात् जातकस्य देहावसानं जायते इति वक्तव्यम्। कुमुदबान्धवः अष्टमभावस्थः सन् स्वमूलत्रिकोणे स्थितश्चेत् क्षयरोगेण मानवस्य परलोकगमनं अवश्यं भवति।

**कुजात् मृत्युचिन्तनम् -**

कुजः स्वोच्चस्थः भूत्वा अष्टमभावे यदि तिष्ठति तर्हि मनुष्यस्य मरणं सङ्ग्रमे भवति। अष्टमभावस्थः स्वोच्चनवांशस्थः कुजः शस्त्रघातनेन मृत्युमाप्नोति जातकः। षड्वर्गशुद्धस्य मङ्गलस्य मरणं गोग्रहेण जायते। **नीचाश्रितो भूतनयोऽष्टमस्थः**[3] इत्यादि श्लोकेन उच्यते यत्- अष्टमस्थः नीचाश्रितः भूतनयः आत्महत्यादिद्वारा मरणं प्राप्नोति। वक्रः अष्टमस्थः सन् स्वनीचनवांशे संस्थितः भवति चेत् व्यक्तिः स्वकीयास्त्रेण आत्महत्यां करोति। कुजः पापग्रहाणां वर्गे स्थिते सति हिसांत्मकपक्षीद्वारा अथवा सदन्तप्राणिनां घातेन जातकः परलोकं याति। अष्टमस्थे मित्रक्षेत्रस्थे रुधिरस्य स्थित्या शिलाद्वारा मरणं जायते। क्षितिजः अष्टमभावे स्थित्वा वर्गोत्तमक्षेत्रे स्थितश्चेत् कूपपतनात् व्यक्तेः देहावसानं भवेदिति वाच्यम्। शत्रुक्षेत्रे अष्टमभावे च यदि भूतनयः स्थितः तर्हि उन्नतप्रदेशात् पतनात् जायते। अष्टमभावे भूत्वा शत्रुनवांशे विद्यमानः कुजः गुप्तरोगेण दिवङ्गच्छति। अष्टमभावस्थः मूलत्रिकोणस्थः कुजः विषभक्षणेन

2. वृद्धयवनजातकम्, पृ.सं. - 326
3. वृद्धयवनजातकम्, पृ.सं. - 327

मरणयोगं कारयति। एवं कुजात् निधनचिन्तनम्।

**बुधात् मृत्युचिन्तनम्-**

एतावता कुजात् मृत्युलक्षणं निरूप्य इतः परं बुधात् मृत्युविमर्शः कथं करणीयः इति निरूप्यते। इन्दुजः अष्टमभावे भूत्वा स्वोच्चे यदि संस्थितः भवति तर्हि मानवस्य मरणं हस्ताभ्यां जायते। हस्तेन मृत्युः इत्यत्र नानाविधिना मृत्युः भवितुं शक्यते। उदा. स्वहस्ताभ्यां आत्महत्यां कुर्यात्। अन्यः मनुष्यः स्वहस्ताभ्यां मारयेत्। एवं नानाप्रकारेण मनुष्यस्य मृत्युः भवति इति वक्तुं शक्यम्। बुधः स्वोच्चनवांशस्थः अष्टमस्थश्च भवति चेत् कफरोगेण ज्वरेण वा निधनं भवति। जलात् उत्पनन्नेभ्यः रोगेभ्यः मरणं प्राप्नोति यदि बुधः षड्वर्गशुद्धः सन् अष्टमभावे स्थितश्चेदथवा ज्ञः अष्टमभावे स्थितः भवेत् तथा नीचाश्रयस्थः च भवेत्। एवं जाते सति जातकः निधनं व्रणसङ्क्रमेण भवति। अर्थात् केनचित् कारणेन शरीरे व्रणं भवति, एवं तस्य व्रणस्य सङ्क्रमणेन तस्य मरणं भवेत्। बुधः पापग्रहाणां वर्गे स्यात्, तर्हि प्रियजनवियोगेण व्यक्तेः परलोकगमनं जायते।

अष्टमभावस्थः मित्रक्षेत्रस्थः बुधः हृदयरोगेण मृत्युः सम्भवति। चान्द्रिः मित्रनवांशस्थाने भूत्वा अष्टमभावे स्थितः स्यात्तर्हि नेत्रविकारेण जातकस्य यमलोकगमनं जायते इति अवगन्तव्यम्। वर्गोत्तमांशस्थः अष्टमभावस्थः च बुधः गुप्तरोगेण परलोकं प्रेषयति। तद्यथा[4] -

**मित्राश्रयस्थो यदि सोमपुत्रो मृत्युं विधत्ते हृदयप्रकोपात्।**
**मित्रस्य भागेऽक्षिरुजा नराणां वर्गोत्तमस्थस्त्वथ गुह्यरोगा**त्॥

तदग्रे- शत्रुक्षेत्रस्थः अष्टमक्षेत्रस्थः बुधः दृढबन्धनेन मरणं कारयति। सोमपुत्रः शत्रुनवांशस्थः सन् रन्ध्रभावे संस्थितः चेत् उदररोगात् देहावसानं जायते। मूलत्रिकोणस्थः सन् छिद्रभावस्थः बुधः अङ्घ्रिव्रणेन व्यक्तेः सवर्गवासः आदेश्यः।

**बृहस्पतितः मरणलक्षणानि-**

सुरगुरुः उच्चस्थः अष्टमस्थः यदि भवति चेत् तर्हि मनुष्यस्य मरणं विविधरोगाणां सङ्क्रमेण भवति। मृत्युभावे गुरुः स्थितः भवेत् एवं सः मृत्युभावः गुरोः उच्चनावांशक्षेत्रमपि स्यात्। एतादृशसन्दर्भे पितृदोषकारणात् जातकस्य मरणं भवेत् अथवा समीपवर्तिजनकारणात् मरणं भवेत्। षड्वर्गशुद्धः देवेज्यः अष्टमस्थः तर्हि श्रवणरोगकारणात् व्यक्तेः स्वर्गवासः भवेदिति वाच्यम्।

गुरुः यदि स्वनीचस्थः अष्टमस्थश्च भवति चेत् नरस्य मरणं स्वजनहस्तात् जायते। छिद्रभावस्थस्सन् नीचनवांशस्थः गुरुः भवेत् चेत् पुरुषस्य मरणं विषाग्निकारणात् सम्भवति। पापग्रहवर्गस्थः इन्द्रमन्त्रेः संस्थित्या अतिसाररोगात् जन्तोः देहावसानं वाच्यम्। मित्राश्रयस्थः देवमन्त्री रन्ध्रभावे स्थितः चेत् स्वसेवकात् जातकस्य विनाशः भवति इति वाच्यः। मित्रनवांशस्थः गुरुः रुधिरप्रकोपात् यमपुरगमनं आदेश्यम्। अङ्गिराः अष्टमभावे भूत्वा वर्गोत्तमे यदि स्थितः तर्हि वनिताप्रसङ्गात् मृत्युर्जायते। अष्टमभावस्थः रिपुक्षेत्रस्थः गुरुः कोपात् मरणं प्राप्नोति। देवमन्त्री रन्ध्रक्षेत्रस्थः सन् शत्रुनवांशे स्थितः

4. वृद्धयवनजातकम्, पृ.सं. - 328

यदि भवति चेत् मस्तिष्कविकारेण मरणमाप्नोति। यदि सुरगुरुः अष्टमस्थः सन् मूलत्रिकोणे स्थितः, तर्हि बहुभक्षणेन निधनं भवति।

**शुक्रात् निधनपरामर्शः-**

गुरूक्तमरणलक्षणानि प्रदर्श्य शुक्रात् निधनचिन्तनं विमृश्यते। शुक्रः पराभवक्षेत्रे स्थितस्सन् स्वोच्चक्षेत्रे भवति चेत् पिपासकारणात् नरस्य विनाशः वाच्यः। अत्र जातकवशात् योगस्य प्रदर्शनं क्रियते योगानुसारं जातकेऽस्मिन् शुक्रः अष्टमभावे उच्चक्षेत्रे च संस्थितः वर्तते। अतः लक्षणानुगुणं जातकः पिपासकारणात् मरणं प्राप्नोति इति दैवज्ञैः वक्तव्यम्। तदग्रे - तुङ्गनवांशस्थः अष्टमभावस्थः दैत्यगुरुः शोषात् मृत्युमेति। षड्वर्गशुद्धः शुक्रः अष्टमभावे स्थितः चेत् मानसिकदुःखकारणात् जातकस्य मरणं ज्ञेयम्। नीचाश्रितः दैत्यगुरुः रन्ध्रे संस्थितश्चेत् गुरुसन्निपातरोगात् मरणं विधत्ते। नीचांशकस्थः अष्टमस्थः शुक्रः वक्त्ररोगात् मृत्युकारकत्वं सिद्ध्यति। पापग्रहाणां वर्गे संस्थिते शुक्रे वनप्राणिद्वारा निधनं सम्भवति। यदि भृगुसुतः मित्राश्रयस्थः अष्टमभावस्थश्च भवति तर्हि अहिदंशनात् व्यक्तेः परलोकवासः भविता इति निगदितुं शक्यते।

जातके शुक्रः स्वमित्रक्षेत्रे बुधक्षेत्रे संस्थितः सन् अष्टमभावस्थः भवेत्तदा मनुष्यस्य मरणं सर्पदंशनात् जायते इति वक्तुं शक्यम्। सुहृत् नवांशस्थः रन्ध्रक्षेत्रस्थः सितः विषकण्टकेन निधनमाप्नोति। आस्फुजित् यदि वर्गोत्तमनवांशस्थः आयुभावस्थः संस्थितः तर्हि लूतेण सङ्क्रमितरोगकारणतः मानवस्य मृत्युः भवेदिति वक्तव्यम्। शत्रुराशिस्थः अष्टमस्थः भृगुजः विषकण्टकेन परलोकं प्रेषयति। एवं शत्रुनवाशस्थः चेत् सुरतप्रकोपात् मरणं जायते। तथैव मूलत्रिकोणराशिस्थः अष्टमस्थः भृगृजः प्रचुरप्रकोपात् देहावसानं सम्भवति इति दैवज्ञैः वक्तव्यम्। एवं शुक्रात् मृत्युपरामर्शः।

**शनितः मृत्युकथनम्-**

मन्दः तुङ्गगतः अष्टमगतश्चेत् अतिबुभुक्षाकारणात् मृत्युमवाप्नोति मानवः। स्वतुङ्गभागे यदि असितः स्थितः तर्हि गुरुलंघनेन तथा षड्वर्गे शुद्धः मन्दः अष्टमे स्थितः चेत् प्रायोपवेशनेन मरणं सम्भवति। प्रायोपवेशः इत्यनेन मानवः स्वेच्छया अन्नपानादिकं त्यक्त्वा प्राणान् त्यजति इत्यर्थः। प्रायः सन्यासिनः एतादृशमार्गं अनुसरन्तः इच्छामृत्युं प्राप्नुवन्ति। तदेवोक्तं [5]–

**शनैश्चरस्तुङ्गगतोऽष्टमस्थो मृत्युं विधत्तेऽतिबुभुक्षया च।**
**तुङ्गस्य भागे गुरुलंघनेन प्रायोपवेशाद्रसवर्गशुद्धः॥**

तदग्रे- नीचाश्रितः छिद्रक्षेत्रस्थः अर्कजः निजबन्धुवर्गात् मृत्युमवाप्नोति। स एव ग्रहः नीचनवांशस्थः सन् आयुभावे संस्थितश्चेत् शत्रुहस्तात् मरणं प्राप्नोति। यदि शनिः पापग्रहमध्यस्थः चेत् वीर्यक्षयेण दौर्बल्यकारणेन च मरणं प्राप्नोति। शनिः मित्राश्रयस्थः अष्टमस्थः चेत् त्वक्-विकारेण मनुष्यस्य परलोकगमनं जायते। मित्रभागस्थः रविजः पिटकविकारेण मृत्युं विधत्ते तथा वर्गोत्तमस्थः चेत् व्रणवैकृतेन मृत्युं विधत्ते। तथा हि- आर्किः शत्रुराशिस्थः आयुभावस्थः तर्हि वाजिपादघातात् निधनं यातीति

5. वृद्धयवनजातकम्, पृ.सं. - 331

वक्तव्यम्। स एव शनिः शत्रुभागस्थः चेत् गजकारणात् मनुष्यस्य मृत्युः सम्भवति। मूलत्रिकोणस्थः अर्कजः अष्टमस्थः चेत् गर्दभकारणात् मृत्युं प्राप्नोति। इति शन्युक्तमरणलक्षणानि।

**निष्कर्षः –**

अत्र ग्रन्थोक्तरीत्या योगाः प्रतिपादिताः सन्ति चेदपि योगेषु वैविध्यं अथवा लक्षणेष्वपि वित्यासः भवितुमर्हति। यतो हि उक्तविषयान् अतिरिच्यापि मरणचिन्तनार्थं अन्ये विषयाः अपि मनसि निधाय फलानि वक्तव्यानि। अन्यविषयाः इत्यनेन भावचिन्तनम्, भावेशस्य लक्षणानि, भावेशस्य दृष्टिः युतिः च, भावकारकस्य प्रभावः, दृष्टिः, भावकारकस्य स्थितिः, राश्याधिपः, उक्तराशेः उपरि शुभग्रहाणां दृष्टिः इत्यादीनां विषयानां सुष्ठु अवलोकनेन दैवज्ञः फलानि वदेत्। तथैव ये मरणयोगाः निरूपिताः, तेषां नियमानुगुणं परिहारादिकं च प्रदिपाद्य जीवस्य संरक्षणार्थम् अवश्यं प्रयत्नः विधेयः। तद्वदेव यथा पूर्वं प्रसिद्धं यत् ज्योतिश्शास्त्रं केवलं पथप्रदर्शकशास्त्रं वर्तते। मनुष्यस्य मरणं शीघ्रं भवति उत विलम्बेन भवति इति तस्य कर्मानुगुणं निर्धारितं भवति। एवं एतान् विषयान् मनसि निधाय दैवज्ञेन सम्यक् परामर्श्य फलानि वक्तव्यानि। इत्थं सप्तानामपि ग्रहाणां विविधस्थलेषु संस्थित्या मरणलक्षणं चारुतया मया प्रतिपादितमित्यलम्।

**अनुशीलितग्रन्थसूची –**

1) प्रश्नमार्गः, चौखम्बा संस्कृत सीरीज्, वाराणासी

2) आचार्य मीनराजविरचितम्, वृद्धयवनजातकम्, रञ्जन पब्लिकेशन्स, देहली

**सुभाषितम्**

**धर्मः पिता क्षमा माता दया भार्या गुणाः सुताः।**
**कुटुम्बं सुधियस्तस्य ह्येतदन्ये तु विभ्रमाः ।।**

अर्थात् - बुद्धिमान् व्यक्ति के लिए - धर्म पिता के समान होता है, क्षमा माता के समान होती है, दया पत्नी के समान होती है, सद्‌गुण पुत्र के समान होते हैं। यही सभी बुद्धिमान् पुरुष के कुटुम्ब होते हैं। अन्य सारे सम्बन्ध बुद्धिमान् पुरुष के लिए सांसारिक भ्रम के समान होते हैं।

# ज्यौतिषशास्त्रे कूर्मचक्रविचारः

**डॉ. भूपेन्द्रनारायणझाः**
सहायकाचार्यः (ज्योतिषविभागः)
राजकुमारीगणेशशर्मा-संस्कृत-विद्यापीठम्
कोलहन्टा पटोरी, दरभङ्गा (बिहार)846003
e.mail- bhupendra31978@gmail.com
मोबाईल न0 -7781089532

**प्रस्तावना-**

विदितमेवैतद्यद् भारतीयज्योतिषशास्त्रं शाखात्रयात्मकं सुधीभिराम्नातमिति सर्वैर्जायत एव। तत्र तिस्रः शाखा निगदिताः सिद्धान्तशाखा, होराशाखा संहिताशाखा च। सिद्धान्ते ग्रहगणितादिहोरायां जातकस्य शुभाशुभभाविफलम्, संहितायां च विविधाः दैवज्ञशास्त्रीयविषयाः प्रपञ्चिताः वर्तन्ते। इदानीं दैवज्ञाः देशस्य राष्ट्रस्य वा बालकस्य-बालिकायाः जन्मपत्रिकां निर्माय शुभाशुभफलं वदन्ति, तद् शास्त्रीयमेव प्रतिभाति। ज्योतिषशास्त्रग्रन्थेषु राष्ट्रदेशयोर्जन्मपत्रिकानिर्माणस्य अनिर्दिष्टत्वात् तयोश्चाऽजातत्वात् च्छाश्वतत्वाच्च। देशविशेषस्य किं वा राष्ट्रविशेषस्य भविष्यफल- ज्ञानायसंहितायामनेके विषयाः ग्रहचारादिकामः निरूपिताः सन्ति। "कस्यचिद्देशस्यराष्ट्रस्यनगरविशेषस्य वा शुभाशुभं भाविफलं संहिता विषयैर्निश्चित्तयाऽऽकलनीयमितिशास्त्रमतम्।[1]" किं कार्यम्, केन कार्यम्, अपि न कदा कार्यमितिविषये शास्त्रप्रमाण्यमङ्गीकरणीयम्। यथोक्तं श्रीमद्भगवद्गीतायाम्[2] -

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।**
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**कृत्वाशास्त्रविधानोक्तं कर्मकर्तुमिहार्हसि।।** इति ।।

अस्योपयोगिता- अतः जातकशास्त्रे वर्णिता जन्मपत्रिरचना देशराष्ट्रनगराणां कृते अशास्त्रीयत्वान्न युज्यते। देशराष्ट्रनगराणां भाविफलज्ञानाय संहितायां ग्रहचारः, विशिष्टनक्षत्रचारः, रोहिणीशकटभेदनयोगः, कूर्मचक्रविभागः, ग्रहभक्तियोगः, ग्रहयुद्धयोगः, स्वातीयोगः, आषाढीयोगः, दिग्दाहोल्कापरिवेषेन्द्रायुध-गन्धर्वनगरोत्पातयोगः प्रतिसूर्यलक्षणञ्चेत्यादयो विषया वरीवर्तन्ते।

कूर्मचक्रस्य वर्णनं बृहत्संहितायां, गर्गसंहितायां, नारदसंहितायां, नारदीयमहापुराणे, नरपतिजयचर्यायां, कूर्मपञ्चकस्योल्लेखः प्राप्यते। तत्र कूर्मचक्रद्वारेण पृथिवी देशनगरक्षेत्रगृहाणां विचारो विधीयते। एतस्मात् पञ्चकूर्मचक्राणि तत्र निरूपितानि वर्तन्ते।

(क)पृथिवीकूर्मचक्रम् ।

1. राष्ट्री भाग- 2 ,पृ.-291,11-12 अंकौ , ख्रीष्टाब्द 2014 , डा. वृजेशकुमारशुक्लः,
2. श्रीमद्भगवद्गीता , अ. -16 , श्लोकौ -23-24 ,

(ख) **देशकूर्मचक्रम् ।**

(ग) **नगरकूर्मचक्रम् ।**

(घ) **क्षेत्रकूर्मचक्रम् ।**

(ङ) **गृहकूर्मचक्रम् ।**[3]

संहितासु केवलं पृथिवीकूर्मचक्रस्य वर्णनमुपलभ्यते। कदाचिन्मूलभूतस्यैतत्कूर्मचक्रस्यैव विस्तारो देशनगरक्षेत्रगृहकूर्मचक्रत्वेनाऽकारि नरपतिजयचर्याकृता। आदौ विभिन्नसंहितासु निरूपितस्य पृथिवीकूर्मचक्रस्य वर्णनमत्र क्रियते।

**(1) पृथिवीकूर्मचक्रविभागः-**

संहितासु सम्पूर्णस्य जगतः शुभाशुभविचारार्थं कूर्मचक्रे नक्षत्राणां न्यासः प्रकीर्तितः। कूर्माङ्ग-विभागेन तत्र देशानां स्थितिर्निगदिता। कूर्मचक्रप्रसङ्गे कथितं यदेतस्य कूर्मचक्रस्य वर्णनं कोशलागमे विहितमेतज्ज्ञानेन देशस्य राष्ट्रस्य वा विप्लवः सम्यक्तया ज्ञातुं शक्यः। तद्यथा-

**कूर्मचक्रं प्रवक्ष्यामि यदुक्तं कोशलागमे ।**
**यस्य विज्ञानमात्रेण जायते देशविप्लवः ।।**[4]

पृथिव्यां मध्यप्रदेशे सुमेरु पर्वतोऽस्ति, यस्मिन् त्रयस्त्रिंशत्कोटिसंख्यकाः देवाः निवसन्ति। सुमेरुसदृशा अष्टौ पर्वताः सागराः द्वीपाश्च भूमौ दरीदृश्यन्ते। वराहावतारे भगवता विष्णुना स्वदंष्ट्रया अरैषाऽधारि। तत्र वराहभगवता शेषनागमस्तके यथा पृथिवी धृताऽऽसीत्तथैव न्यधायि पुनश्च शेषोऽपि कुण्डलीरूपो भूत्वा कूर्मपृष्ठे तस्थौ।[5] एतस्य कूर्मस्य वपुः वारो दशशंखमितयोजनात्मकस्तत्र कथितः। एतदर्थं पुच्छं पुच्छार्द्धं कुक्षिद्वयं सायुतकोटिमिताग्रीवा, कोटिसंख्यमुभयोर्नेत्रयोरस्य मध्यान्तरम्, कोटिद्वयं मुखम् चतुष्कोटिप्रमाणस्य पदयोः, नखाङ्गुलीनां प्रमाणं च दशयोजनात्मकं मन्यते। आदियामलागमे कूर्मस्यैतत्प्रमाणं निगदितं वर्तते।[6] अस्य कूर्मस्योपरि सप्तद्वीपयुता पृथिवी स्थिता। सर्वावयवसंयुक्तस्य कूर्मस्य मुखं पूर्वदिशि पुच्छञ्च पश्चिमायां कूर्मचक्रे लेखनीयम्। तद्यथा-

**तस्योपरि स्थिता तत्र सप्तद्वीप युता मही ।।**
**कूर्माकारं लिखेच्चक्रं सर्वावयवसंयुतम् ।**
**पूर्वभागे मुखं तस्य पुच्छं पश्चिममण्डले ।।**[7]

बृहत्संहितायां लिखितं यत् भारतदेशस्य नवधा विभाजनं कृत्वा तत्तद्विभागेषु कूर्माङ्गानि कल्पनीयानि। कृत्तिकातस्त्रीणि-त्रीणि नक्षत्राणि तत्तद् विभागरूपेषु कूर्माङ्गिषु निधाय तत्र देशकल्पनां कुर्यात्।

---

3. नरपतिजयचर्या स्वरोदयः पृ. -109-114 ,
4. नरपतिजयचर्या स्वरोदयः पृ. -109 , श्लोकः -01 ,
5. नरपतिजयचर्यास्वरोदयः कूर्मचक्रम् श्लोकः -2-6 ,
6. नरपतिजयचर्यास्वरोदयः कूर्मचक्रम् श्लोकः- 6-10,
7. नरपतिजयचर्यास्वरोदयः कूर्मचक्रम् श्लोकः- 11-12 ,

**नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधाः।**
**भारतवर्षेमध्यप्रागादिविभाजिता देशाः ।।** [8]

गर्गसंहितायां पृथिव्याः नवधा विभागाः करणीयास्तत्र, मध्यदेशतोऽष्टदिक्षु त्रिनक्षत्रन्यासः कृत्तिकादितः प्रकल्पनीय इत्युक्तम्। तद्यथा-

**कृतिकाद्यैस्त्रिनक्षत्रैर्भवर्गैर्नवभिः क्षितिः ।**
**कल्पिता मध्यदेशादौ प्रागादिक्रमयोगतः ।।** [9]

नारदसंहितायामपि कूर्मचक्रविभागे धराया नव विभागा कृताः-

**प्राङ्मुखस्य तु कूर्मस्यनवांगेषु धरामिमाम् ।**
**विभज्य नवधा खण्डमण्डलानि प्रदक्षिणम् ।।** [10]

इत्थं विज्ञायते यत्कूर्मचक्रस्य प्रयोगः संहितासु द्विधा दरीदृश्यते, सर्वा याः पृथिव्याः जगतो वा नवधा विभाजनं, देशविशेषस्य नवधा विभाजनञ्च । यत्र पृथिव्याः नवधा विभागं कृत्वा कूर्माङ्गेषु नक्षत्रन्यासं विधीयते। संहिताकारैः कूर्मचक्रे देशविभाजनं भारतवर्षमवलम्व्य विहितम्। कृतिकानक्षत्रतस्त्रीणि त्रीणि नक्षत्राणि विभागेषु स्थातव्याणि। नारदसंहितायां कूर्मस्य नाभिमण्डले अन्तर्वेदी ( गंगा-यमुनयोर्मध्यभागः ) पाञ्चालप्रदेशः वर्तते इति लिखितम्। तद्यथा-

**"अन्तर्वेदी च पाञ्चालं तस्येदं नाभिमण्डलम्" ।**

पराशरेण भारतवर्षस्य मध्यदेशे आर्यावर्त आयातीति कथितं ततश्च वराहमिहिरोक्ता देशा एतस्याऽऽर्यावर्तस्य जनपदाः सन्तीयुक्तम।[11] नारदीयपुराणेऽपि-

**अन्तर्वेदाः पाञ्चाला मध्यभाग ईरिताः ।।** [12]

नरपतिजयचर्यायां कथितं यत्कूर्मस्य मध्यभागे साकेत-मिथिला-चम्पा-कौशाम्बी- कौशिकी-गया-अतिच्छत्र-विन्ध्यान्तर्वेदीमेखला-कान्यकुब्ज-प्रयागा वर्तन्ते। यदि कृत्तिकादित्रये शनिः अन्यः कश्चित् पापग्रहो वा स्यात्तर्हि समुद्भूतदेशेषु विप्लवाः भवन्ति। अथवा देशा नश्यन्ति। तद्यथा-

**कृत्तिका रोहिणी सौम्य कूर्मनाभिगतं त्रयम् ।**
**साकेतं मिथिला चम्पा कौशाम्बी कौशिकी तथा ।।**
**अहिच्छत्रं गया विन्ध्यमन्तर्वेदी च मेखला ।**
**कान्यकुब्जं प्रयागश्च मध्यदेशो विनश्यति ।।** [13]

गर्गसंहितायामपि लिखितमेतादृशमेव-

---

8. बृहत्संहिता अध्यायः-14, श्लोकः -01 ,
9. बृहत्संहिता भट्टोत्पलटीकायां, प्रथमभागे गर्गसंहितोद्धरणम् पृ.सं.-259 ,
10. नारदसंहिता 36-01 ,
11. बृहत्संहिता भट्टोत्पलटीकायां, प्रथमभागे-260 ,
12. नारदीय महापुराणे पूर्वभागे 56/740 ,
13. नरपतिजयचर्यायाम्, कूर्मचक्रम्- श्लोकौ – 16-17

**कृत्तिकाद्यस्त्रिनक्षत्रो मध्यदेशे गणो यदा ।**

**पापैरूपहतो हन्ति मध्यदेश खिलांस्था ।।** [14]

एवमेव कूर्मस्य नाभिमण्डले मध्यभागे देशानां तत्रस्थ नक्षत्राणाम् अत्र ज्योतिस्संहितानुसारेण उल्लेखः कृतः।

**(2)मुखमण्डलम् (पूर्वभागः)-**

पूर्वस्यां दिशि कूर्मस्य मुखमण्डले नक्षत्राणि त्रीणि वर्त्तन्ते- आर्द्रापुनर्वसुपुष्यानि। वराहमिहिरेण पूर्वदिशायां ये देशाः सन्ति। तेषां नामानि बृहत्संहितायाम् उद्धृानि सन्ति। तद्यथा-

**अथ पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः ।**

**व्याघ्रमुखसुह्मकर्वटचान्द्रपुराः शूर्पकर्णाश्च ।।**

**खसमगधशिबिर गिरिमिथिल सम तटोड्राश्ववदनदन्तुरकाः ।**

**प्राग्ज्योतिष लौहित्यक्षीरोदसमुद्रपुरुषादाः ।।**

**उदयगिरिभद्रगौडक पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः ।**

**एकपदताम्रलिप्तक कोशलका वर्धमानाश्च ।।** [15]

बृहत्संहिताग्रन्थस्य चतुर्दशाध्याये कूर्मस्य मुखमण्डलं भारतवर्षस्य पूर्वदिशायां विराजते। नारदसंहितायां मगधलाटादिदेशाः पूर्वभागे कथिताः। तद्यथा-

**प्राच्यां मागधलाटिदेशास्तनमुखमण्डलम् ।** [16]

**रौद्रं पुनर्वसुः पुष्यं कूर्मस्य शिरसि स्थितम् ।**

**सगौडो हस्तिबन्धश्च पञ्चराष्ट्रं च कामरूः ।।**

**चरेन्द्री च तथा ज्ञेया मगधश्च तथैव च ।**

**रेनातटं च नेपालः पूर्वदेशो विनश्यति ।।** [17]

**(3)दक्षिणबाहुमण्डलम् (आग्नेयभागः)**

आग्नेयदिशि कूर्मस्य दक्षिण-बाहुमण्डलं वर्तते। तत्राऽऽश्लेषामघापूर्वाफाल्गुनीति नाम धेयानि त्रीणि भानि न्यस्तानि। आग्नेयदिशायां ये देशाः संस्थितास्तेषां नामानि विस्तरतया बृहत्संहिताकारेण समुधृतानि।[18] बृहत्संहितापेक्षया समाससंहितायामाग्नेयदिशि स्थितानां देशानां नामान्यधिक स्पष्टतया उल्लिखितानि सन्ति। तद्यथा-

आश्लेषाद्येत्रिपुरी निषादराष्ट्राणिचेदिकदशार्णाः ।

---

14. बृहत्संहिता भट्टोत्पलटीका, प्रथमभागे पृ.- 249 ,
15. बृहत्संहितायां अ.-14 ,श्लोकाः-5-6-7,
16. नारदसंहितायाम्-36/02 ,
17. नरपतिजयचर्यायाम् कूर्मचक्रम् -18-19 श्लोकौ
18. राष्ट्री भाग-2, 11-12 अंकौ , पृ.-295,डा. बृजेशकुमारशुक्लः

**शूलिकविंध्यान्तः स्था वत्सान्ध्रविदर्भकालिंगाः ।।**[19]

**स्त्रीकलेय किराताख्य देशास्तद्वाहुमण्डलम् ।**

**स्त्री कलिंग किराताख्या देशास्तद्वाहुमण्डलम् ।।**

नारदसंहितायां कूर्मस्य दक्षिणबाहुमण्डले स्त्रीकलेयकिरातनामधेयाः देशाः,कलिंगदेशः, किरात-देशश्चोल्लिखिताः स्त्रीदेशाः ।

**(4)दक्षिणकुक्षिमण्डलम् (दक्षिण-भागः)**

दक्षिणस्यां दिशि कूर्मस्य दक्षिणकुक्षिमण्डलं राराज्यते। एतस्मिन्नुत्तराफाल्गुनी-हस्त-चित्रे-ति नक्षत्रत्रयमभिन्यस्तम्। वराहमिहिरेण दक्षिणदिशायां बहवो देशा वर्णिता।[20]

उज्जयिनीभरुकच्छादिशा च याम्यार्णवो यावत् कूर्मस्य दक्षिणकुक्षिमण्डले अवन्तीद्राविड-भिल्लदेशाः स्थिताः इत्युक्तं नारदसंहितायाम्। कथितं नारदमहापुराणेऽपिः-

**अवन्तीद्रविडाभिल्लादेशास्तत्पार्श्वमण्डलम् ।।**[21]

**उत्तराहस्तचित्राश्चदक्षिणां कुक्षिमागतः ।**

**दर्दुरं च महेन्द्रं च वनवासं ससिंहलम् ।।**

**तापीभीमरथीलंका त्रिकूटं मलयस्तथा ।**

**श्रीपर्वतश्च किष्किन्धा इति नश्यन्ति दक्षिणे ।।**[22]

**एवं कूर्मस्य दक्षिणपार्श्वमण्डले देशाः समाख्याताः ।**

**(5)दक्षिणपादमण्डलम्(नैर्ऋत्यभागः)-**

नैर्ऋत्यदिशायां कूर्मस्य दक्षिणपादे स्वातीविशाखा अनुराधाख्यानि त्रीणि नक्षत्राणि संस्थितानि। नैर्ऋत्यदिशि स्थितानां देशानामुल्लेखो वराहमिहिरेणैवमकारि –

**नैर्ऋत्यां दिशि देशाः पह्लवकाम्बोज सिन्धुसौवीराः ।**

**वडवामुखारवाम्बष्ठ कपिलनारी मुखानर्ताः ।।**

**फेणगिरि यवन मार्गरकर्ण प्रावेयपारशव शूद्राः ।**

**बर्वर किरातखण्ड क्रव्यादाभीरचंचूकाः ।।**

**हेमगिरिसिन्धु कालकरैवतक सुराष्ट्रबादरद्रविडः ।**

**स्वात्याद्ये भत्रितये ज्ञेयश्च महार्णवोऽत्रैव ।।**[23]

नारदसंहितायां कूर्मस्य दक्षिणपादमण्डले देशाः सन्ति गौंडकोंकण शाल्वेष्टपुण्ड्राः।

---

19. बृहत्संहिता भट्टोत्पलकृतटीकायां , पूर्वभागे पृ.- 267 ,
20. बृ.सं.अ.-14,श्लोकाः 11-16
21. नारदीयपुराणे पूर्वभागे-26/742 ,
22. नारदीयपुराणे पूर्वभागे-26/742 ,
23. बृहत्संहिता अ.14 ,श्लोक- 17-19 ,

नारदपुराणे कथितम् गौंडकौंकणशाल्वाङ्गपौण्ड्रस्तत्पादमण्डलम्[24] नरपतिजयचर्यायां दक्षिणपादमण्डले कूर्मस्य ये देशाः स्थानं लेभिरे। तेषां नामान्युद्धृतानि -

**स्वातीविशाखामैत्रं च कूर्मे नैऋतिगोचरे ।**
**नासिक्यं च सुराष्ट्रं च धृतमालवकं तथा ।।**
**पर्पली च प्रकाशश्च भृगुकच्छं च कोंकणम् ।**
**खेटापुरं च मोटेरं देशा नश्यन्ति तादृशाः ।।[25]**

**(6) प्रच्छमण्डलम् (पश्चिमभागः)-**

कूर्मचक्रस्य पश्चिमभागे कूर्मस्य पुच्छं वर्तते। तत्र ज्येष्ठामूलपूर्वाषाढाः इत्याख्यानि त्रीणि नक्षत्राणि समारोपितानि। अत्र स्थितानां देशानामुतजनपदानां नामानि वृहत्संहितायां समुल्लिखितानि सन्ति। तद्यथा-

**अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः ।**
**अपरान्तकशान्तिकहैह्य प्रशस्ताद्रिवोक्काणाः' ।**
**पञ्चनदरमठपारततारक्षितिजङ्गवैश्यकनकशकाः ।**
**मर्यादाम्लेच्छा ये पश्चिमदिक्स्थितास्ते च ।। [26]**
**ज्येष्ठामूलं तथाषाढा पुच्छे कूर्मस्य संस्थिताः ।**
**पारावतं मरुत्कच्छमवन्ती पूर्वमालवम् ।।**
**पाराशरं बर्बरं च द्वीपं सौराष्ट्रसैन्धवम् ।**
**जलस्थाश्च विनश्यन्ति स्त्री राज्यं पुच्छपीडने ।। [27]**

नारदसंहितायां पुच्छभागे सिन्धुकाशीमहाराष्ट्रसौराष्ट्रदेशाः स्थिताः इति कथितम् ।

**"सिन्धुकाशीमहाराष्ट्रसौराष्ट्राः पुच्छमण्डलम्"** ।

यद्यपि वराहमिहिरेण काशिदेशो मुखमण्डले पूर्वस्यां दिशि पठितः। किन्तु नारदसंहिता-नारदपुराणयोः काशीदेशः पश्चिमायां पुच्छे समुद्धत इति महान् दोष आपद्यते। कदाचित् काशिदेशः कश्चिदन्यः पश्चिमभागे पुरारेजे तस्यैवोल्लेखोऽत्रविहितः। वराहमिहिरेणाऽत्र समाससंहितायां देशाभिधानेषु नोल्लेखकाशिदेशम्।

**(7) वामपादमण्डलम् (वायव्यभागः)-**

वायव्याशयां कूर्मस्य वामपादमण्डलं विराजते। तत्रोत्तराषाढश्रवणधनिष्ठाभानि विहितानि। बृहत्संहितायां वराहमिहिरो देशाः जनपदांश्चाह-

**दिशिपश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः।**

24. नारदसंहितायाम् -36/03 ,
25. नारदमहापुराणे -56/742
26. बृहत्संहिता अ. -14, श्लोकौ -20-21 ,
27. नरपतिजयचर्यायाम् कूर्मचक्रप्रकरणम् 27-28 श्लोकौ,

**अश्मककुलूतहलडाः स्त्रीराज्यनृसिंहवनखस्थः ।।**
**वेणुमती फल्गुलुकागुलुहा मरूकुच्छचर्मरंगाख्याः ।**
**एक विलोचनशूलिक दीर्घग्रीवास्य कोशाश्च ।।** [28]

नारदसंहितायां भीष्मदेशस्य स्थानेऽत्र चीनदेशोऽभ्यधायि नारदपुराणकृता। नरपतिजयचर्यायां कूर्मस्य वामपादे गुर्जरयामुनमरुसरस्वती-जालन्धरवराटमेरुश्रृंगादिदेशाः प्रकल्पिताः। पीडने सति देशा एते पीडामनुभवन्ति उत्तराषाढभत्रीणि वायव्यगोचरे। नरपतिजयचर्यायां कूर्मचक्रप्रकरणे श्लोकोऽस्ति-

**गुर्जराह्वंयामुनं च मरुदेशं सरस्वती ।**
**जालन्धरं वराटं च वालुकोदधि संयुतम् ।।**
**मेरुश्रृंगं विनश्यन्ति ये चान्ये कोण संस्थिताः ।।''**

**(8) वामकुक्षिमण्डलम् (उत्तरभागे)**

त्रीणि नक्षत्राणि शततारकपूर्वाभाद्रपदोत्तराभाद्रपदाख्यानि कूर्मस्य वाम-कुक्षिमण्डले सौम्यभागे वर्तन्ते। बहवो देशाः बृहत्संहितायामुक्ताऽध्याये (14) श्लोक 24-28, विस्तरभियाऽत्र न ते सर्वे समुच्यन्ते। नारदसंहितानुसारमेव नारदमहापुराणेऽप्यभिहितम्। नरपतिजयचर्यायां समुद्धतं यत् कूर्मस्य वामकुक्षिमण्डले नेपालकीर-काशमीर गृंजतखुरसानमाथुरम्लेच्छदेश खश-केदारमण्डल-हिमालयश्रितदेशाः वर्तन्ते । एषु-त्रिषु नक्षत्रेषु पीडितेषु देशा इमे पीडायुक्ता भवन्ति।

**शतभादित्रयं चैव उत्तरां कुक्षिमाश्रितम् ।**
**नैपालं कीर काश्मीरं गृजनं खुरसानकम् ।।**
**माथुरं म्लेच्छ देशश्च खशं केदारमंडलम् ।**
**हिमाश्रयाश्च नश्यन्ति देशा ये चोत्तराश्रिताः ।।** [29]

मुखमण्डलेऽपि कूर्मस्य नेपालदेश उल्लिखितस्ततश्चाऽत्रपि वाम कुक्षिमण्डले संस्थितः कथिता नेपालदेशस्य। कदाचित् पूर्वनेपालदेशोऽथ चोत्तरनेपालदेश उक्तौ स्तः।

**(9) वामबाहुमण्डलम् (ईशानभागः)**

**अभिसारदरदतंगणकुलूत सैरिन्ध्रवनराष्ट्राः ।।**
**ब्रह्मपुरदार्वडामरवनराज्यकिरातचीन कौणिन्दाः ।**
**भल्लाः पटोल जटासुरकुनट खसघोषकुचिकाख्याः।।**
**एकचरणानुविद्धाः सुवर्णभूर्वसुधनं दिविष्टाश्च।**
**पौरवचीरनिवासित्रिनेत्रमुंजाद्रि गान्धर्वाः।।** [30]

ईशानकोणे कूर्मस्य वामबाहुमण्डलं विराजते, तत्रेवत्याश्विनीभरणीनाम धेयानि त्रीणि नक्षत्राण्यभिन्यस्त सन्ति। ईशानदिशायां देश विभागो बृहत्संहितायामेवमभिहितः.......... ऐशान्यां

28. बृहत्संहिता अ.14 ,श्लोक- 22-23 ,
29. नरपतिजयचर्यायाम् कूर्मचक्रे -31-32 श्लोकौ,
30. बृहत्संहिता अ. -14 ,श्लोकौ -29-31,

मेरुकनष्टराज्य पशुपालकीरकाश्मीर। नरपतिजयचर्यायाम् –

**रेवती अश्विनी याम्यं पादे ईणानगोचरे ।**
**गंगाद्वारं कुरुक्षेत्रं श्रीकंठं हस्तिनापुरम् ।।**
**अश्वचक्रैकपादाश्च गजकर्णास्तथैव च ।**
**विनश्यन्ति च ते सर्वे शनावीशान गोचरे ।।**[31]

नक्षत्राणां त्रिके पापग्रहस्थितिवशात् फलाफलं तेषां देशानां ज्ञायते, यद्योक्तं- नारदसंहितायाम्-

**कृत्तिकादीनिधिष्ण्यानि त्रीणि त्रीणि क्रमान्न्यसेत् ।**
**नाभेर्दिक्षु नवांगेषु पापैर्दुष्टं शुभैः शुभम् ।।**[32]

वराहमिहिरेणाऽवोचि यत् कृत्तिकादित्रये पांचाल नृपः, आर्द्रादित्रये मागाधिक- राजा, आश्लेषादि-त्रये कालिंगः, उत्तराफाल्गुन्यादित्रये आवन्तः, स्वात्यादित्रये आनर्त्तः। ज्येष्ठादित्रये सिन्धुसौवीरः, उत्तराषाढादित्रये हारहौरराजा, शतभिषादित्रये मद्राधिपः, रेवत्यादित्रये च कौणिन्दनृपो मरणं याति। तद्यथा-

**वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः ।**
**पाञ्चालो मागधिकः कालिङ्गश्च क्षयं यान्ति ।।**
**आवन्तोऽथानर्त्तोमृत्युं चायाति सिन्धुसौवीरः ।**
**राजा च हारहौरो मद्रेशोऽन्यश्च कौणिन्दः ।।**[33]

नरपतिजयचर्यायां लिखितं यद् यस्मिन् देशे शनेवेधो प्रतिर्वा कूर्मचक्रवशाद् भवेतस्य देशस्य यत्नेन रक्षां कुर्यात्। परदेशे चेच्छनिः स्यातर्हि तस्योपरि राजाऽऽक्रमणं विधाय तं देशं जयेत्। यस्य देशस्य नाम नक्षत्रे शनिः स्यात्तस्याऽवश्यमेव छत्रभंगो जायते।

एतत् पृथिवीकूर्मचक्रमभिधाय सर्वाः ज्योतिषसंहिता विरामत्वमुपगताः। परन्तु नरपतिजयचर्यायां कूर्मचक्रस्य देशनगरग्रामक्षेत्रगृहवशादन्ये भेदाः निगदितास्तेऽत्र समासेनोच्यन्ते।

**(10) देशकूर्मचक्रविभागाः-**

कूर्मचक्रं पूर्ववद् लिखित्वा देशनामनक्षत्राणि त्रीणि त्रीणि निधाय पश्येत्तत्र शनैश्चरः कश्चिद् पापग्रहो वा भवेद् तस्मिन् स्थाने नगरे वा महान् क्लेशो भविष्यतीति चिन्तयेत्। पृथिवी कूर्मचक्रवन्नगरे कूर्म विलिख्य तन्नगरे नक्षत्रतस्त्रीणि-त्रीणि धिष्ण्यानि मध्ये नाभ्यादौ न्यासीकृत्य विचारयेद् यद् यत्र शनैश्चरस्य युतिः स्याद् वेद्यो वा भवेत्तत्र स्थानेऽवश्यमेव किञ्चिद् दुर्घटनं सम्पद्यते। तद्यथाः-

**नगरे नागरं धिष्ण्यं कृत्वादौ विलिखेत्ततः ।**
**सौरिस्थाने भवेदुष्टं वेधस्थाने तथैव च ।।**[34]

31. नरपतिजयचर्यायाम् कूर्मचक्रम् -33-34 श्लोकौ
32. नारदसंहिता 36/06
33. बृहत्संहिता अ. -14, श्लोकौ -32-33 ,
34. कूर्मचक्रम् , नरपतिजयचर्यायाम् श्लोकः-39 ,

**(11) क्षेत्रकूर्मचक्रविभागः-**

कस्मिश्चिद् विशेषक्षेत्रेऽथवा सस्यक्षेत्रे कूर्मचक्रं प्राच्यादिक्रमेण साङ्गं विलिख्य क्षेत्रं नक्षत्रस्त्रीणि नक्षत्राणि मध्यभागे विनिक्षिप्य शेषाणि भानि यथा क्रममंगेषु विन्यासी कर्तव्यानि। यत्र शनैश्चरो वेधते, गोचरतां वाऽऽयाति तत्र क्षेत्रे विनाशोभयञ्च जायते-

**क्षेत्रजे क्षेत्रभान्यादौ कृत्वा कूर्मं यथास्थितम् ।**
**सौरिस्थाने विनाशः स्याज्जायते च महद्भयम् ।।** [35]

गृहद्वारे कूर्मस्यमुखं निधाय गृहनाम त्रीणि-त्रीणि गृहमध्येऽवस्थाप्य पुनः कूर्माङ्गमुखादिक्रमेण त्रीणि-त्रीणि भानि स्थापनीयानि। ततश्च शने गोचरवशाद् वेधवशाच्चशुशाशुभं जानीयात् –

**गृहकूर्मं समालिख्यं गृहद्वारमुखस्थितम् ।**
**गृहनामर्क्षपूर्वन्तु कृत्वा वीक्ष्यं शुभाशुभम् ।।** [36]

नरपतिजयचर्यायां गृहकूर्मस्याङ्गविभागे शनेर्युतिवेधयोर्वशाच्छुभाशुभं निरूपितं वर्तते। यदि शनिर्गृहमध्येऽस्ति तर्हि शोकसन्तापो भवति। द्वारे वज्रपातः, महानसेऽग्निस्थाने वाग्निभयदायी, दक्षिणं मृत्युप्रदो, राक्षसभयं नैर्ऋत्ये च करोति। पश्चिमे शनिः शुभप्रदो, वायव्ये शून्यदोऽर्थदश्चोत्तरे भवति। शनिरीशानकोणे स्थितश्चेतर्हि सर्वसिद्धि प्रदाता भवेत्। यदि शनिर्वलिष्ठः स्यातर्हि प्रचुरतया दुष्टं फलं प्रयच्छति स्वल्पवीर्यश्च शुभतां ददाति। तद्यथा श्रीमन्नरपतिकविविरचितम्-

**गृहमध्यगतः सौरिः शोकसन्तापकारकः ।**
**द्वारे विद्युतप्रदोज्ञेयः पावके वह्निदायकः ।।**
**ज्ञेयोमृत्युप्रदो याम्ये राक्षसे राक्षसाद्भयम् ।**
**वारुणे शुभदो ज्ञेयो वायव्ये शून्यताप्रदः ।।**
**अर्थलाभप्रदः सौम्ये शांभवे सर्वसिद्धिदः ।**
**सौरिर्बलाधिको दुष्टः स्वल्पवीर्यः शुभावहः ।।** [37]

एकमत्र गृहकूर्मचक्रस्य विभागे शनिवशात् फलमुक्तम् ।

**(12) ग्रामकूर्मचक्रविभागः-**

**ग्रामकूर्म समालिख्य ग्रामनामर्क्षपूर्वकम् ।**
**पूर्ववद्यत्रगः सौरिर्मध्यादौ भंगमादिशेत् ।।** [38]

इत्थं कूर्मचक्रस्य पञ्चकस्योल्लेखं कृत्वा नरपतिजयचर्यायां कथितं यद् कूर्मपञ्चके एकस्मिन्नेव स्थाने सौरिःस्यात्तदा तत्स्थानस्य विनाशो भंगो वाऽवश्यम्भावी मन्यते। कूर्मचक्रजनितोपद्रवशान्तये शान्तिकर्माणि यानि यामलतन्त्रे लिखितानि तानि सम्पादनीयानि वर्तन्ते। अनेन स्वल्पविघ्ना भवन्ति

35. नरपतिजयचर्यायाम्, कूर्मचक्रे- श्लोकः-41
36. नरपतिजयचर्यायाम्, कूर्मचक्रे- श्लोकः-42
37. नरपतिजयचर्यायाम्- कूर्मचक्रे श्लोकौ-43-45
38. नरपतिजयचर्यायाम्- कूर्मचक्रे श्लोकः-40

विप्लवशान्तिर्वा भवतीति। संहितासु कूर्मचक्रप्रसङ्गे वेधस्योल्लेखोनाऽभूत्। परन्तु नरपतिजयचर्याग्रन्थे कथितं यद् पूर्वप्रतीच्यां, सौम्यदक्षिणे, ईशाननैर्ऋत्यां, वह्निकोणवायुकोणे च वेधो भवेत्।

**पूर्वापरं लिखेद्वेधं वेधं चोत्तरदक्षिणे ।**
**ईशानराक्षसे वेधं वेधमाग्नेय मारुते ।।**[39]

**निष्कर्षः—**

इत्थं पृथिव्यां देशे नगरे, ग्रामे, क्षेत्रे, गृहे वा कूर्मचक्रं विलिख्य तत्र कूर्माङ्गेषु उक्तक्रमेण नक्षत्रन्यासं परिकल्प्य शन्यादिपापग्रहवशाच्छुभाशुभफलं विचारयेत्। यदि शनेरुपरि पापग्रहाणामुपरि वा बृहस्पते वेधो भवेदथवा यत्र शनिस्तत्र गुरोर्युतिश्च स्यात्तर्हि पापग्रहस्य शनेर्वाऽशुभफलत्वं क्षीणतां ब्रजति न्यूनत्वं वा याति। शुभाशुभं संसारस्य पृथिव्याश्च संहितोक्तदिशा कूर्मचक्रेण ज्ञातव्यमिति समेषां विपश्चितां पुरातनदैवज्ञानां च मतमत्र सुष्ठु प्रपंचितम्। जैनीयभद्रबाहुसंहितायां कूर्मचक्रस्योल्लेखो न प्राप्यते। अत एव जैन-बौद्धयोः ज्योतिषशास्त्रस्य प्रचारो नाऽऽत्सीदिति सम्यगुररीकर्तुं शक्यते तत्संहितासु कूर्मचक्रस्याऽनुपलब्धत्वादिति।।

-सुभषितानि-

**ज्ञानैर्मनो वपुर्वित्तैः नियमैरिन्द्रियाणि च।**
**नित्यं यस्य प्रदीप्तानि स तपस्वी न वेषवान्।।**

(यशस्तिलकचम्पू- ८/४१२)

अर्थात - वास्तविक तपस्वी वही है जिसका मन ज्ञान से, शरीर शुद्ध चित्त से तथा इन्द्रियां संयम से सुशोभित हैं। कोई भी व्यक्ति केवल वेषभूषा से तपस्वी नहीं होता है।

**चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्।**
**प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नुते।।**

(मैत्र्युपनिषद् - ०१/०६)

अर्थात - अपने चित्त की प्रसन्नता से मनुष्य शुभ एवं अशुभ कर्मों का विनाश करता है तथा प्रसन्न आत्मा रहकर कभी विनष्ट नहीं होने वाला सुख भोगता है। अतः प्रसन्न रहें।

39. नरपतिजयचर्यायाम्, कूर्मचक्रे- श्लोकः-13

भास्करोदयः ISSN - 2278-0815

# भास्कराचार्योक्तस्वयंवहयन्त्राणि

**गिरीशभट्टः बि**
सिद्धान्तज्यौतिषशास्त्रे विद्यावारिधि(Ph.D)-शोधच्छात्रः
ज्योतिष-वास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
दूरभाषसङ्ख्या – 8277210178, 6361249486
अणुवाग् (E-mail) : bhatgirish1997@gmail.com

**दिवाकरशर्मा**
आचार्यः (PG) – सिद्धान्तज्यौतिषशास्त्रम्,
ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आन्ध्रप्रदेशः)
दूरभाषसङ्ख्या – 9459470255, 9817270255
अणुवाग् (E-mail) : diwakar.samskritam@gmail.com

**शोधसारः-** स्वयं वहतीति स्वयंवहः। यद्यन्त्रं स्वयमेव वहति (चलति) तत् स्वयंवहयन्त्रम्। स्वयंवहयन्त्राणां पुनः पुनः हस्तेन चालनस्य आवश्यकता न भवति। एकवारम् एतानि यन्त्राणि चालयामश्चेत् यदा वयं बलात् स्थगयामस्तावत्पर्यन्तं तानि यन्त्राणि नैरन्तर्येण चलन्ति । एतादृशयन्त्राणाम् अन्तः स्थाप्यमानानां पादरसादिधातूनां घर्षणतत्त्वमेव अस्य कारणम्। भारतीयसिद्धान्तज्यौतिषग्रन्थेषु एतादृशानां केषाञ्चन स्वयंवहयन्त्राणाम् उल्लेखं वयं द्रष्टुं शक्नुमः। भास्कराचार्येण सिद्धान्तशिरोमणेः गोलाध्यायान्तर्गतस्य यन्त्राध्यायस्यान्ते आहत्य त्रीणि स्वयंवहयन्त्राणि कथितानि। तेषां स्वयंवहयन्त्राणां स्वरूपाणि वैशिष्ट्यानि प्रयोजनानि च शोधपत्रेऽस्मिन् आवाभ्यां सचित्रं विमृष्टानि ।

कूटशब्दाः – यन्त्रम्, स्वयंवहयन्त्रम्, पादरसः, सुषिरः, आरः

**प्रथमं स्वयंवहयन्त्रम्-**


**लघुदारुजसमचक्रे समसुषिराराः समानान्तरा नेम्याम् ।**
**किञ्चिद्वक्रा योज्याः सुषिरस्याधः पृथक् तासाम् ॥**
**रसपूर्णे तच्चक्रं द्व्याधाराक्षस्थितं स्वयं भ्रमति ।** [1]

ग्रन्थिकीलरहितं लघुदारुमयं भ्रमयन्त्रेण सिद्धं चक्रमेकं कार्यम्। तस्मिन् चक्रे मध्यभागे एकः सुषिरः कार्यः। तस्मिन् सुषिरे समप्रमाणाः समसुषिराः समतौल्याः(समानभाराः)समानान्तराः आराः चक्रस्य नेम्यां परिधौ योज्याः। ते च आराः नन्द्यावर्तपुष्पवत् एकत एव(एकस्मिन्नेव पार्श्वे)किञ्चिद्वक्राः भवेयुः। ततः तेषु सर्वेष्वपि आरेषु विद्यमानानां सुषिराणां द्वारा आराणाम् अर्धभागाः पादरसेन पूर्णाः कार्याः। एवम् आरेषु पादरसं क्षिप्त्वा, आराणां रन्ध्राणि मुद्रितानि कार्याणि। एवं कृते सति अभीष्टं स्वयंवहयन्त्रं सिद्धं भवति। तस्य यन्त्रस्य निरन्तरं स्वयं भ्रमणे यथा सौकर्यं भवेत् तथा तद्यन्त्रम् आधारद्वयेन अवलम्बितं कार्यम्।

1. सिद्धान्तशिरोमणिः, गोलाध्याये यन्त्राध्यायः- श्लोकसङ्ख्या ५०, ५०१/२

एतत् स्वयंवहयन्त्रम् एकवारं हस्तेन चालयामश्चेत् यदा वयमेतद्यन्त्रं बलात् स्थगयामस्तावत्पर्यन्तमिदम् अयस्कारशाणवत् निरन्तरं भ्रमति। एवम् अस्य यन्त्रस्य स्वयंभ्रमणे इयं युक्तिः- यन्त्रस्य चलने आरब्धे सति यन्त्रस्य एकस्मिन् भागे पादरसः आरमूलं प्रविशति, अन्यभागे च आराग्रं प्रति धावति। एवम् आरमूलात् आराग्रं यावत् निरन्तरं पादरसस्य चलनात् यन्त्रे घर्षणमुत्पद्यते। तेन घर्षणेन आकृष्टं यन्त्रं निरन्तरं स्वयं भ्रमति।

एवमस्य यन्त्रस्य स्वयंभ्रमणे पादरसचलनात् जायमानं घर्षणतत्त्वमेव कारणम्। एवम् एतत् स्वयंवहयन्त्रम् अत्यन्तं वैज्ञानिकं वर्तते। अनेन स्वयंवहयन्त्रेण युक्त्या कालादिकं ज्ञातुं शक्नुमः। उदाहरणाय एका युक्तिरत्र लिख्यते- एकस्मिन्नहोरात्रे यन्त्रस्य कति भ्रमणानि जायन्ते इति गणना कार्या। ६० घटिकासु एतावन्ति भ्रमणानि जायन्ते चेत् एकस्य भ्रमणस्य कृते कति घटिकाः अपेक्षिताः? इति त्रैराशिकेन अस्य यन्त्रस्य एकं भ्रमणकालं ज्ञात्वा ततो युक्त्या उदयादीष्टकालं ज्ञातुं प्रभवामः।




**चित्रम् १ : स्वयंवहयन्त्रम् – १**

द्वितीयं स्वयंवहयन्त्रम्

**उत्कीर्य नेमिमथवा परितो मदनेन संलग्नम् ॥**
**तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत्तावत् ।**
**यावद्रसैकपार्श्वे क्षिप्तजलं नान्यतो याति ॥**
**पिहितच्छिद्रं तदतश्चक्रं भ्रमति स्वयं जलाकृष्टम् ।**[2]

ग्रन्थिकीलरहितं लघुदारुमयं भ्रमयन्त्रसिद्धं चक्रमेकं कार्यम् । अस्य चक्रस्य नेमिं (परिधिं) भ्रमयन्त्रेण समन्तादुत्कीर्य द्व्यङ्गुलमात्रं सुषिरस्य वेधो विस्तारश्च यथा स्यात्तथा कार्यः। ततस्तस्य सुषिरस्योपरि तालपत्रादिकं[3] मदनेन[4] संलग्नं कार्यम्। एवं कृतं चक्रं द्वयाधाराक्षस्थितं कार्यम्। अर्थात् द्वयोराधारयोः अक्षमेकं प्रोतं कृत्वा तस्मिन्नक्षे तच्चक्रमवलम्बितं कार्यम् । अस्य चक्रस्य उपरिभागस्थनेम्यां तालदलं (तालपत्रं) विध्वा सुषिरः (रन्ध्रः) कार्यः। तस्मिन् रन्ध्रे पादरसः तावत् क्षेप्यो यावत् सुषिरस्य अधोभागः पादरसेन मुद्रितो भवेत्। अपरस्मिन् पार्श्वे जलं प्रक्षिपेत्। नेम्याः उपरिभागे कृतस्य रन्ध्रस्य एकस्मात् पार्श्वात् चक्रस्य अर्धभागं पादरसेन प्रपूरयेत्, तथा अपरस्मात् पार्श्वात् चक्रस्य अपरमर्धभागं जलेन प्रपूरयेदित्यभिप्रायः। एवं चक्रार्धं पादरसेन, चक्रार्धञ्च जलेन प्रपूर्य नेम्याः उपरिभागे कृतं छिद्रं (रन्ध्रं) पिहितं कार्यम्। यद्यपि जल-पादरसावुभावपि जलपदार्थौ तथापि पादरसस्य गुरुत्वात् (सान्द्रतायाः आधिक्यात्) जलेन साकं पादरसो मिश्रितो न भवति। अतः एकवारं चक्रं सञ्चाल्यते चेत् पादरस-जलयोर्घर्षणं सञ्जायते। अतो जलेन आकृष्टं तच्चक्रं निरन्तरं स्वयं चलति। यदा पुनः हस्ताभ्यां तस्य चलनस्य स्थगनं क्रियते तावत्पर्यन्तं तच्चक्रं निरन्तरं चलतीत्यभिप्रायः। एवमस्य स्वयंवहयन्त्रस्य निरन्तरभ्रमणे चक्रपरिधेः अन्तः स्थापितयोस्तुल्यप्रमाणयोः पादरस-जलयोर्घर्षणमेव कारणम्। अनेनापि स्वयंवहयन्त्रेण प्रथमस्वयंवहयन्त्रवत् युक्त्या कालादिज्ञानं सम्भवति।




२. सिद्धान्तशिरोमणिः, गोलाध्याये यन्त्राध्यायः- श्लोकसङ्ख्या ५१ तः ५२१/२

३. तालपत्रादिकमित्यादिग्रहणेन तत्सदृशानि सर्वाण्यपि ग्राह्याणि। यथा- आधुनिककाले 'प्लास्टिक्' इत्यादिकमपि अस्य यन्त्रस्य निर्माणसन्दर्भे तालपत्रस्थाने स्वीकर्तुं शक्यते।

४. मदनम् = gum (fevicol etc)

**चित्रम् २ : स्वयंवहयन्त्रम्- २**

चित्रेऽस्मिन् (चित्रम् २),
("ADC " ) "= जलम्"
("ABC " ) "= पादरसः"

**तृतीयं स्वयंवहयन्त्रम्**

**ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य ॥**
**एकं कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखं च बहिः ।**
**युगपन्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति ॥**
**नेम्यां बद्ध्वा घटिकाश्चक्रं जलयन्त्रवत् तथा धार्यम् ।**
**नलकप्रच्युतसलिलं पतति यथा तद् घटीमध्ये ॥**
**भ्रमति ततस्तत्सततं पूर्णघटीभिः समाकृष्टम् ।**
**चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया ॥**[5]


ग्रन्थिकीलरहितं लघुदारुमयं भ्रमयन्त्रासिद्धं चक्रमेकं कार्यम्। तच्चक्रम् आधारद्वयप्रोते अक्षे अवलम्बितं कार्यम्। तस्य समीपे एव जलेन पूर्णं भाण्डमेकं (जलकुण्डमेकं) स्थापयेत्। चक्रस्य नेम्यां (परिधौ) अभीष्टसङ्ख्यामितानि घटिकायणि समानान्तरैः स्थाप्यानि। एवं घटिकायन्त्रैः विन्यस्तं तच्चक्रं जलयन्त्रवत् धार्यम्। ततस्ताम्रादिधातुमयस्य अङ्कुशरूपस्य वक्रीकृतस्य जलपूर्णस्य नलस्य एकमग्रं जलभाण्डे, अपरमग्रं बहिः अधोमुखञ्च एकहेलया (एकस्मिन्नेव समये) यदि विमुच्यते तर्हि तेन नलेन सकलमपि भाण्डजलं बहिः क्षरति।

नलकप्रच्युतं जलं घटीयन्त्रस्य मुखे यथा पतति तथा यन्त्रामिदं संस्थापितम् । एवं घटीयन्त्रोपरि जलपातेन यदा उपरिस्थितघटीयन्त्रं (नलकाभिमुखस्थघटीयन्त्रं) जलपूर्णं भवति तदा अधः आयाति। सर्वाण्यपि घटीयन्त्राणि समानान्तरैः स्थापितानीत्यतः तदानीमन्यत् घटीयन्त्रं नलकाग्राभिमुखमागच्छति। एवं निरन्तरमनुवर्तते । एवं घटीयन्त्राणामुपरि जलपातात् घर्षणतत्त्वं समुत्पद्यते। तेन घर्षणतत्त्वेनाकृष्टं तच्चक्रं निरन्तरं स्वयं वहति।

अत्र चक्रात् भूमौ पतितं जलं पुनः कुण्डं प्रति यथा याति तथा चक्राधोभागात् कुण्डपर्यन्तं प्रणालिकायाः व्यवस्था कल्प्यते चेत् कुण्डस्थं (भाण्डस्थं) जलं रिक्तमेव न भवति । एवं व्यवस्थाकरणेन कुण्डे मुहुर्मुहुः जलस्थापनस्यापि आवश्यकता न भवति ।

---

5. नलम् = रन्ध्रयुक्ता एका पट्टिका (pipe)
सिद्धान्तशिरोमणिः, गोलाध्याये यन्त्राध्यायः- ५३ तः ५६ श्लोकाः




**चित्रम् ३ : स्वयंवहयन्त्रम् – ३**

एवमनेन स्वयंवहयन्त्रेण बहवः चमत्काराः सिद्ध्यन्ति। युक्त्या अस्य स्वयंवहयन्त्रस्य उपयोगं कुर्मश्चेत् बहूनि कार्याणि यन्त्रेणानेन सिद्ध्यन्ति। कया युक्त्या अस्य यन्त्रस्य उपयोगः क्रियते चेत् किं कार्यं कर्तुं शक्यते इति यन्त्रधारकैरेव स्वकीयबुद्धिशक्त्या स्वयं ज्ञेयम्।

अनेन स्वयंवहयन्त्रेण कालज्ञानमधोनिर्दिष्टरीत्या सम्भवति।

चक्रे समानान्तरैः विन्यस्तानां घटीयन्त्राणामुपरि १, २, ३, ४ इत्यादिसङ्ख्याः स्थाप्याः। एकं घटीयन्त्रं जलेन पूर्णतां यातुं कियत्कालं स्वीकरोतीति वेधः कार्यः। सर्वाणि घटिकायन्त्राणि समानगात्राणि समानान्तराणि चेत्यतः समेषामपि घटीयन्त्राणां जलेन पूर्णतां यातुं स एव कालो भवति। पुनश्च एकस्मिन्नहोरात्रे चक्रे स्थापितानां समेषामपि घटीयन्त्राणां कति भ्रमणानि भवन्तीत्यपि ज्ञातव्यम्। अभीष्टसमये कस्मिन् भ्रमणे कस्मिन् सङ्ख्याके घटीयन्त्रे जलं पतन्नस्तीति ज्ञात्वा तस्मिन् घटिकायन्त्रे कियद्भागो जलेन पूर्णः इति वेधेन ज्ञात्वा अनुपातविधिना कालं ज्ञातुं शक्नुमः।

अनेन स्वयंवहयन्त्रेण न केवलं कालज्ञानं सम्भवति। अन्यान्यपि बहूनि कार्याणि यन्त्रेणानेन सिद्ध्यन्ति। यथा कृषिकर्मणि वृक्षवाटिकायां जलसेचनार्थं यन्त्रमिदम् अधोनिर्दिष्टरीत्या उपयोक्तुं शक्नुमः। तद्यथा-

यन्त्रेऽस्मिन् चक्राधोभागे पतितं जलं प्रणालिकाभिः (drip pipes) सस्यानां मूलेषु यथा गच्छति तथा व्यवस्था क्रियते चेत् प्रत्येकं सस्यस्य समीपं गत्वा जलसेचनस्यावश्यकता न भवति।

एवं यन्त्रेणानेन सस्येभ्यः जलसेचनकार्यं सरलीकर्तुं शक्यते। अनेन समयोऽपि रक्षितो भवति। एवम् अन्यान्यपि बहूनि कार्याणि स्वयंवहयन्त्रेणानेन सिद्ध्यन्ति।

अस्य स्वयंवहयन्त्रस्य निर्माणे बीजम् एवमस्ति- छिन्नकमलस्य कमलिनीनलस्य जलभृद्-भाण्डे क्षिप्तस्य जलपूर्णसुषिरस्य एकमग्रं भाण्डाद्बहिः अधोमुखं द्रुतं यदि ध्रियते तर्हि भाण्डजलं सकलमपि नलेन बहिर्याति। इदं कुक्कुटनाडीयन्त्रमिति शिल्पिनां हरमेखलिनाञ्च प्रसिद्धम्। एनमेव दृष्टान्तं दृष्ट्वा भास्कराचार्येण स्वयंवहयन्त्रमिदमीरितम्। स्वयंवहयन्त्रस्यास्य निर्माणे एषः दृष्टान्त एव (एषा युक्तिरेव) मूलमित्यभिप्रायः।

**युक्तिरहितस्वयंवहयन्त्रणामुपहासः-**

एवं भास्कराचार्येण सिद्धान्तशिरोमणेः गोलाध्यायान्तर्गतयन्त्राध्यायान्ते त्रयाणां स्वयंवह-यन्त्राणां स्वरूपाणि सप्रयोजनं कथितम्। तद्यथा-

**यदधोरन्ध्रनलं तत्सापेक्षत्वात् स्वयंवहं ग्राम्यम्।**
**चतुरचमत्कारकरी युक्तिर्यन्त्रं नहि ग्राम्यम् ॥**
**एवं बहुधा यन्त्रं स्वयंवहं कुहकविद्यया भवति।**
**नेदं गोलाश्रितया पूर्वोक्तत्वान्मयाप्युक्तम् ॥**[६]

इत्याभ्यां श्लोकाभ्यां युक्तिरहितस्वयंवहयन्त्राणामुपहासः कृतः ।

एवं कुहकविद्यया (मायाविद्यया) एतादृशानि स्वयंवहयन्त्राणि बहुधा (बहुप्रकारेण) निर्मातुं शक्यते । आधुनिककाले तु तादृशानि बहूनि यन्त्राण्युपलभ्यन्ते । हस्तघटिका (watch), विद्युत्कोष(battery)चालितयन्त्राणि, विद्युच्चालितयन्त्राणि इत्यादीनि बहून्युदाहरणान्युपलभ्यन्ते आधुनिके काले स्वयंवहानां यन्त्राणाम् । एतावन्त्येव स्वयंवहयन्त्राणाम् उदाहरणानीति वक्तुं न शक्नुमः। आधुनिके जगति नूतननूतनस्वयंवहयन्त्राणाम् आविष्कारो विज्ञानिभिः प्रत्यहं क्रियमाणोऽस्ति।

प्राचीनभारतीयैरपि बहूनि स्वयंवहयन्त्राणि निर्मितानि। केचन आचार्यास्तु, "ताम्रादि...." इत्युक्तरीत्या एवं क्लेशेन यन्त्रनिर्माणस्य आवश्यकता नास्तीत्यभिप्रयन्ति। केवलम् अधोरन्ध्रयुक्तं नलमेव अलम्, तेनैव कुण्डजलं बहिः पातयितुं शक्यते इति तेषामभिप्रायः। परं तादृशं स्वयंवहं सापेक्षत्वात् ग्राम्यं भवति, यन्त्रपदवीं नाप्नोतीति भास्कराचार्यमतम्। अर्थात् केवलम् अधोरन्ध्रनलमेव क्रियते चेत् तस्मिन् पुनः पुनः जलपूरणस्य अपेक्षा (आवश्यकता) भवति। अतस्तत् सापेक्षं जातम्। अतस्तत् यन्त्रपदवीं नाप्नोतीति भास्कराचार्यस्याशयः ।

यतो हि चतुरचमत्कारकरी युक्तिर्यत्र वर्तते तदेव यन्त्रम्। "**ताम्रादिमयस्याङ्कुशरूप....**" इत्युक्त रीत्या निर्मिते यन्त्रे मध्ये मध्ये पुरुषेण कुण्डे जलपूरणस्य अपेक्षा नास्ति। अतस्तद्यन्त्रं निरपेक्षम्। यतो हि तत्र प्रणालिकया स्वयमेव कुण्डे जलं पूर्यते। तत् चतुरचमत्कारकरं भवति। अतस्तत् यन्त्रपदवीं याति। किन्तु अधोरन्ध्रनले मध्ये-मध्ये पुरुषेण जलप्रक्षेपणस्य अपेक्षत्वात् चतुरचमत्कारो नोत्पद्यते

---

६. सिद्धान्तशिरोमणिः- गोलाध्यायः- यन्त्राध्यायः- ५७, ५८ श्लोकौ

इत्यतः तद्यन्त्रं न भवति, केवलं ग्राम्ययुक्त्या निर्मितं साधनमेव (उपकरणमेव) भवति।

अतो भास्कराचार्येण तानि ग्राम्ययुकत्या निर्मितान्युपकरणानि परित्यज्य चतुरचमत्कारकराणि त्रीणि स्वयंवहयन्त्राण्येवात्र कथितानीत्यस्माभिरवगन्तव्यम्। किन्तु तानि स्वयंवहयन्त्राणि कुहकविद्यया भ्रमन्ति। एषु स्वयंवहयन्त्रेषु गोलयुक्तिर्नास्ति। अर्थात्तानि यन्त्राणि गोलाश्रयिणो न भवन्ति। गोलस्थ-ग्रहभ्रमणस्य, एतेषां स्वयंवहयन्त्राणाञ्च न कोऽपि सम्बन्धः। तथाप्यत्र गोलाध्याये कुतः तानि स्वयंवहयन्त्राणि भास्कराचार्येण ईरितानीति जिज्ञासायाः समाधानमपि स्वयं भास्कराचार्येणैव दत्तम्- "पूर्वोक्तत्वान्मयाप्युक्तम्" इति । अर्थात् पूर्वाचार्यैः स्वस्वसिद्धान्तग्रन्थेषु एतादृशानि स्वयंवहयन्त्राणि नैकानि निरूपितानि। अत एव पूर्वसिद्धान्तकाराणां क्रममेवानुसृत्य मयापि त्रीणि स्वयंवहयन्त्राण्यत्र यन्त्राध्यायान्ते उल्लिखितानीत्युक्त्वा भास्कराचार्येण यन्त्राध्यायः उपसंहृतः। एतेषां स्वयंवहयन्त्राणां भ्रमणं कालानुसारं स्वबुद्ध्या विधातव्यमित्यध्याहार्यम् ।

**निष्कर्षः**- यानि यन्त्राणि हस्तेन चालनं विना स्वयमेव भ्रमन्ति तानि स्वयंवहयन्त्राणि इत्युच्यन्ते। आधुनिककाले विद्युच्चालितानि स्वयंवहयन्त्राणि नैकान्युपलभ्यन्ते। परं प्राचीन-कालेऽपि पादरसादिधातूनामुपयोगेन स्वयंवहयन्त्राणि निर्मान्ति स्मेति सिद्धान्तज्यौतिषग्रन्थेषु स्वयंवहयन्त्राणामुल्लेखाद्वयं ज्ञातुं पारयामः। भास्कराचार्येण सिद्धान्तज्यौतिषस्य मेरुग्रन्थ इत्येव प्रथिते सिद्धान्तशिरोमणिग्रन्थे गोलाध्यायान्तर्गतयन्त्राध्यायस्यान्ते त्रीणि स्वयंवहयन्त्राणि ईरितानि। तेषां स्वयंवहयन्त्राणां स्वरूपाणि वैशिष्ट्यानि प्रयोजनानि च शोधपत्रेऽस्मिन् आवाभ्यां विमृष्टानि। तेषां स्वयंवहयन्त्राणां स्वरूपाणां स्पष्टावबोधाय तेषां चित्राण्यपि निर्माय आवाभ्यां शोधपत्रेऽस्मिन् संलग्नं कृतानि। जिज्ञासवः शोधपत्रमिदं पठित्वा भास्कराचार्योक्तस्वयंवहयन्त्राणां स्वरूप-वैशिष्ट्य-प्रयोजनानि सुष्ठुतया ज्ञास्यन्तीति भावयावः।

**सन्दर्भग्रन्थसूची**

**सिद्धान्तसम्राट्,** ग्रन्थकर्ता- जगन्नाथसम्राट्, प्रथमसंस्करणम्, संस्करणवर्षम्- सा.यु.१९७६, प्रकाशनसंस्था- संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम् (मध्यप्रदेशः)।

**सिद्धान्तशिरोमणिः**-श्रीमद्भास्कराचार्यप्रणीतः, स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञ-कृत् वार्त्तिकोपेतश्च; सम्पादकः- डॉ.मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम्- सा.यु.२०१०; प्रकाशनसंस्था- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

**सिद्धान्तसार्वभौमः,** द्वितीयो भागः, ग्रन्थकर्ता- मुनीश्वरः, प्रकाशनवर्षम्- सा.यु.१९३५, प्रकाशनसंस्था- राजकीयसंस्कृतमहाविद्यालयः, वाराणसी।

**सिद्धान्ततत्त्वविवेकः**- प्रथमो भागः, ग्रन्थकर्ता- कमलाकरभट्टः, व्याख्याकारः- श्रीगङ्गाधरशर्मा, द्वितीयसंस्करणम्, संस्करणवर्षम्- सा.यु.२०१७, प्रकाशनसंस्था- सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी।

**सिद्धान्तशेखरः,** ग्रन्थकर्ता- श्रीपतिः, व्याख्याकारः- सत्यदेवशर्मा, प्रकाशनसंस्था- चौखम्बा कृष्णदास अकादमी, वाराणसी

**सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः**- लेखकः- डॉ.प्रेमकुमारशर्मा, संस्करणम्ः सा.यु. २००५, प्रकाशनसंस्था- नागप्रकाशनम्, नवदेहली।

**अर्वाचीनं ज्योतिर्विज्ञानम्,** ग्रन्थकर्ता- श्रीरमानाथसहायः, प्रकाशनवर्षम्- सा.यु.१९९६; प्रकाशनसंस्था- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

**ज्योतिर्विज्ञानम्,** ग्रन्थकर्ता- धूलिपाल अर्कसोमयाजी, प्रकाशनवर्षम्-सा.यु.१९६४; प्रकाशन- संस्था- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

**ज्योतिष-सिद्धान्त-मञ्जूषा,** ग्रन्थकर्ता- डॉ.विनयकुमारपाण्डेयः, संस्करणवर्षम्- सा.यु.२०२०; प्रकाशनसंस्था- चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

**मन्दशीघ्रफलसाधनसमीक्षा,** ग्रन्थकर्ता- विद्यावाचस्पतिः डॉ.रामजीवनमिश्रः, प्रथम- संस्करणम्- सा.यु.२००५, प्रकाशनसंस्था- ठाकुरप्रकाशनम्।

**सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः**, लेखनं सम्पादनञ्च-डॉ.सुराकान्तझा, प्रथमं संस्करणम्, संस्करणवर्षम्- सा.यु.२००९, प्रकाशनसंस्था- चौखम्बा कृष्णदास अकादमी, वाराणसी।

**सूर्यसिद्धान्तः** (आर्षग्रन्थः), व्याख्याकारः- श्रीकपिलेश्वरशास्त्री, संस्करणवर्षम्, सा.यु.२०१५, प्रकाशनसंस्था- चौखम्भा संस्कृतभवनम्, वाराणसी।

म.म.सुधाकरद्विवेदिप्रणीतया **'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः**, सम्पादकः- विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी, द्वितीयं संस्करणम्, संस्करणवर्षम्- सा.यु.२०१६, प्रकाशनसंस्था- सम् पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

भास्करीयगोलमीमांसा, प्रधानसम्पादकः- प्रो. वाचस्पतिउपाध्यायः, लेखकः- प्रो. देवीप्रसाद त्रिपाठी, सम्पादकः- प्रो. रमेशकुमारपाण्डेयः, संस्करणम्- सा.यु.२०१०, प्रकाशनसंस्था- श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृतविश्वविद्यालयः, नवदेहली।

**उपपत्तीन्दुशेखरः**, महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः- श्रीगिरिजाप्रसादद्विवेदी, संस्करणम्- सा.यु.२००८, प्रकाशनसंस्था- भारतीयबुक कारपोरेशन, नवदेहली।

## सुभाषितम्

**प्रारब्धानि च जीवेन भोक्तव्यानि सुलोचने। प्रायश्चित्तेन नश्यन्ति वर्तमानानि भामिनि॥**
**सञ्चितानि तथैवाशु यथार्थं विहितेन च। प्रारब्धकर्मणां भोगात् सङ्क्षयो नान्यथा भवेत्॥**

(श्रीमद्देवीभागवत महापुराण, स्कन्ध-४,अध्याय- २१)

अर्थात- हे सुन्दर नेत्रों वाली देवकी! जीव को प्रारब्ध कर्म का फल तो भोगना ही पड़ता है। हां, वर्तमान वाले तो प्रायश्चित्त से नष्ट हो जाते हैं, साथ ही विहित प्रायश्चित्त से सञ्चित भी तत्काल नष्ट हो जाता है किन्तु (प्रायश्चित्त अथवा भोग के अतिरिक्त) अन्य किसी उपाय से प्रारब्धकर्म फल का क्षय नहीं होता है, उसे अवश्य भोगना पड़ता है।

भास्करोदयः ISSN – 2278-0815

# जीर्णोद्धारविधिः

**डॉ. चित्तरञ्जननायकः**
सहायकाचार्यः
ज्योतिषवास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आन्ध्रप्रदेशः
दूरभाषा- 7008411287

**उपविषयाः-** 1.जीर्णाद्यार्च्चादोषनिरूपणम् 2.जीर्णोद्धाराय कालशुद्धिः 3.जीर्णोद्धारे प्राक्प्रमाणभ्रष्टे फलम् 4.जीर्णोद्धाराय (गृहभूषणाय) अविचारणीयाः विषयाः 5.शिवलिङ्गोद्धारविधिः 6.अचालनीयशिवलिङ्गम् 7. शिवलिङ्गवदन्येषां देवानामपि समानाः नियमाः 8.सूर्यायतनोद्धारविधिः 9.जीर्णपातनविधिः 10.जीर्णे प्रयोज्याप्रयोज्यपदार्थाः 11.जीर्णोद्धाराय बालस्थापनविधिः 12.वज्रलेपविधिः 13.जीर्णोद्धारस्य प्रतिष्ठाकाल- निर्णयः 14.जीर्णगृहप्रवेशकालविचारः 15.जीर्णोद्धारफलम्।

**1.जीर्णाद्यार्च्चादोषनिरूपणम्-**

दग्धा जीर्णा च भग्ना च स्फुटिता चापि देवता।
स्थिता वा स्थाप्यमाना वा सदा दोषकरा भवेत्।।
खण्डिता स्फुटिता दग्धा यस्मादर्चाभयावहा।
तस्मात्समुद्धरेत्तां तु यथेष्टविधिना नरः।।
दग्धामर्च्चा अनावृष्टिं जीर्णामर्च्चा धनक्षयम्।
भग्नामर्च्चा कुले नाशं स्फुटितां युद्धमादिशेत्।।[1]

**पूजायोग्यजीर्णमूर्तिलक्षणम् –**

अतीताब्दशता या स्यान्मूर्तिः स्थाप्या महत्तमैः।
खण्डिता स्फुटिताप्यर्च्चा अन्यथा दुःखदायिका।।17।।[2]

**जीर्णोद्धारात्पूर्वं ज्ञातव्याः विषयाः -**

भूपरिग्रहणे चैव वास्तुविद्याविशारदैः।
वास्तुस्थानं पुरा ज्ञात्वा खनेच्चैवं प्रदक्षिणम्।।10।। [3]

**जीर्णोद्धाराय कुशली शिल्पी -**

शास्त्रज्ञः कुशलो दक्षो वास्तुविद्यानिबोधकः। सूत्रधारो महाप्राज्ञः षट्कर्मसु निरन्तरम्।। [4]

---

1. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः श्लो.सं. ५-७
2. देवतामूर्तिप्रकरणम् 1-27
3. अपराजितापृच्छा, कूर्मप्रमाणपदप्रतिष्ठाध्यायः श्लो.सं. १०
4. अपराजितापृच्छा, जीर्णप्रासादलक्षणाध्यायः श्लो. सं. २१

**आचार्यपूजनम् -**

आचार्यः शिल्पिनां पूज्यो वस्त्रालङ्कारसयुतैः।
तैश्चापि सर्वयुक्तैश्च स गच्छेत् देवसङ्कुलम्।।4।।
देवपूजां ततः कृत्वा क्षेत्रपालादिसंयुताम्।
दिक्पालेभ्यो बलिं दद्यात् वास्तुदेवेभ्य एव च।।5।।
जलदेवान् स्थलदेवानूर्ध्वस्थांस्तलवासीनः।
पूजां बलिं समाप्यैतान् प्रणिपत्य क्षमापयेत्।।6।।

**2. जीर्णोद्धाराय कालशुद्धिः-**

उत्तरायणमासे तु पूर्वपक्षे विशेषतः।
कर्तानुकूलनक्षत्रे वेधवैनाशिकं विना।।16।।
जीवदृष्टिबलैर्युक्ते शुभदृष्टिसमन्विते।
तस्मात् सर्वप्रयत्नेन जीर्णोद्धारणमाचरेत्।।17।।

**जीर्णोद्धारे माससुद्धिः -**

जीर्णोद्धारे जलाग्न्यादिभयतः पतिते गृहे।
श्रावणोर्जे तथा माघे कारयेत्सुखदं गृहम्।।61।।

अर्थात् जलेन अग्निना वा जीर्णजातस्य गृहस्य उद्धारः श्रावण-कार्तिक-माघमासेषु क्रियते चेत् गृहपतिः सुखं प्राप्स्यति।

देवालयं तडागञ्च वाटिकोद्धरणं गृहम्।
गृहमासोदितं शस्तं माघेऽपि मुनिसत्तम।।62।।

देवालय-तडाग-वाटिकादीनाम् उद्धारणाय माघमासः प्रशस्त इति मुनीनामुपदेशः।

तृणदारुगृहारम्भे मासदोषो न विद्यते।
पाषाणेष्ट्यादिगेहानि निन्द्यमासे न कारयेत्।।63।।

**बृहद्वास्तुमालायाम् -**

शस्तं पशुगृहं ज्येष्ठे चाश्विने धान्यनीडकम्।
पानीयशालिका माघे चैत्रे धारागृहं तथा।।64।।[5]

(ज्येष्ठे पशुगृहम्, आश्विने धान्यगृहम्, माघे पौशाला (पौ = पानीय), चैत्रे धारागृहम् गङ्गादीनां नदीतटवर्तिनां गृहम्)

**रामदैवज्ञमतेन गृहारम्भमासाः -**

कैश्चिन्मेषरवै मधौ वृषभगे ज्येष्ठे शुचौ कर्कटे
भाद्रे सिंहगते धटेऽश्वयुजि चोर्जेऽलौ मृगे पौषके-।

5. बृहद्वास्तुमाला, गृहाप्रवेशविचारः श्लो.सं. ६४

माघे नक्रघटे शुभं निगदितं गेहं तथोर्जे न सत्
कन्यायां च तथा धनुष्यपि न सत्कृष्णादिमासाद्भवेत्।।

**निन्द्यमासाः -**

त्यक्त्वा कुजार्कयोश्चांशं पृष्ठे चाग्रे स्थितं विधुम्।
बुधेज्यराशिगं चार्कं कुर्याद् गेहं शुभाप्तये।। (बृ.वा.गृहारम्भविधिः)

**मासशुद्धिः तथा शिलान्यासादिर्नापेक्षते इति च्यवनवचनम् -**

आयव्ययौ मासशुद्धिं चिन्तयेन्न तृणालये ।
शिलान्यासादि न कुर्यात्तथागारे पुरातने ।।49।।

**कूपादीनां जीर्णोद्धारमुहूर्त्ताः -**

शशांकतोयांशकसर्पमित्रध्रुवाम्बुपित्र्ये वसुरेवतीषु।
उद्यानवाप्यादितडागकूपकार्याणि सिद्ध्यन्ति जलं ध्रुवं स्यात्।।52।।

अर्थात् मृगशीर्षः, पूर्वाषाढा, आश्लेषा, अनुराधा, ध्रुवसंज्ञकनक्षत्राणि, शतभिषक्, मघा, धनिष्ठा, रेवतीनक्षत्रेषु उद्यान, वापी,तडाग, कूपादीनां जीर्णोद्धारः करणीयः। (जलाशयप्रकरणे)

**3.जीर्णोद्धारे प्राक्प्रमाणभ्रष्टे फलम्-**

सङ्कोचे मरणं प्रोक्तं विस्तारे तु धनक्षयः।
तद् द्रव्यं श्रेष्ठव्यं वा तत्कार्यं तत्प्रमाणकम्।।22।।[6]

ततोऽनुक्षाल्यमानेऽपि वास्तुस्थानं न चालयेत्। तद्यथा-

ह्रस्ववृद्धी न कर्तव्ये कृते दोषो महाभयम्।।
पूर्ववास्तु स्थितं त्यक्त्वा तदुपर्यन्यवास्तुकम्।
पूर्वं चेद् विध्यते वास्तु मृत्युः कारावरादिषु।। [7]

अपि च-

पूर्वमानप्रमाणं च कारयेत्तद्विचक्षणः।
तद्रूपं तत्प्रमाणञ्च पूर्वसूत्रं च चालयेत्।।
चलिते चालिते वापि दिङ्मुढे स्थानवास्तुषु।
तस्मात्सर्वप्रयत्नेन पूर्वसूत्रं च चालयेत्।।
चलिते चालिते चैव सूत्रस्थाने च विग्रहम्।
हीने हानिं प्रकुर्वीत चाधिके स्वजनक्षयम्।। [8]

एवमेव-

इच्छेद्यदि एकोद्देशे गृहवृद्धिं समन्ताद्वर्धयेत्तुल्यम् ।

6. अग्निपुराणे- अध्यायः- 103
7. अपराजितापृच्छा, जीर्णप्रासादलक्षणाध्यायः श्लो.सं. ९-१०
8. अपराजितापृच्छा, कूर्मप्रमाणपदप्रतिष्ठाध्यायः श्लो.सं. ७-९

दोषः प्रागथवोत्तरे कार्यम् ।। [9]

**4.जीर्णोद्धाराय (गृहभूषणाय) अविचारणीयाः विषयाः-**

अलिन्दनिर्व्यूहविनिर्गमाद्याश्चतुर्दिशं ये गृहभूषणाय।
आयादिकं तु न चिन्तनीयं यतो न ते वास्तुपरिग्रहाः स्युः।।46।। [10]
आय ऋक्षं गणं चन्द्रं च तुरङ्गा प्रयोजयेत्।
आयव्ययोरंशशुद्धिर्न जीर्णो चिन्तयेत् गृहे।।47।।
दिक्शुद्धिकृते वास्तौ दिङ्मुढवास्तुवेधकृत्।
जीर्णे तु स्थापिते वास्तु वेधदोषो न विद्यते।।48।। [11]

(तल-ताल-तुला-दृष्टि-बाधा-स्तम्भ-मर्म-मार्ग-वृक्ष-छाया-जल-द्वार-स्वर-कील-कोण-भ्रम-कूप-दीपालय-देवस्थानादयः (सकल) विंशति वेधाः जीर्णोद्धारे न विचारणीयाः।)
(8,9,10 वास्तूद्धारधोरणी, द्वितीयाध्यायः)

**5.शिवलिङ्गोद्धारविधिः-**

पूर्वोत्तरदिशामूढं मूढं पश्चिम-दक्षिणे।
तत्र मूढममूढं वा यत्र तीर्थं समाहितम्।।
सिद्धायतनतीर्थेषु नदीनां सङ्गमेषु च ।
स्वयम्भूबाणलिङ्गेषु तत्र दोषो न विद्यते।। [12]

**लिङ्गप्रासादोचितनक्षत्रतस्काद्यंशानयनम् -**

उत्सेधेऽष्टगुणैः सप्तविंशद्भिर्हरणे ततः।
शेषमश्वयुजाद्यं तु नक्षत्रं तु चतुर्गुणे।। [13]
नवभिर्हरणे शिष्टमंशकं तस्करादिकम्।

प्रासादस्य लिङ्गस्य च उच्छ्रायमानस्य (8) अष्टगुणं कृत्वा सप्तविंशतिभिः (27) भागं देयम्। शेषः एकादिक्रमेण अश्विन्यादीनि नक्षत्राणि भवन्ति। नक्षत्रसंख्यां चतुर्भिः संगुण्य नवभिः भाज्यते चेत् शेषः तस्करादयः नव अंशाः भवन्ति। अपि च-

भुक्तिः शक्तिर्धनं राजा षण्डश्चाभयकं विपत्।।
समृद्धिरिति विख्यातान्यंशकानि नव क्रमात्।
तस्करं च विपत् षण्डं निन्दितं वास्तुपारगैः।।37।।[14]

---

9. वास्तुसारसंग्रहः- श्लो.सं. ३७
10. दैवज्ञवल्लभे श्लो.सं. ४६
11. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः- श्लो.सं. ४७-४८
12. वास्तुमण्डनस्य अष्टमाध्यायः श्लो.सं. ९-१०
13. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः श्लो.सं. ३५- ३५ १/२
14. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः श्लो.सं. ३६ - ३७

तत्क्रमेण यथा- 1. तस्करः 2. भुक्तिः 3. शक्तिः 4. धनम् 5. राजा 6. षण्ड 7. अभय 8. विपत् तथा समृद्धि इति। एतेषु नवांशेषु तस्करः, विपत्, षण्डांशाः वर्ज्याः।

उत्तुङ्गे वसुनन्दाग्नि गुणैकांशाष्टभिर्हते।
शेषं धनमृणं चैव योनिकं स्याद्यथाक्रमम्।।
धनाधिकमृणं क्षीणं मानं तत् सम्पदां पदम्।
योनिषु ध्वजसिंहश्च वृषो हस्ती शुभावहाः।।[15]

लिङ्गस्य मन्दिरस्य च उच्छ्रायं पृथक्तया वसुनन्दाग्निभिः संगुण्य यथाक्रमम् अष्टभिः विभाजनीयम्। तच्छेषत्रयं धनख्यं, ऋणाख्यं, योन्याख्यं च ज्ञेयम्।

धनाधिकमृणं क्षीणं मानं तत सम्पदां पदम्।
योनिषु ध्वजसिंहश्च वृषो हस्ती शुभावहाः।।

यदि लिङ्गस्य मन्दिरस्य च प्रमाणं धनादधिकम् ऋणान्युनं तदा सम्पदप्रदायकपदं वाच्यम्। एवं ऋणादधिकं योनितः ऊनं तदा ध्वज-सिंह-वृष-गजयोनीति शुभावहः ज्ञेयः।[16]

**शिवलिङ्गाद्युत्पातफलविचारः-**

अनिमित्तचलनभङ्गस्वेदाश्रुनिपातजल्पनाद्यानि।
लिङ्गार्च्चायतननां नाशाय नरेशदेशानाम्।।

अकारणेन शिवलिङ्गस्य प्रतिमायाः वा चलने, भग्ने, स्वेदनिर्गते, अश्रुपाते तथा अन्याद्भुतलक्षणे सति तस्य देशस्य कष्टं चिन्त्यम्। **अन्यद्विचारः -**

रक्षां विधाय तद्धाम्नि महापाशुपतास्त्रतः।
लिङ्गमन्यत्ततस्तत्र विधिवत् स्थापयेत् गुरुः।।
एष एव विधिः कार्यो जीर्णधामसमुद्धृतौ।
खड्गे मन्त्रगणं न्यस्य कारयेत् मन्दिरान्तरम्।। [17]

**6. अचालनीयशिवलिङ्गम्-**

असुरैर्मुनिभिर्गोत्रस्तन्त्रविद्भिः प्रतिष्ठितम्।
जीर्ण वाप्यथवा भग्नं विधिनाऽपि ना चालयेत्।।[18]

**7. शिवलिङ्गवद् अन्येषां देवानामपि समानाः नियमाः-**

यथा शिवोद्भवं लिङ्गं चालितं भयदं भवेत्।
एवं सूर्यहरिब्रह्मा चालिता भयदाः स्मृताः।।
सर्वभूमण्डलीकाद्यैर्ये देवाः सन्निवेशिताः।

---

15. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः श्लो.सं. ३८ - ३९
16. देवतामूर्तिप्रकरणम् 6,91-93 एवं मयमतम् ३३/ ५८ - ६२
17. अग्निपुराणम्-१०३/२०,२२
18. अग्निपुराणम्-१०३/ २१

**8. सूर्यायतनोद्धारविधिः- (कोणार्कमन्दिरम्)**

यथा शिवस्तथा सूर्यो व्योममर्च्चा विशेषतः।
विभग्नो पूजयेद्यस्तु भोजको भास्करीं तनुम्।।
विशेषतः पद्महीनां स याति नरकं परम्। [19]

शिवलिङ्गस्य शिवालयस्य च जीर्णोद्धारनियमवत् गगने दृश्यमानसूर्यप्रतिमायाः तत्सूर्यप्रासादस्य च समानाः नियमाः पालनीयाः भवन्ति। भोजकेन पूजकेन वा भग्नसूर्यप्रासादे पूजा नैव करणीया। तदपि विशेषतः पद्महीना सूर्यप्रतिमा यदि पूज्यते परमनरकप्राप्तिर्भवतीति नास्ति सन्देहः।

प्रासादं वा जीर्णोद्धारे यस्तु कारयते रवेः।
स याति नराधिपं च सूर्यलोकं न संशयः।। [20]

राजा लाङ्गुलानरसिंहदेवः-

पतितं पतमानञ्च तथार्द्धस्फुटितं तथा
समुद्धृत्य हरेर्वेश्म द्विगुणं फलमाप्नुयात्।। (यथा श्रीजगन्नाथमन्दिरम्)
लोके परिभ्रमति कीर्त्तिमयं शरीरम्। (युधिष्ठिरसम्बादः)

**9.जीर्णपातनविधिः-**

वास्तुराजवल्लभस्य गृहारम्भप्रकरणे उक्तं यथा-

जीर्णं गृहं भित्तिभग्नं विशीर्णं (भ्रष्टं) तत्पातव्यं स्वर्णनागस्य दन्तैः ।
गोशृङ्गैर्वाशिल्पिना निश्चयेन पूजां कृत्वा वास्तुदोषो न तस्य।। [21]

**जीर्णपातने दिङ्निर्णयः तत्फलञ्च -**

पूर्वे वा दक्षिणे भागे क्षयकर्म शुभं भवेत्।
न तु पश्चिमदिग्भागे तत्र दोषः प्रजायते॥" (वास्तुसारसंग्रहः)
प्राग् भवति मित्रवैरं मृत्युभयं दक्षिणे च यदि वृद्धिः।
अर्थविनाशः पश्चादुदग्विवृद्धिर्मनस्तापः।।३८।। (वास्तुसारसंग्रहः)

तत्कथं पातनीयम् -

अपतितानि सत्त्वानि पातयेच्च क्रियादिकैः।
स्वर्णमयं गजं कुर्यात् वृषभं वा यथोचितम्।।
अथरूप्यमयं वापि गजं वा वृषभं तथा।
पातयेद् गजदन्ताग्रैर्वृषश्रुङ्गैरथापि वा।। [22]

**10.जीर्णे प्रयोज्याप्रयोज्यपदार्थाः-**

19. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः, श्लो. सं. ५६ - ५७-१/२
20. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः, श्लो. सं. ५८
21. वास्तुराजवल्लभस्य गृहारम्भप्रकरणे श्लो. सं. ३८
22. अपराजितापृच्छा, जीर्णप्रासादलक्षणाध्यायः- श्लो. सं. ७ - ८

जीर्णगृहस्य काष्ठं (पदार्थम्) नूतनगृहे प्रयुङ्क्ते सति किं फलम् -

अन्यवेश्मस्थितं दारु नैवान्यस्मिन्प्रवेशयेत्।
न तत्र वसते कर्त्ता वसेन्नऽपि न जीवति।।[23]
इष्टकालोऽष्टपाषाणमृत्तिकाजीर्णमायसाम्।
तृणं पर्णं बुधैः प्रक्तं दारु नव्यं गृहाय वै।। [24]
नूतने नूतनं काष्ठं जीर्णो जीर्णे प्रशस्यते।
जीर्णे च नूतनं श्रष्ठं नो जीर्णे नूतनं शुभम्।। [25]

**श्रीविन्ध्येश्वरीप्रसादद्विवेदीकृतः**

नवं पुराणसंयुक्तं द्रव्यन्तु कुलनाशनम्।
न मिश्रजातिद्रव्योत्थं द्वारं वेश्म शुभाशुभम्।। [26]
द्रव्येण देवदग्धेन भवनं यद् विधीयते।
न तत्र वसते स्वामी वसन्नपि विनश्यति।। [27]

**11. जीर्णोद्धाराय बालस्थापनविधिः-**

आद्यारम्भेऽथवा जीर्णभिन्ने हीनाङ्गानां कल्पते पातने च।
लिङ्गे बेरे स्फोटनाद्यङ्गहीने कुर्याद्बालस्थापनं पीठबन्धे।।[28]

**बाललिङ्गप्रमाणम् -**

तद्गर्भार्धं श्रेष्ठमध्यार्धकं तद्धीनं मध्येऽष्टांशके नन्दमानम्।
लिङ्गायामं तुल्यनाहं सुवृत्तं कुर्याच्छत्राभं शिरः सूत्रहीनम्।।[29]

बालगर्भस्य अर्धप्रमाणं बाललिङ्गं श्रेष्ठकरम्। तदर्द्धं मध्यमम्। अर्द्धादर्द्धं हीनम्। यदि श्रेष्ठमध्यमप्रमाणयोः अष्टभागक्रियते तर्हि नवधालिङ्गप्रमाणं प्राप्यते (तदग्राह्यम्)। लिङ्गोच्छ्रायप्रमाण-नियमानुसारेण बालप्रासादपरिधिना बाललिङ्गपरिध्यानयनं कर्तव्यम्। शिरः सूत्रहीनं कर्त्तव्यमेव।

तिथिकराग्रजमादितयाङ्गुलाङ्गुलि विवर्धनाय नवमानकम्।
तरुणलिङ्गसमुन्नतकर्तृतद् गुणयुगांशकमासनवेशनम्।। [30]

कर्तुः अङ्गुलमानं स्वीकृत्य बाललिङ्गस्य नवमानानि प्रोक्तानि सन्ति। अत्यल्पत्वेन बाललिङ्ग-

---

23. वास्तुरत्नाकरे- श्लो. सं. ५१ (व्यासवचनम्)
24, वास्तुरत्नाकरे- श्लो. सं. ५२ समराङ्गणसूत्रधारे
25. वास्तुरत्नाकरे- श्लो. सं. ५३ (शार्ङ्गधरः)
26. वास्तुसारसंग्रहः, श्लो. सं. - २५
27. वास्तुसारसंग्रहः श्लो. सं.- २७
28. मयमतम्-३५ - ४८
29. मयमतम्- ३५ / ५१
30. मयमतम्-३५ / ५२

प्रमाणं कर्तुः पञ्चदशाङ्गुलात्मकं भवेत्। ततः एकैकाङ्गुलप्रमाणेन नवाङ्गुलमधिकं बर्द्धयितुं शक्यते। बाललिङ्गं स्वपीठस्य तृतीयांशे वा चतुर्थांशे स्थाने निवेशनीयम्।
(विद्र - द्वादशवर्षाभ्यन्तरे जीर्णोद्धारं समापनीयं भवति)

**12.वज्रलेपविधिः-**

प्रासादहर्म्यवलभील्लिङ्गप्रतिमासु कुड्यकूपेषु।
सन्तत्पो दातव्यो वर्षसहस्रायुतस्थायी।।[31]

**विष्णुधर्मोत्तरपुराणे यथा -**

बिल्वकांश्च कपित्थांश्च आम्रान्संहृत्य यत्नतः।
शाल्मलीनां तथा पुष्पं सल्लकीबीजमेव च।।1।।
धन्वनश्च तथा कल्कं वचां च मनुजेश्वर।
एतेषां समवेत्तानां समानानां नृपोत्तम।।2।।

अति प्रयत्नेन विल्वफलं, अपक्वकपित्थफलं, आम्रफलं, तथैव शाल्मलीपुष्पं, सल्लकीबीजं. धन्वनवृक्षस्य वल्कलं, वचारसं समानपरिमाणं राज्ञा संग्रहणीयम्।

तोयमष्टगुणं क्वाथमष्टभागावशेषितम्।
ततस्तत्र क्षिपेद्दव्यं शृणु तच्च समासतः।।3।।
सल्लकीनां तु विन्यासं बकुलस्य च गुग्गुलम्।
भल्लातकानि बिल्ल्वानि कुन्दुरुं सर्जमेव च।
अतसीं च सुतप्तोऽयं वज्रलेपः प्रकीर्तितः।।4।।[32]

पूर्वसङ्गहीतपदार्थस्य अष्टगुणमधिकप्रमाणं जलं तस्मिन् मेलयित्वा अष्टांशप्रमाणपर्यन्तं तापनीयम्। तदनन्तरं तस्मिन्नष्टांशप्रमाणे पदार्थे तावन्मितं सल्लकी-बकुलगुग्गुल-भल्लातक-बिल्व-कुन्दरु-सर्ज-अतस्यादिसमानप्रमाणमिश्रितपदार्थं संस्थाप्य पुनः सम्यक्तया पाचनीयं भवति। तेन बज्रलेपः निर्मीयते।

**बृहत्संहितायामपि यथा -**

आमं तिन्दुकफलं कपित्थकं पुष्पमपि च शल्मल्याः।
बीजानि शल्लकीनां धन्वनवल्को वचा चेति।।
एतैः सलिलद्रोणः क्वाथयितव्योऽष्टाभागशेषश्च।
अवतार्योऽस्य च कल्को द्रव्यैरेतैः समनुयोज्यः।।
श्रीवासकरसगुग्गुलुभल्लातककुन्दुरूकसर्जरसैः।
अतसीबिल्वैश्च युतः कल्कोऽयं वज्रलेपाख्यः।। [33]

**13. जीर्णोद्धारस्य प्रतिष्ठाकालनिर्णयः-**

31. बृहत्संहितायाः ५७/४
32. विष्णुधर्मोत्तरपुराणम् 3 ख-92 अ
33. बृहत्संहितायाः ५७/१-३

प्रतिष्ठाकालनिरूपणम् –

उदगयने सितपक्षे शिशिरगभस्तौ च जीववर्गस्थे।
लग्ने स्थिरे स्थिरांशे सौम्यैर्धीधर्मकेन्द्रगतैः।।
पापैरुपचयसंस्थैर्ध्रुवमृदुहरितिष्यवायुदेवेषु।
विकुजे दिनेऽनुकूले दावानां स्थापनं शस्तम्।। [34]

अर्थात् उत्तरायणे स्थिते भास्करे, शुक्लपक्षे, जीववर्गे स्थिते चन्द्रमसि, स्थिरलग्ने, स्थिरनवांशे, केन्द्रत्रिकोणगे शुभे, उपचयगे पापे, उत्रात्रय,रोहिणी,मृगशीर्श, रेवती,चित्रा,अनुराधा,श्रवणा,पुष्या तथा स्वातीनक्षत्रेषु, कुजवासरविरहिते सति प्रतिष्ठा शुभदा भवति।

**14. जीर्णगृहप्रवेशकालविचारः-**

जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणकेऽपि सत्स्यात्।
वेशोऽम्बुपेज्यानिलवासवेषु नावश्यमस्तादिविचारणाऽत्र।। [35]

अग्न्यादिभिः विनष्टस्य गृहस्य स्थाने पुनर्निर्मिते नूतनगृहे प्रवेशानिमित्तं श्रावण-कार्तिक-मार्गशीर्षमासाः तथा स्वाती-धनिष्ठा-शतभिषानक्षत्राणि च शुभानि भवन्ति। एतदर्थं ग्रहाणाम् उदयास्तविचारः नैव कर्तव्यः। (मृगशीर्षः, पूर्वाषाढा, आश्लेषा, अनुराधा, ध्रुवसंज्ञकनक्षत्राणि, शतभिषक्, मघा, धनिष्ठा, रेवतीनक्षत्रेषु उद्यान, वापी,तडाग, कूपादीनां जीर्णोद्धारः करणीयः।)

**15. जीर्णोद्धारफलम्-**

वापीकूपतडागादि प्रसादभवनानि च
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं भवेत्।।6।।[36]
खण्डस्फुटितसंस्कारं कृत्वा यत्फलमाप्यते।
न तु क्रतुसहस्रैस्तु प्राप्यते फलमुत्तमम्।।
तस्य व्याधिभयं नास्ति न च शत्रुभयं क्वचित्।
नृपक्रोधं शिशुद्रोहं गुरुर्द्रोहं विनश्यति।।
वह्नत्यनाशनं सोऽन्यं सर्वदोषनिवारणम्।
अपमृत्युभयं नास्ति सर्वेषां भाग्यवर्धनम्।।19।। [37]

इत्थं जीर्णोद्धारसम्बन्धिनो विषयाः समासेन समुपस्थापितेति शम्।

---

34. बृहत्संहितायाः प्रतिमाप्रतिष्ठापनाध्यायः श्लो. सं. २०-२१
35. मुहूर्तचिन्तामणौ गृहप्रवेशप्रकरणे श्लो. सं. - २
36. बृहद्वास्तुमाला, गृहारम्भविधिः श्लो. सं. - ६
37. वास्तूद्धारधोरणी, मिश्रकलक्षणाध्यायः श्लो. सं. - १०, १८, १९

भास्करोदयः ISSN - 2278-0815

# भारतीयज्ञानपरम्परायां मुहूर्त्तशास्त्रस्यावदानम्

**अंकितकुमारमिश्रः**
शोधच्छात्रः
केन्द्रीयसंस्कृविश्वविद्यालयः
लखनऊपरिसरः,लखनऊ
मोबाईल-९५०६४३ ४३६८

भारतीयज्ञानपरम्परायाः प्राणभूतं ज्योतिषशास्त्रमिदं मानवजीवनस्य दर्पणत्वेन प्रतिष्ठितं वर्तते। वेदस्य नेत्रभूतं[1] ज्योतिषशास्त्रमिदं सिद्धान्त-संहिता-होराभेदैः त्रिस्कन्धात्मकं विद्यते। भूत-भविष्य-वर्तमानकालस्य ज्ञानं येन शास्त्रेण भवति तदस्ति ज्योतिषशास्त्रम्। कोऽपि जनः सावयवो भूत्वाऽपि नेत्रहीनः भवति तदा सः जीवनस्य पूर्णानुभूतिं कर्तुं न प्रभवति तथैव ज्योतिर्विज्ञानम् अज्ञात्वा जनाः अपि वैदिकार्थान् ज्ञातुं न प्रभवन्ति। अपि च सुकाले यज्ञानां सम्पादनमपि कर्तुं न शक्नोति। एतदर्थं ज्योतिषशास्त्रं वेदाङ्गेषु सर्वश्रेष्ठं स्थानमादधति। यथोक्तमपि वर्तते-

**यथा शिखा मयूराणां नागानां मणयो यथा।**
**तद्वत् वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि तिष्ठति।।** [2]

ज्योतिषशास्त्रसाहित्यस्य सुव्यवस्थितरूपेण परिचयस्तु आचार्यवराहिमिहिरात्परमेव प्राप्यते तथापि तस्मात् प्राक् ज्योतिषशास्त्रस्य सूर्यः पितामहः व्यासः वसिष्ठः, अत्रिः, पराशरः, कश्यपः, नारदः, गर्गः, मरीचिः, मनुः, अङ्गिरा, लोमशः, पौलिशः, च्यवनः, यवनः, भुगुः, शौनकश्च एते अष्टादशप्रवर्त्तकाः सन्ति। वैदिककाले ज्योतिषशास्त्रस्य प्राधान्यं यज्ञादिकालनिर्धारणार्थमासीत्। एतस्मादेव वैदिकसाहित्ये ग्रहेति शब्दस्य प्राधान्यं दृष्ट्वा पाश्चात्य विद्वान् प्रो. बेवर महोदयेन उक्तं यत् नूनमेव ग्रहाणां आविष्करणं भारते एव अभूत्। [3]

ज्योतिषशास्त्रस्य नक्षत्रविद्या इति नाम्ना प्रयोगः उपनिषत्स्वपि दृश्यते। यथा छान्दोग्योपनिषदि नारद-सनत्कुमारसंवादः अस्ति तत्र यदा सनत्कुमारः नारदस्य पार्श्वे ब्रह्मविद्यायाः विषये ज्ञातुं गच्छति तदा नारदेन एतत् पृष्टे सति यत् भवता किं किम् अधीतं तदा सनत्कुमारः वदति यत् –

**ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्वदेवजनविद्यामेतद्भगवोऽध्येमि।** [4]

अत्र राशिविद्या नक्षत्रविद्याऽपि अधीता सनत्कुमारेण इति । तत्र शांकरभाष्ये नक्षत्रविद्या भवति

---

1. वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते। सि. शि., ग्र ग., म.9
2. वेदाङ्गज्योतिषम्
3. हिस्ट्री ऑफ इण्डियन लिट्रेचर पृष्ठ सं. 251
4. छान्दोग्योपनिद्- 7/1/2

ज्यौतिषं एवञ्च राशिं इत्यस्य अर्थः गणितमित्युक्तम् आचार्यशङ्करेण। अतः नूनमेव ज्योतिषशास्त्रमिदं सर्वैः ज्ञातव्यं पठनीयं च अस्तीति उक्तमपि वर्त्तते। **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**।[5]

ज्योतिषशास्त्रस्य बहवः भेदाः प्रतिपादिताः सन्ति। कुत्रचित् जातक-गोल-निमित्त-प्रश्न-मुहूर्त्त-गणितनामानि षडङ्गानि प्रोक्तानि सन्ति। यथा-

**जातकगोलनिमित्तप्रश्नमुहूर्त्ताख्यगणितनामानि।**
**अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे।**[6]

कुत्रचित् होरा-गणित-संहिता-केरलि-शकुनेति पञ्चाङ्गान्यपि वर्णितानि सन्ति-

**पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता।**
**केरलिः शकुनश्चेति ज्योतिषशास्त्रमुदीरितम्।।** [7]

पञ्चानां स्कन्धानां सामान्यरूपेण स्कन्धत्रयेषु एव अन्तर्भावः भवति। तच्च सिद्धान्त-संहिता-होरेति। यथा नारदसंहितायां प्रतिपादितं वर्त्तते-

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्।।** [8]

**सिद्धान्तस्कन्धः-**

कालशास्त्रस्यास्य त्रिष्वपि स्कन्धेषु सिद्धान्तस्कन्धस्य प्रामुख्यं विद्यते। यतोहि अयं गणितस्कन्धः गणिताश्रितस्य ज्योतिषशास्त्रस्य मूले प्रतिष्ठितं वर्त्तते। सिद्धान्तज्योतिषे व्यक्ताव्यक्तकालस्य चर्चा मानव-दैव-पैत्रार्क्ष-सौर-सावन-चान्द्र-ब्राह्म इति नवविधकालमानानां कथनं ग्रहाणां मध्यमन्दस्फुटगत्यस्थित्यादीनां वर्णनं वेधयन्त्रादीनां चर्चा कृता वर्तते। आचार्यभास्करेण सिद्धान्तशिरोमणौ उक्तमपि वर्त्तते। तद्यथा-

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-**
**च्चारश्चद्युसदां द्विधा च गणितं प्रश्नास्तथासोत्तराः।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।** [9]

**होरास्कन्धः-**

होराशास्त्रं मानजीवनस्य ग्रहस्थितिनक्षत्रद्वारा शुभाशुभत्वस्य निर्धारणं करोति। होरा इति शब्दः फलितज्योतिषार्थे रूढमिति वक्तुं शक्यते। अयं शब्दः अहोरात्र इत्यस्मात् शब्दात् निष्पन्नो वर्त्तते।

5. महाभाष्यं पस्पशाह्निकम्
6. ज्योतिषसिद्धान्तमञ्जूषा पृष्ठसंख्या 7
7. नारदसंहिता अ. 1 श्लो. 4
8. सिद्धान्तशिरोमणिः- अ. 1 श्लो. सं. 6
9. बृहज्जातकम्, अ. 1 श्लो. सं. 3

आचार्यवराहमिहिरेण बृहज्जातके उक्तं यत् अहोरात्रशब्दस्य आद्यन्तवर्णलोपात् होराशब्दः सिद्ध्यति। तद्यथा-

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।**
**कर्मार्जितं पूर्वभवे सदादिर्यत्तस्य पंक्तिं समभिर्व्यनक्ति।।** [10]

होराशास्त्रं ज्योतिर्विद्भिः पञ्चधा विभक्तमस्ति- जातकं-ताजिकं-रमलः-प्रश्नः-स्वप्नश्चेति। अतः एतेषां पञ्चानामाधृत्य शुभाशुभस्य निर्धारणं क्रियते जातकस्य।

**संहितास्कन्धः-**

यत्र समग्रस्य ज्योतिषशास्त्रस्य वर्णनं समष्टिरूपेण भवति तद्संहितास्कन्धमेव। तदेव बृहत्संहितायाः भट्टोत्पलटीकायाम् आचार्यः वदति -

**गणितं जातकं शाखा यो वेत्ति द्विजपुङ्गवः।**
**त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः ।।** [11]

संहितास्कन्धे विविधविषयाणां समाहारः दृश्यते। यथा- प्रवर्षणविचारः, भूकम्पविचारः, उल्कापातादिविचारः एवमेव अन्येऽपि विषयाः सन्ति। तेषु यद् प्रामुख्यं भजते तद् स्कन्धस्यास्य मुहूर्तशाखा। अद्यत्वे जनानां कृते मुहूर्तशास्त्रस्य ज्ञानं महदुपकारकम्। यतोहि जनाः एवमेव यस्मिन् कस्मिन्नपि काले किमपि किमपि कार्यं कुर्वन्ति परं तेषु कार्येषु कानिचन तादृशानि अपि कार्याणि भवन्ति येषां महत्त्वं तेषां जीवने अधिकं भवति। अत एव तेषां कार्याणां तत्तद् मुहूर्तेषु सम्पादनेन नूनमेव साफल्यं लभेत इति कारणात् शुभाशुभस्य मुहूर्तस्य ज्ञानपूर्वकं कार्यसम्पादनम् अपेक्षितम् इति।

**मुहूर्त्तशास्त्रम्-**

भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्याङ्गभूतत्वेन प्रतिष्ठितस्य मुहूर्त्तशास्त्रस्य लोक-व्यवहारेण सह साक्षात् सम्बन्धः अस्ति। यतोहि मानवजीवनस्य गर्भाधानादारभ्य अवसानपर्यन्तं मुहूर्त्तानां महत्त्वं विद्यते।

मुहूर्त्ताः सामान्यरूपेण समयसूचकाः सन्ति, परं शुभाशुभसूचकरूपेण मुहूर्त्तानां प्रसिद्धिः अभवत्। एषा अवधारणा ऋग्वैदिके उषस् सूक्ते अपि अस्ति। तद्यथा-

**आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम्। अधि यदपां स्नुभिश्चराव प्र प्रेङ्खं ईङ्खयावहै शुभे कम्। वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः। स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततन्यादुषासः।** [12]

अत्र वरुणशब्दः शतभिषा नक्षत्रार्थकः अस्ति ऋचायामस्यां नौकाविहारकालस्य चर्चया सह वशिष्टऋषेः उल्लेखोऽस्ति। एवञ्च नक्षत्राधारितानां मुहूर्त्ताना उल्लेखः अथर्ववेदे, शतपथब्राह्मणे तैत्तरीय साहितायां तैत्तरीयब्राह्मणादि ग्रन्थेषु प्राप्यते। यथा शतपथब्राह्मणे –

10. बृहत्संहिता- भट्टोत्पलटीका

11. ऋग्वेदः 7,88,3-4

12. शतपथब्राह्मणः-2,1,2 1-2,7

**कृत्तिकास्वग्नीऽआदधति.. तस्मात्कृत्तिकास्वादधीत.. पशुषु कामं रोहति य एवं विद्वान् रोहिण्यामाधत्ते... ।**[13]

मुहूर्त्तशास्त्रस्य बहवः ग्रन्थाः प्रकाशिताः बहवः मातृकारूपेण अद्यापि मातृकालयेषु प्रकाशनाधीनाः सन्ति। ज्योतिषशास्त्रपरम्परायां महूर्त्तशास्त्रस्य अवदानं वैदिकाकालादारभ्य अद्यावधि पर्यन्तमपि समाजे अस्ति।

सम्प्रति बहवः मुहूर्तग्रन्थाः उपलब्धाः सन्ति, येषामाधारेण मुहूर्त्तानां व्यवहारः समाजे प्रचलति। तेषु प्रमुखानां मुहूर्त्तग्रन्थानां नामानि अत्रोपस्थाप्यन्ते। तद्यथा- मुहूर्त्तचिन्तामणिः, मुहूर्त्त-मार्तण्डः, रत्नमाला, मुहूर्त्तगणपत्यादयः। एतेषु मुहूर्त्तग्रन्थेषु विविधमुहूर्त्तानां विषयाणाञ्च वर्णनम् अस्ति। प्रत्येकस्य मुहूर्त्तग्रन्थस्य दृष्टिः काचिद्भिन्ना।

'हुर्छ' धातोः क्तप्रत्यये कृते मुडागमे च निष्पन्नः 'मुहूर्त'[14] शब्दोऽयं कालविशेषवाचकः। महर्षिणा यास्काचार्येण मुहूर्त्तशब्दस्य निर्वचनं कृतं "मुहूः ऋतुः इति मुहुर्तः। ऋतुः अर्ते गतिकर्मणः। मुहूः मूढ इव कालः।'' वैदिककाले एव मुहूर्त्तः कालपरिमाणपर्यायरूपेण व्यवहृतः संदृश्यते। अह्नः पञ्चदशो भागः मुहूर्त्तशब्देन व्यपदिश्यते तथा रात्रेभ्य एव अतः एकस्मिन्नहोरात्रे त्रिंशत् मुहूर्त्ताः भवन्ति। अत्र प्रमाणीभूतानि वाक्यानि उपनिषद् ब्राह्मणादिषु गोचरी क्रियन्ते। यथा-

**"चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमन्तेति। एष एव तत्। एव ह्वेवते अहो मुहूर्त्ताः एष रात्रेः"** [15]

आथर्वणज्योतिषे मुहूर्त्तशब्दः कालवाचकत्वेनोपलभ्यते। तेषां नामानि तथा चतुर्षु अङ्गेषु मुहूर्त्तस्य स्थितिरपि कल्पिता दृश्यते। यथा-

**चतुर्भिः कारयेत् कर्म सिद्धिहेतोर्विचक्षणः ।**
**तिथिनक्षत्रकरणमुहूर्त्तैरिति नित्यशः ।।** [16]

वायुपुराणेऽपि विषयेऽस्मिन् उक्तं यत्-

**काष्ठानिमेषा दशपञ्च चैव त्रिंशच्च काष्ठा गणयेत्कलान्तरम्।**
**त्रिंशत्कलाश्चैव भवेत् मुहूर्त्तस्त्रिंशता रात्र्यहनी समेते।** [17]

स्पष्टमस्ति यत् पञ्चदशनिमेषात्मिका भवति काष्ठा त्रिंशत् काष्ठासु भवति कला त्रिंशत् कलासु मुहूर्तमेकं त्रिंशतमुहूर्तानामहोरात्रमेकमिति। मुहूर्त्तस्य लक्षणविषये काश्यपोक्तिः प्राप्यते यत्-

**"अह्नः पञ्चदशो भागो मुहूर्त्तोऽथ तथा निशि"** [18]

---

13. शब्दकल्पद्रुमे
14. तै.ब्रा. 13.10. 6
15. आ. ज्यो
16. वायुपुराण-50-159
17. मुहूर्त्तचिन्तामणिः विवाहप्रकरणम् पीयूषधारायां श्लो. सं. 53
18. मुहूर्त्तचिन्तामणिः विवाहप्रकरणम् पीयूषधारायां श्लो. सं. 53

निरुक्तस्य द्वितीयाध्यायस्य पञ्चविंशतितमे खण्डे कालप्रमाणद्वयं क्षणं मुहूर्त्तं च उल्लिखितं वर्त्तते। तथा च पाणिनीव्याकरणे महाभारते च कालमापकत्वेन मुहूर्त्तशब्दस्य उल्लेखः अस्ति। कालान्तरे "मुहूर्त्तम्" इति शब्दस्य व्यापकः अर्थः प्राप्तः। विवाहादयो संस्काराः मुहूर्त्तानुगुणं क्रियते चेदिष्टफलस्य प्राप्तिर्भवतीति जनाः आमनन्ति शास्त्राण्यपि तथैव आदिशन्ति। अनेन क्रमेण तस्य कालस्य प्रयोगः जातः। दिवसतिथिनक्षत्रादिसंयोगाधारितः शुभाशुभश्च भवति कालः तदेव मुहूर्त्तमिति। प्रथमं संहितासु भिन्न-भिन्नकार्यार्थं प्रयुक्तानां मुहूर्त्तानां विवरणं प्राप्यते। संहितास्कन्धस्य पृथुलत्वात्, मुहूर्तानां च समाजे बहूपयोगत्वात् संहिताविषयेषु मुहूर्त्तः प्राधान्यमवापुः। एवं प्रकारेण मुहूर्त्तस्य पृथग्रूपेण प्रसिद्धिरभवदिति। मुहूर्त्तप्रयोजनस्य विषये नारदेनोक्तं यत्-

**यस्मिनृक्षे हि यत्कर्म कथितं निखिलं च यत्।**
**तद्दैवत्ये तन्मुहूर्त्ते प्रोक्तं स्वामितिथ्यंशकेऽस्य।।** [19]

केवलं दिग्-स्थान-कालानुसारं कृतं कार्यं यथा सम्यक् फलं ददाति तथा अन्यत् किमपि न। अनेकानि कर्माणि विविधरीत्या निरन्तरं क्रियमाणानि अपि नकारात्मकं परिणामं ददति इति सामान्यविश्वासः। अद्यत्वे जनाः अपि मन्यन्ते यत् पृथिव्यां पशवः वस्तूनि च आकाशे सूर्यादिग्रहाणां विशिष्टकिरणैः प्रभाविताः भवन्ति। एते ग्रहतारकाः कदा किं प्रभावं कुर्वन्ति किं च परिणामः भवति तस्य विचारः कृत्वा प्राचीनविद्वांसैः प्रत्येकं कार्यस्य योग्यसमयम् अन्वेष्टुं विविधप्रकारेण बहुपरिश्रमः कृतः स्यात्। कस्मिन्नपि कार्यस्य समग्रफलस्य प्राप्तये यदा मुहूर्त्तानुगुणं कार्यं क्रियते चेदभीष्टस्य प्राप्तिर्भवति। गर्भादिविशेषेषु संस्कारेषु अपि कालस्य महत्त्वं स्पष्टम् अस्ति । दैनन्दिनमनुष्यजीवने अपि मुहूर्त्तानां महती भूमिका अस्ति। सामान्यव्यक्तेः आरभ्य बुद्धिमन्तं जनं यावत् सर्वे स्वस्य दैनन्दिनकार्यं आवश्यकतानुसारं मुहूर्तानुगुणं कृत्वा तस्य फलं प्राप्नुवन्ति इति सार्वत्रिकः अनुभवः। औषधविक्रेता तस्य पूर्णप्रभावं प्राप्तुं मुहूर्त्तानुगुणं औषधस्य चयनं कृत्वा सज्जीकरोति। यथासमये औषधसेवनेन रोगिणः लाभं प्राप्नुवन्ति। कृषकः कृषिकार्यं करोति, बीजानि वपति, क्षेत्राणि कर्षति, यथासमये विक्रयणञ्च करोति। क्रयविक्रये गृहनिर्माणे कूपतडागादिषु खनने राजभिषेकेषु शपथग्रहणे इत्यादिषु जनाः मुहूर्त्तानुरोधेन कार्यं कुर्वन्ति। एतेन दैनन्दिनकार्येषु मुहूर्त्तस्य महत्त्वं स्पष्टतया ज्ञायते। विशिष्टकार्याणां कृते शुभ-अशुभकालनिर्धारणाय मुहूर्तग्रन्थाः प्रवृत्ताः। सामान्यतया मुहूर्त्तग्रन्थेषु तिथिवारनक्षत्रयोगकरणानां परस्परसंयोगवशात् उत्पन्नानां शुभाशुभयोगानां विचारः क्रियते।

मुहूर्तग्रन्थेषु गर्भधारणं, विवाहः, मौञ्ज्युपनयनाक्षरारम्भादि-मुहूर्त्तानां विचारः, बृहस्पतिशुक्रयोः बालवृद्धत्वं, राज्याभिषेकः, यात्राविचारः, यात्रायाः अशुभप्रभावानां शान्तिः, वास्तुविचाराः, संक्रान्तिविचारः, गृहनिर्माणविधिः, वापीकूपतड़ागादिनिर्माणादीनां च विचारः भवति। मुहूर्तग्रन्थाः स्थानभेदात् देशे-देशे भिन्नत्वं वर्णयन्ति। विभिन्नेषु प्रदेशेषु विशिष्टाः संस्काराः क्रियन्ते। प्रत्येकस्मिन् देशे तत्तद् प्रदेशानुसारं संस्कारभेदाः भिन्नाः भवन्ति। उत्तरभारतीयानां दक्षिणभारतीयानां च विशिष्टसम्प्रदायानां कारणेन

19. मुहूर्त्तत्वम् भूमिका, पृष्ठ सं. 12, डॉ. श्रीकृष्णजुगनू, चौखम्बा संस्कृत सीरीज आफिस वाराणसी

मुहूर्तपुस्तकेषु भेदाः स्पष्टाः सन्ति। दक्षिणे अपि केरलीयमुहूर्तग्रन्थेषु किञ्चिद् वैलक्षण्यं दरीदृश्यते।

प्राचीनकाले मुहूर्तः संहितास्कन्धस्य विषयः आसीदिति। मुहूर्तः कदा पृथक् विषयरूपेण उद्भूतः इति विचिन्त्यमाने सति वराहमिहिराचार्याणां कालप्रवर्तनानन्तरं एव अभवत् इति विद्वांसः कथयन्ति। वराहमिहिराचार्यस्य बृहत्संहितायाः अनन्तरम् अन्याः तादृशाः संहिताग्रन्थाः न प्राप्यन्ते। ततः प्राक् संहिताग्रन्थाः न आसन् इति न तदपि व्यवहारदृष्ट्या लोकदृष्ट्या पश्यामश्चेत् वक्तुं शक्यते यत् वारामिहिराचार्याननन्तरमेव संहिताविषयेषु मुहूर्ताः प्राधान्यमवापुः। ततः परमेव मुहूर्तग्रन्थानां पृथग्रूपेण लेखनपरम्परा आरब्धा इति चिन्त्यते। उपलब्धेषु मुहूर्तग्रन्थेषु लल्लस्य रत्नकोशः प्रथमः मुहूर्तग्रन्थः इति मन्यन्ते विद्वद्भिः। लल्लः ख्रीस्तीय षष्ठशताब्द्याम् अभूवन् इति इतिहासकाराः मन्यन्ते। एतदाधारेण मुहूर्तग्रन्थानां आरम्भः ख्रीस्तीयषष्ठशताब्द्यामेव अभूदिति। कालान्तरे मुहूर्तविषये अनेके ग्रन्थाः उद्भूताः। मुहूर्तग्रन्थेषु विविधाः विचाराः अपि समाविष्टाः आसन्। अत्र केषाञ्चन मुहूर्तग्रन्थानां परिचयः उपस्थाप्यते येन भारतीयज्ञानपरम्परायां मुहूर्तशास्त्रस्य किम् अवदानमस्तीति ज्ञातुं शक्यते।

मुहूर्त्तग्रन्थानां परिचयः-

**रत्नकोशः-**

एतत् ग्रन्थं श्रीलल्लाचार्येन ५६० तमे वर्षे अलेखि । तस्य विषये अधिका सामग्री न प्राप्यते तथापि अयं ग्रन्थः मुहूर्तग्रन्थपरम्परायां प्रारम्भिकः इति मन्यते । ग्रन्थमेतदाधृत्यैव श्रीपतिना रत्नमालायाः प्रणयनं कृतम्।

**रत्नमाला-**

अस्य ग्रन्थस्य प्रणयनं श्रीपतिना ९६१तमे शकाब्दे कृतः। ग्रन्थस्यास्य प्रसिद्धा माधवनाम्नी टीकाऽपि विद्यते।

**अद्भुतमहासागरः-**

अद्भुतमहासागरः नूनमेवाद्भुतः अस्ति। अस्मिन् बहवः तादृशाः विषयाः सन्ति ये प्रायः सर्वेषु ग्रन्थेषु न प्राप्यन्ते। अनेके नूतनाः विषयाः अपि उपस्थिताः सन्ति। ग्रन्थोऽयं बङ्गालस्य लक्ष्मणसेनेन आरब्धः तस्य पुत्रेण बल्लालसेनेन च 1089 तमे शकाब्दे पूरितः। ग्रन्थस्यास्य प्रकाशनं चौखम्बा वाराणसी तः आचार्यशिवाकान्तझामहोदयेन विहितम् अस्ति।

**व्यवहारप्रदीपः-**

व्यवहारप्रदीपः मुहूर्त्तग्रन्थेषु प्रामुख्यमावहति। अस्य ग्रन्थस्य कर्त्तुः पद्मनाभमिश्रः अस्ति। अस्य ग्रन्थस्य रचनायाः तिथिः १०८२ शक संवदस्तीति।

**ज्योतिर्विदाभरणम्-**

अस्य ग्रन्थस्य रचनाकालविषये ग्रन्थकर्त्ता स्वयमेव ग्रन्थान्ते परिचयं कारयति। अस्य लेखनं ११६४ शकाब्दोऽस्ति। कालिदासः एव अस्य कर्ता परञ्च सः महाकविः कालिदासात् कश्चित् भिन्नः एव भवितुमर्हति। यतोहि तेषां कालः तु किञ्चित् पृथगेव निर्धारितं विद्वद्भिः। विषयदृष्ट्या ग्रन्थोऽयं

महत्त्वमावहति।

**विवाहवृन्दावनम्-**

विवाहवृन्दावनमिति ग्रन्थः विवाहपटलवदेव विवाहविषयसम्बद्धग्रन्थः। अस्य प्रणेता दैवज्ञप्रवरश्रीकेशावार्कः इति नाम्नैव ख्यातः। अस्य ग्रन्थस्य प्रणयनं शकाब्दः ११६५ तमे अभवत्। ग्रन्थोऽयं प्रकाशितोऽस्ति।

**विवाहपटलम्-**

शार्ङ्गधरेण प्रणीतं विवाहपटलम् इति ग्रन्थः विशिष्य विवाहमुहूर्त्तानां चित्रणं करोति। अस्य रचनाकालः प्रायः १४०० शकाब्दमितः।

**मुहूर्त्ततत्त्वम्-**

मुहूर्त्ततत्वं कमलाकरस्य पुत्रेण केशवेन १४०० शकाब्दे लिखितः। गणेशदैवज्ञेन अस्यैव टीका प्रणीता। अन्येषु विषयेषु ग्रहयुद्धादिविषयानामपि अत्र संक्षेपेण चर्चा कृता अस्ति। नौकाप्रकरणं अस्य अद्वितीयं मौलिकं च अस्ति, यत्र नौकायाः निर्माणस्य, अवरोहणस्य, प्रक्षेपणस्य ये मुहूर्त्तास्सन्ति तेषां वर्णनं कृतमस्ति। ग्रन्थोऽयं खण्डद्वयेषु विभक्तोऽस्ति। तत्र प्रथमखण्डे सप्तदश प्रकरणानि सन्ति। अपरस्मिन् खण्डे चत्वारि प्रकरणानि सन्ति।

ग्रन्थस्यास्य महत्त्वं किञ्चिद् वैशिष्ट्यमावहति। यतोहि प्रायः आरम्भकाले मुहूर्त्त इति शब्देन ग्रन्थानां नामकरणस्य परम्परा नासीत्। लल्ल-श्रीपत्यादि मुहूर्त्तग्रन्थप्रवर्त्तकानपि मुहूर्त्तेति नाम्ना ग्रन्थानां प्रणयनं न कृतम् यथा राजमार्त्तण्डः, ज्योतिष्प्रकाशः, जगन्मोहनः, दैवज्ञमनोरमा इत्यादयः ग्रन्थाः अस्योदाहरणानि। प्रसिद्धः ज्योतिर्विदः डॉ.मुरलीधरचतुर्वेदिना[20] अलेखि यत् मूहूर्त्तनाम्ना ये ग्रन्थाः अद्यावधि प्राप्तास्सन्ति तेषु प्रप्राथम्येन मुहूर्त्ततत्त्वमेव तिष्ठति। किञ्च केचन एतदपि वदन्ति यत् मुहूर्त्तनाम्ना आद्यग्रन्थः मुहूर्त्तरत्नमिति। अस्य कर्त्ता दैवज्ञः गोविन्दः केरलीयः आसीत्।

**मुहूर्तमार्तण्डः-**

अनन्तपुत्रेण नारायणदैवज्ञेन एतत् ग्रन्थं लिखितम्। अतीव लोकप्रियं सर्वत्र सुलभतया च उपलभ्यते। अस्मिन् दश अध्यायाः सन्ति। तद्यथा- त्याज्यप्रकरणम्, अग्न्याधानप्रकरणं, नक्षत्रप्रकरणं, संस्कारप्रकरणं, विवाहप्रकरणं, यात्राप्रकरणं, मिश्रप्रकरणं, पल्लीसरठप्रकरणं, संक्रांतिप्रकरणं, अनध्याय प्रकरणं, गोचरप्रकरणञ्च। १४९३ तमे शकाब्दे अस्य लेखनम् अभवत्। अस्य ग्रन्थस्य मार्तण्डवल्लभा इति टीका अस्यैव लेखकस्य विद्यते। अस्य ग्रन्थस्य उद्देश्यं अल्पमतीनां कृते अपि विषयः सुलभः भवतु इति लेखकः वदति-

**पूर्ववाक्यर्थमादाय ग्रन्थोऽयं रचितो लघुः ।**
**पठनार्थमशक्तानामङ्गीकार्यो बुधैर्मुदा ।।**[21]

---

20. मुहूर्त्तमार्तण्डः, ग्रन्थप्रशस्तिः श्लो. सं.4, केदारदत्तजोशी

21. मुहूर्त्ततत्त्वम्, भूमिका भागः

**तोण्डरानन्दः-**

एतत् सुविस्तृतं ग्रन्थं नीलकण्ठेन १५०९ तमे शकवर्षे संकलितः। तथापि सुधाकरः तु एतत् रामदैवज्ञेन संकलितोऽस्तीति मन्यते ।

**विवाहपटलः-**

१४४४ तमे शकाब्दे जगन्नाथस्य पौत्रः पीताम्बरः विवाहपटलस्य प्रणयनं कृतवान्। अस्य ग्रन्थस्य निर्णयामृतनाम्नीति टीका अस्यैव लेखकस्य उपलभ्यते।

**ज्योतिर्निबन्धः-**

ज्योतिर्निबन्धः शिवदासेन प्रणीतः धार्मिकशास्त्रसम्बद्धः मुहूर्त्तग्रन्थः अस्ति। विवाहपटलस्य निर्णयामृतटीकायामस्य उल्लेखः अस्ति, येन १४४६ मितशकाब्दात् प्रागेव अस्य अस्तित्वं सिद्धं भवति।

**ज्योतिषदर्पणः-**

गद्यपद्यात्मकरूपेण रचितः एष ग्रन्थः खगोलशास्त्रज्ञेन पञ्चपल्लुना १४७९ तमे शकवर्षे लिखितः ।

**मुहूर्तचिन्तामणिः-**

मुहूर्तचिन्तामणिः अनन्तदैवज्ञस्य पुत्रेण रामाख्येन दैवज्ञेन १५२२ तमे शकाब्दे प्रणीतः। बहुप्रथितेऽस्मिन् ग्रन्थे बहव्यः टीकाः सन्ति, यासु ग्रन्थकर्त्तुः प्रमिताक्षरा टीका, गोविन्दस्य पीयूषधारा टीका च बहु प्रसिद्धास्ति। अस्मिन् ग्रन्थे शुभाशुभ-नक्षत्र-संस्कार-विवाह-वधूप्रवेश-द्विरागमन-अग्न्याधान -राज्याभिषेक-यात्रा- संक्रान्तिः वास्तु-गोचरम् इत्यादीनि प्रकरणानि सन्ति। ग्रन्थस्यास्य महत्त्वमनेनैव ज्ञातुं शक्यते यत् साम्प्रतिककाले अस्य ग्रन्थस्य यथा प्रचलनं स्वीकरणञ्चास्ति तथा कस्याप्यन्यस्य ग्रन्थस्य स्थितिः नास्ति।

**मुहूर्तमुक्तावली-**

मुहूर्तमुक्तावली रामदैवज्ञस्य अग्रजः नीलकण्ठदैवज्ञेन लिखितः। परन्तु अन्येषां दैवज्ञानामपि मुहूर्तमुक्तावली इति नाम्ना बहवो ग्रन्थाः सन्ति। यथा काशीनाथस्य देवरामस्य भास्करस्य योगीन्द्रस्य हरिभट्टस्य श्रीकण्ठाचार्यस्य च। एतेषाम् आचार्याणामपि मातृकाः उपलब्धाः सन्ति। अतः एतत् पुस्तकं नीलकण्ठस्यैव अस्तीति इति वक्तुं न शक्यते ।

**मुहूर्त्तचूडामणिः-**

ग्रन्थोऽयं शिवाख्येन दैवज्ञेन १५४० मितशकाब्दे प्रणीतः। ग्रन्थेऽस्मिन् चतुर्दशाध्यायाः सन्ति। अन्तिमोऽध्यायः सामुद्रिकलक्षणम्। ग्रन्थोऽयं मुहूर्त्तचिन्तामणेः प्रतिरूपवदेव प्रतिभाति। यतोहि ग्रन्थकारः स्वयमेव स्वीकरोति। तद्यथा-

**तस्यानुजः (नृसिंहस्य) श्रीशिवनामधेयो मुहूर्त्तचूडामणिनामधेयम्।**
**विनिर्म्मिते सारवदाद्यपद्यैः सच्छिष्यतोषाय पुरे पुरारेः।**
**ये पाठयन्ति च पठन्ति लिखन्ति चैनं संवीक्ष्य येऽभिकथयन्ति जनाय वेलाम् ।**

**तेषां यशोविनयगौरवनैपुणानि प्रज्ञेन्दिरा प्रसहितानि भजन्ति वृद्धिम्।[22]"**

ग्रन्थोऽयं प्रायः अप्रकाशितोऽस्ति।

**मुहूर्तकल्पद्रुमः-**

विट्ठलदीक्षितस्य अयं ग्रन्थः मुहूर्त्तविषयकः एव वर्तते। १५४५ तमे शकाब्दे अस्य लेखनम् अभवत्। लेखकस्य मञ्जर्याख्या टीका अपि उपलभ्यते। ग्रन्थेऽस्मिन् संवत्सर-तिथि-वासर-योग-तिथ्यर्द्धयोग-मुहूर्त-नक्षत्र-संक्रान्ति-गोचर-त्याज्य-संस्कार-विवाह-वह्निग्रह-राज्याभिषेक-यात्रा-वास्तु-गृहप्रवेश देवप्रतिष्ठा विचित्रकुसुमञ्चेति एकविंशतिः कुसुमानि सन्ति।

**मुहूर्तमाला-**

मुहूर्त्तमाला इति ग्रन्थः 1582 शकाब्दे शाण्डिल्यवंशोत्पन्नेन रघुनाथदैवज्ञेन प्रणीतः। अत्र संज्ञाप्रकरणादारभ्य वास्तुप्रकरणं यावत् नव प्रकरणानि सन्ति। ग्रन्थकर्तुः विषये ग्रन्थस्यान्ते श्लोकद्वयं प्राप्यते। तद्यथा-

**अस्ति स्वस्तिमदेकमास्पदमिह श्रीविद्ययोर्नीरधे**
**स्तीरे दाल्भ्यपुरादप्राग्दिशि पुरं श्रीपालसेनाभिधम्।**
**रामस्थापितचित्तपावनकुलोत्पन्नः सतामग्रणीः**
**शाण्डिल्यान्वयमण्डनं गणितवित्तत्रावसत्केशवः।।**
**तस्मादाविरभून्नृसिंह इति यः काश्यां कृतावस्थिति**
**स्तत्तज्जातकसंहितागणितविद्वैदग्ध्यवाचस्पतिः**
**ज्ज्योतिर्वित्सरसत्त्वमाप पदवीमासेरिदुर्गग्रहे।।** [23]

**मुहूर्त्तदीपकः-**

अयं ग्रन्थः १५८३ शकाब्दे महादेवाख्येन दैवज्ञेन प्रणीतः। अस्य पितुर्नाम श्रीकान्हजी इति आसीत्। स्व-परिचयः ग्रन्थकारेण ग्रन्थस्यान्ते स्पष्टतया लिख्यते-

**आद्यानामनवद्यपद्यरचना नाना विचिंत्यात्मना**
**लोकानां व्यवहारदर्शनविधौ सप्तेषु वृत्तैः स्फुटम्।**
**श्रीमद्रैवतराजपूजितपदः श्रीकाह्नजिद्वाडवः**
**सूनुस्तस्य मुहूर्त्तदीपमकरोदेनं महादेववित्।।**
**शाके रामगजेषुभूपरिमिते 1583 सौम्यायने भास्करे**
**चैत्रे मासि सिते दले शिवतिथौ वारेति....................।** [24]

**कल्पलता-**

अयं ग्रन्थः जलदग्रामनिवासिनः रुद्रभट्टस्य पुत्रेण सोमदैवज्ञेन १५६४ तमे शकाब्दे लिखितः।

22. मुहूर्त्तमाला, वास्तुप्रकरणम्, श्लो.सं. ६६-६७

23. मुहूर्तदीपकः, श्लोकसंख्या 58

24. शब्दकल्पद्रुमः,

ग्रन्थस्यास्य विषये बहु सूचना न लभ्यते। तथापि अस्य ग्रन्थरत्नस्य ज्योतिषशास्त्रस्येतिहासग्रन्थेषु यत्र-तत्र चर्चा/उल्लेखो वा सर्वत्र प्राप्यते।

**मुहूर्तगणपतिः-**

अयं ग्रन्थः १६०७ तमे शकाब्दे श्रीमद्दैवज्ञरावलहरिशंकरसूनुः गणपतिदैवज्ञेन लिखितः। अस्मिन् ग्रन्थे तिथयः नक्षत्राणि योगाः करणानि शुभाशुभविचारः यज्ञविचारः विवाहविचारः गृहप्रवेशः संस्काराः, अग्निहोत्रं देवालयप्रतिष्ठेत्यादयः अध्यायाः सन्ति ।

**मुहूर्तसिन्धुः-**

अयं ग्रन्थः गंगाधरशास्त्री इत्यनेन १८०५ मितशकाब्दे प्रणीतः। ग्रन्थेऽस्मिन् प्रायः मुहूर्त्तस्य तथा अन्येषां सर्वेषां विषयाणामपि वर्णनं विद्यते।

यद्यपि उपर्युक्ताः एते मुहूर्तविषयाः केचन प्रसिद्धाः ग्रन्थाः अत्र संक्षेपेण विश्लेषिताः सन्ति तथापि अस्मिन् विषये इतोऽपि अधिकाः ग्रन्थाः सन्ति ये अज्ञाताः अप्रकाशिताश्च सन्ति। मुहूर्त्तस्य भारतीयसमाजे वैशिष्ट्यकारणात् संस्कृतेतरभारतीयभाषासु अपि मुहूर्त्तग्रन्थाः लिखिताः सन्ति। यथा तमिलभाषायां "तिरुक्कुरल", मैथिलीभाषायां "डाकवचनामृतम्", ओड़ियाभाषायां "खनारवचनम्", हिन्दीभाषायां "घाघ-भट्टस्य उक्तयः" येषां प्रयोगः ग्रामीणक्षेत्रेषु अद्यापि भवति। सर्वेप्येते तत्तत् क्षेत्रेषु विस्तरेण विश्लेषिताः सन्ति।

**मुहूर्तमञ्जीरः-**

मुहूर्तपरम्परायामस्यां श्रीरामसेवकत्रिपाठिना "मञ्जीरः" इति ग्रन्थः लिखितः। मञ्जीरेति शब्दश्रवणेन सामान्यरूपेण ग्रन्थोऽयं मुहूर्त्तस्य ज्योतिषस्य वा अस्तीति वक्तुं न शक्यते यतोहि 'मञ्जीर' इति शब्दस्य अर्थः शब्दकल्पद्रुमेति कोशे "मञ्जति मधुरं शब्दायते इति मन्ज् ध्वनौ सौत्रधातुः बाहुलकात् ईरन् प्रत्यये सति मञ्जीर इति शब्दः सिद्ध्यति। यस्यार्थो भवति नूपुरः इति।" अतः नूनमेव वक्तुं शक्यते यत् अयं ग्रन्थः मुहूर्त्तशाखायाः अलङ्करणमिति। ग्रन्थेऽस्मिन् विंशतिः प्रकरणानि सन्ति। विषयदृष्ट्या आचार्यः स्वयमेव वदति यत्-

**गर्गकश्यपपराशरौमिः श्रीपतिप्रभृतिनूतनैर्बुधैः।**
**निश्चितं व्यवहृतं समाहारेत्तन्निबन्धबहुशोधनोदितः।।**
**शब्दशास्त्रकवितादिवलानैर्वर्णनैश्चकिमुपास्य कर्मणः।**
**किञ्चिदस्ति यदि मेश्रमः क्वचित्सूरिभिः तदियतैवतर्क्यताम्।।**[25]

अयं संहितास्कन्धस्य अन्यतमः ग्रन्थः। ग्रन्थेऽस्मिन् प्रायः मुहुर्त्तशास्त्रस्य सर्वे विषयाः प्रतिपादितास्सन्ति। यथा- तिथिवारादिजन्यशुभाऽशुभयोगाः, ग्रहयुद्धवर्णनं तज्जन्यं शुभाऽशुभत्वम्, यात्रादिषु लग्नादीनां निर्धारणम्, सावन-चान्द्र-क्षयमासादीनां वर्णनं, दग्धादियोगविमर्शः, षोडशसंस्काराः, शपथग्रहणप्रभृतयः मुहूर्त्ताः अत्र विचारिताः सन्ति।

25. मञ्जीरग्रन्थः प्र.1 श्लो.2,3

**उपसंहारः-**

मुहूर्तशास्त्रं सर्वत्र तथैव व्याप्तमस्ति यथा शरीरे रक्तः। यतोहि आयुर्वेदविज्ञानं, वनस्पति-विज्ञानं, वास्तुविज्ञानं, राजनीतिविज्ञानं, जलविज्ञानं, शस्त्रविज्ञानं, शिल्पविज्ञानं, वायुविज्ञानं, यात्राविचारः, यज्ञविधानम् वा भवतु सर्वत्र मुहूर्त्तशास्त्रस्य आवश्यकता महत्त्वञ्च वर्त्तते। अतः वक्तुं शक्यते यत् भारतीयज्ञानपरम्परायां मुहूर्त्तशास्त्रं नूनमेन रत्नभूतम् अस्तीत्यत्र लेशमात्रोऽपि सन्देहो नास्ति।

**सुभाषितम्**

**क्रोधो हि शत्रुः प्रथमो नराणां देहस्थितो देहविनाशनाय।**
**यथास्थितः काष्ठगतो हि वह्निः स एव वह्निर्दहते शरीरम्।।**

अर्थात् - मनुष्य के शरीर में रहने वाला क्रोध ही उसका पहला शत्रु है, जो उसके शरीर का नाश करता है। ठीक वैसे ही जैसे लकड़ी के भीतर छिपी हुई आग अंततः उसी लकड़ी को जलाकर राख कर देती है।

**अपि च-**

**कलिः शयानो भवति संजिहानस्तु द्वापरः।**
**उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्॥**

अर्था - जो मनुष्य सोया रहता है, उसका भाग्य कलयुग (अंधकार) बन जाता है। जो उठकर बैठता है, वह द्वापर युग में पहुँचता है। जो खड़ा हो जाता है, वह त्रेतायुग जैसा श्रेष्ठ बनता है। लेकिन जो निरंतर आगे बढ़ता रहता है, उसका जीवन सतयुग (स्वर्ण युग) बन जाता है। इसलिए सदैव चलते रहना चाहिए, आगे बढ़ते रहना चाहिए।

भास्करोदयः ISSN - 2278-0815

# ज्योतिषशास्त्रे ''ऋतुविज्ञानम्''

**डॉ. चन्द्रश्रीपाण्डेयः**
सहायक-आचार्या, ज्योतिषविभागः
लखनऊ-परिसरः

**'वेदचक्षुः किलेदं स्मृतं ज्योतिषम्'**[1] इति भास्कराचार्येण कथितं यत् आकाशे चन्द्र-सूर्य-उषा-रश्मि-नक्षत्र-तारा-ऋतु-मास-दिन-रात्रि-वायुमेघानां विषये यत्किञ्चिदपि मनोहरं, स्वाभाविकं, सुन्दरं, चामत्कारिकं महदाश्चर्यकरञ्च वेदे वर्णनं प्राप्यते, ज्योतिषशास्त्रस्य वेदाङ्गत्वात् तत्सर्वं ज्योतिषशास्त्रमेव।

वेदे उक्तं यद् भुवनाधारः सूर्यः, ऋतुनां हेतुः सूर्यः, वायुनां कारणं सूर्यः, एतैः सिद्धयति यत्प्रकाश-उष्ण-पर्जन्यादि-सर्वविषयाः सूर्याश्रिता एव सन्ति। अथ च ऋतुनां सम्भवोऽपि सूर्येणैव जायते अर्थात् विश्वाधारः सूर्यः एव।[2] ज्योतिषे षड्ऋतवः सन्तीति सर्वत्र (सिद्धान्त-होरा-संहितासु) अभिहिताः सन्ति। अन्येषु ग्रन्थेषु नामोल्लेखपूर्वकं षण्णां ऋतुनां चर्चाकृताऽस्ति। वेदेषु षड्ऋतुनामेकत्रनिर्देशस्तत्रारम्भे वसन्तर्तुरिति वर्तते।

यथा- ''मुखं वा एतद् ऋतूनाम यद् वसन्त''[3]

"भगवता श्रीकृष्णेनाऽपि स्वीकृतं गीतायां यद् ऋतूनां कुसुमाकरः''[4] इति।

सूर्यस्य मकरसंक्रान्तेः सकाशात् षण्मासा उत्तरायणं भवति। तथैव कर्कसंक्रान्त्यादेः षण्मासा दक्षिणायनं स्यात्। ततो मकरसंक्रान्तेरपि द्विराशिनाथाः शिशिरादयश्च ऋतवो भवन्ति। द्वयोर्द्वयो राश्योरेकैक ऋतुनाथ स्यात्। [5] तद्यथा-

यथा मकरकुम्भयोः शिशिरः। मीनमेषयोर्वसन्तः। वृषमिथुनयोः ग्रीष्मः। कर्कसिंहयो वर्षा। कन्यातुलयोः शरत्। वृश्चिक-धनुषोः हेमन्त इति। एते संक्रान्तविशिष्टा मेषादयो द्वादशसौरमासाः सम्भूय षड् ऋतुषु मध्ये अन्तर्भूताः भवन्ति। तैदव द्वादशसौरमासैर्वत्सरः सौरवर्षं भवतीत्यर्थः।

''मृगादिराशिद्वयभानुगोगात् षट् चर्तवः स्युः शिशिरो वसन्तः।

ग्रीष्मश्च वर्षाश्च शरच्च तद्वद् हेमन्तनामा कथितोऽत्र षष्ठः।।[6]

कालविशेषः ऋतुस्तु तु षड् विधः यथा (1) मार्गपौषयोः हिमः (2) माघफाल्गुनौ शिशिरः (3) चैत्रवैशाखयोः वसन्तः (4) ज्येष्ठाषाढयोः ग्रीष्मः (5) श्रावणभाद्रपदयोः वर्षाः (6)

---

1. सिद्धान्तशिरोमणि मध्यमाधिकार, 11
2. ऋग्वेदसंहिता, 1/164/2, 1/195/15
3. तै.ब्रा., 1.1.1.6-7
4. श्रीभगवतगीता, अध्याय 10/35
5. सूर्यसिद्धान्त-मानाध्याय 10
6. सिद्धान्तशेखर- मध्यमाधिकार

आश्विनकार्तिकयोः शरत्, सत्रिविधोऽपि- कार्तिकाग्रहायणपौषमासाः शीतः, फाल्गुनचैत्रवैशाखज्येष्ठाः ग्रीष्मः, आषाढश्रावणभाद्राश्विनाः वर्षाः द्विविधोऽपि ऋतुर्यथा- कार्तिकादिषण्मासाः शीतः, वैशाखादि-षण्मासाः ग्रीष्मः इत्थं संक्षेपेण वेदोक्ताः षड् ऋतवोऽत्र वर्णिताः।[7]

**वेददृष्ट्या वृष्टिकारणम्-**

सर्वे विज्ञाः जानन्ति यत् ज्योतिषविज्ञानस्य मूलाधारः वेद एव यद् ''सूर्यो जलाशयेभ्यो वनस्पतिभ्यश्च रसाहरणं कृत्वा मेघमण्डले स्थापयति, अनन्तरं मेघवर्षणं जायते। यथा जलवर्षणेन अन्नादिपदार्थाः भवन्ति, तद् भोजनेन क्षुधानिवृत्तिः ततः बलवृद्धिः ततः दुष्टानां निवृतिः, अनन्तरं सज्जनाः विशोकाः भवन्ति तथा आत्मवत् परेषां सुखदुःखमनुभूय सर्वेषां मित्रमिव दुःखविनाशं कृत्वा सुखस्य निरन्तरमुन्नतिः भवति''। एवमेव-रोगरहितस्य प्राणिनः, तथा च लता-पादप-ओषधीनाञ्च चर्चा वेदे कृता अस्ति। [8]

वैदिकवाङ्मयस्य सम्यक् अन्वेषणेन सुस्पष्टरूपेण ज्ञायते यत् यद्वर्षायाः कारणम् आदित्य एवाऽस्ति। अयमादित्यः सूर्यपर्याय एव। सूर्यरश्मयः पृथिव्यां स्थितं जलं शोषयन्ति। ताः आपः अन्तरिक्षे मेघरूपाः भवन्ति। तथा वायूनां साहचर्याद् भुवि वृष्टिर्जायते। आधुनिकाः विज्ञानावज्ञानविदोऽपि मेघ-वायु-वर्षा सम्बन्धः इत्थमेव स्वीकुर्वन्ति।

**ज्योतिषशास्त्रदृष्ट्या वृष्टिकारणम्-**

त्रिस्कन्धात्मकं ज्योतिर्विज्ञानम्। यत्र संहितास्कन्धे ऋतुविज्ञानविषयकाः विशेषतो वर्षाविज्ञानसम्बद्धाः विचाराः प्रचुराः सन्ति। वृष्टिमूलकारणेषु सूर्यवायुमेघानां चर्चा कृता विद्यते। तथैव ज्योतिषसंहितास्कन्धे वर्ष-अयन-मास-पक्ष-दिन-नक्षत्र-राशि-ग्रह-लग्न-महूर्त-निमित्तादिभिः वर्षाज्ञानं क्रियते। प्रत्येकस्मिन् वर्षे ग्रहमन्त्रिपरिषदः परिवर्तनं जायते। परिषदः अधिकारिणां ज्ञानेनाऽपि वृष्टि-खण्डवृष्टि-सुवृष्टि-जलप्लावनानां भविष्यवाणी विचार्यते। यथा- वर्षाधिपः सूर्यः स्यात्तदाऽल्पवृष्टिः। चन्द्रमासो वर्षाऽधिपत्वात्प्रचुरा वर्षा। मंगलाऽधिपे सति खण्डवृष्टिः। बुधे वर्षाधिपे सस्यवृद्धिः। गुरौ उत्तमावृष्टि। शुक्रे वर्षाधिपे जाते सुवृष्टिः। शनैश्चरे सत्यल्पवृष्टिः भवति। विचारणीयं यत्कश्चित् शुभग्रहो वर्षाधिपोऽस्ति तदाऽसौ तस्मिन् वर्षे उत्तमवृष्टिकारको भवति।[9]

**सृष्टिचक्रं नक्षत्रमण्डलञ्च-**

यज्ञात्पर्जन्यः, पर्जन्याद्वृष्टिः, वृष्टेरन्नम, अभात्प्रजाः, ततो यज्ञः- इत्थं माण्डलिकसृष्टिः श्रुतिस्मृतिप्रतिपादिताऽस्ति। अस्य क्रमस्य निदानमिदमेव नक्षत्रमण्डलं तदभिमानिन्योदेवताश्च। संहितास्कन्धे ज्ञायते यत्पौषमासे मूलनक्षत्राद् भरणीं यावद् दशनक्षत्रेषु चन्द्रचारानुसारेण गर्भधररणं करोति तथा च सप्ताशीत्युत्तरशत् (187) दिनेषु आर्द्रादिदशनक्षत्रेषु सूर्यसंचारानुसारेण वर्षति। यदि मूलनक्षत्रे गर्भोपघातो न स्यात्तदा आर्द्रानक्षत्रेऽवश्यमेव वृष्टि भवति। यतोहि मूलनक्षत्रात् षडशीत्युत्तर-

7. अमरकोश का 4 वर्ग

8. शु. य 17अ मन्त्र- 1, 11 म. मन्त्र 38

9. बृ.सं.ग.ल.अ (गर्भलक्षणध्यायः)

शतदिनानामन्तरम् आर्द्रानक्षत्रमेवाऽयाति। गर्भधारणकाले वृष्ट्यधिकता वायोराधिक्यम् मेघगर्जनम्, करकापातः, इत्यादयो गर्भोपपाता जायन्ते।

ज्योतिषशास्त्रे वर्षाया प्रथमनक्षत्रमार्द्रा इति कथितम्। पञ्चाङ्गेषु यानि सम्वत्सरफलानि लिख्यन्ते। तत्र वर्षासूचक फलमार्द्रानक्षत्रे सूर्यसंचारकालमाधारीकृत्यैव सूच्यन्ते। अथ च यस्मिन् दिने सूर्यः आर्द्रानक्षत्रं याति तदिनमेव मेघाधिपः कथ्यते। यदि दिवाऽऽर्द्रानक्षत्रस्य प्रवेशस्तदा धान्यहानिस्तथा प्रजाकष्टं च जायते। यदि सन्ध्याकाले आर्द्राप्रवेशस्तदा धान्यवृद्धिरिति संहिताकारेणोक्तम्।[10]

**मेघगर्भलक्षणम्-**

प्राणिनां प्राणाः अन्नं विना नैव स्थातुं शक्नुवन्ति। अन्नोत्पादनं तु वर्षाधीनम्। अतः विज्ञैः वर्षाकालपरीक्षणं प्रयत्नपूर्वकं कर्तव्यम्। आचार्यवराहमिहिरण वृहत्संहिता नाम्नि ग्रन्थे कथितं यन्मया वसिष्ठगर्गपराशरकाश्यपवज्राचार्यादिरचित-ग्रन्थान् आधारीकृत्य वर्षाकाललक्षणानि लिखितानि। वराहेण विशेषरूपेण ज्योर्विविदः निर्दिष्टाः यन्मेघाः यदा वर्षणाय गर्भधारणं कुर्वन्ति तेषु दशतारकेषु अहर्निशि ज्योतिर्विदिभिरऽध्ययनं कर्तव्यम्। इत्थं सम्यग् रूपेण परीक्षा यदि वृष्टिविषये भविष्यवाणी क्रियते तदा मिथ्या न स्यात्।[11]

मार्गशीर्षशुक्लप्रतिपदा तिथेः अनन्तरं वर्षा स्यात् तदा यस्मिन् नक्षत्रे मेघः गर्भधारणं करोति। ततः 195 पञ्चनवत्युत्तरशतं दिनानन्तरम् अर्थात् सावनमानेन सार्धषट्मासानन्तरं तस्मिन्नक्षत्रे एव आगते चन्द्रे वर्षा भवति। तथा च यदि दिवा गर्भधारणं जातं भवेत् तदा निर्धारिते काले रात्रौ वर्षा भवति। यदि रात्रौ गर्भधारणं जायते तदा निर्धारिते समये वर्षा भवति।

**दिक्कालज्ञानं आकाशलक्षणञ्च-**

गर्भविशेषलक्षणानि कालनिर्देशसहितानि मेघवायुलक्षणनि च निर्दिष्टानि सन्ति। मासनक्षत्रैः सहः चन्द्रमसः संयोगे सति यदि पूर्वस्यां दिशि मेघदर्शनं जायते तदा वर्षर्तौ पश्चिमतः जलवर्षणं प्रारभ्यते। यदि पश्चिमे मेघो दृष्टः स्यात् तदा पूर्वदिशायां जलवर्षणं प्रारभ्यते। एवमेव उत्तरे मेघदर्शनं भवेत्तदा दक्षिणस्यां दिशि तथा दक्षिणे भवेतदा उत्तरस्यां दिशि निर्धारिते समये वर्षा भवत्येव।[12] निर्धारितैः मासनक्षत्रचन्द्रयोगैः गर्भग्रहणकाले यदि मन्दं-मन्दं वायुर्वाति, आकाशे निर्मलश्चन्द्रः स्यात् अथवा सूर्यचन्द्रमसौ घनैर्मैघैः व्याप्तौ भवेताम्, इन्द्रधनुषः दृश्यते, अथवा मेघः मन्दगर्जनं कुर्यात्, तस्मात् सूर्यान्यतरदिशि दक्षिणां वन्यजीवजन्तूनां च शान्तस्वराः श्रुतिगोचराः स्युः तदा गर्भपुष्टि भवति तथा निर्धारते समये सुवृष्टिश्च जायते। नाधिकं शैत्यं नवाधिको हिमपातः स्यात् तथा मार्गशीर्षे पौषे च क्रमशः सूर्योदयास्तकाले लालिमाधिक्यं दृश्यं भवेत, माघे प्रचण्डवायुवेगः स्यात् सूर्योचन्द्रमसौ हिमानौ भवेताम् तदा सुवृष्टिः ज्ञेया।

**वर्षाज्ञानाय रोहिण्यादियोगाः-**

10. बृहत्संहिता- गर्भलक्षणाध्यायः
11. बृहत्संहिता- गर्भलक्षणाध्यायः
12. बृहत्संहिता- गर्भलक्षणाध्यायः

नक्षत्राण्याधारीकृत्य वर्षातत्परिमाणज्ञानन्तरं रोहिणीयोगाः तदवगन्तुं निश्चितः कालः, ज्ञानविधिः, वायुना शुभाशुभत्वं वर्षाज्ञानं, मेघलक्षणानि, दिग्वशान्मेघफलानि तथा च चन्द्रफलानि च प्रतिपादितानि सन्ति। एवमेव स्वातिनक्षत्रयुक्तचन्द्रफलं कथितम् यथ मेघवायूनां तदुत्पातानां च ज्ञानं रोहिणीचन्द्रयोगेन क्रियते तथैव स्वातिचन्द्रयोगेनाऽपि ज्ञातव्यम्। अथ च आषाढ-शुक्लपूर्णिमायां उत्तराषाढानक्षत्रयुक्तेन चन्द्रेण वर्षाविषयकं शुभशुभफलं प्रतिपादितं वर्तते। साम्प्रतमपि आषाढशुक्लपूर्णिमायां वायुपरीक्षणेन वर्षाज्ञानं जनैः क्रियते। अस्मिन् आषाढीयोगे इदमपि परीक्ष्यते यत् कस्य धान्यविशेषस्य उत्पादनं भवति।

**वृष्टिज्ञानाय प्रचलिताः पद्धतयः - (वायुपरीक्षा)**

आषाढपूर्णिमायां प्रदोषकाले वायुः परीक्ष्यते- दिग्वशात्तत्फलं च ज्ञायते-

यदि पूर्वतो वायुर्वाति तदा सुवृष्टिः धान्योत्पत्तिश्चाऽधिका।

आग्नेयो वायुर्वाति तदाल्पवृष्टिः, अत्यल्पाधान्योत्पत्तिः।

दक्षिणस्यां वायौ सति अल्पवृष्टिः, अल्पधान्योत्पत्तिः प्रजापीडा च।

नैर्ऋत्यकोणतो यदि वायुश्चलति तदाऽनावृष्टिः, दुर्भिक्षश्च।

पश्चिमतो यदि वायुश्चलति तदा महावृष्टिः उत्तमधान्योत्पत्तिश्च।

वायव्ये वायौ चलिते वायुतीव्रता मध्यमं धान्योत्पादनम्।

उत्तरे वायौ चलिते सति अतिवृष्टिः, धान्याधिक्यं, जनसौरूपम्।

ईशानतो यदा वायुर्वाति तदा सुवृष्टिः, उत्तमं धान्यं, प्रजासौरूपम्।[13]

**ग्रहस्थितिवशात् वृष्टिविचारः-**

**वर्षाकाले निम्नलिखित गृहस्थितिदृष्टिवशात् वर्षाज्ञानम्-**

शुक्रात्सप्तमस्थाने चन्द्रः शनिदृष्टः स्यात् तदा वृष्टिः।

शनेः 5, 6, 7 स्थानेष्वन्यतमे स्थाने चन्द्रे सति वृष्टिः, यद्यसौ शुभग्रहैः दृष्टो भवेत्।

यदि बुध-शुक्रौ समीपस्थौ भवेताम्।

सूर्यस्य अग्रतः पृष्ठतश्च शुभग्रहाः स्युस्तदा वृष्टिः।

ग्रहाणमुदयास्तकाले वृष्टिः।

ग्रहाणां राश्यन्तरगमने वृष्टिः।

ग्रहयुतिकाले वृष्टिः।

किन्तु बुधशुक्रयोर्मध्ये रविः स्यात् तदा वर्षाऽभावः। [14]

**उपसंहारः-**

ऋतुविज्ञानविषये ज्योतिषशास्त्रे बहवः सिद्धान्ताः प्रतिपादिताः सन्ति। प्रस्तुते लघुनिबन्धे त्रि

---

13. बृहत्संहिता- रोहिणी योगाध्यायः

14. बृहत्संहिता- आषाढी योगाध्यायः

स्कन्धात्मकज्योतिषशास्त्रस्य संहितास्कन्धोक्तेषु ऋतुषु प्रधानतया वर्षर्तौ वर्षाज्ञानं केन प्रकारेण कर्तुं शक्यते तद विषये एव अत्र अतिसंक्षिप्ता चर्चा कृता मया। मम् इदम् कथनम् अस्ति यद् व्यापकविषये एकस्मिन् एव लघुलेखे सर्वं समाहितं विवेचितं च न शक्यते। अत्र तु केवलं ज्योतिषे वर्षाज्ञानाय आचार्याणां कीदृशमासीत्तात्कालिकं ज्ञानम् तदेव अत्र उपस्थापितम्।

।। इति दिक्।।

## ।। सुभाषितम् ।।

ब्राह्मणों एवं ज्ञानी-जनों का वैशिष्ट्य

**सर्वं शुभं जगति धर्मत एव लभ्यं धर्मे गतिर्निगमतो नृप धर्मशास्त्रात्।**
**नूनं तयोरपि गतिर्भुवि भूमिदेवाः तैरर्चितैरिह जगत्पतिरर्चितः स्यात्।।**

(पद्मपुराण, पाताल - ८४/७१)

अर्थात - संसार में सभी कल्याणकारी वस्तुएँ धर्म (कर्तव्य, सदाचार) से ही प्राप्त होते हैं। धर्म का मार्ग वेदों (निगम) और धर्मशास्त्रों से मिलता है, हे राजा! निश्चित रूप से, पृथ्वी पर भूमि-देवता (ब्राह्मण, ज्ञानीजन) ही इन (धर्म और शास्त्रों) के माध्यम हैं। उनके (भूमि-देवताओं) द्वारा पूजित होने से ही जगत के स्वामी (ईश्वर) की पूजा होती है।

## लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः

(सत्रम्-२०२५-२६)




उत्तरप्रदेशस्य राजधान्यां लखनऊ (लक्ष्मणपुरी)नामके नगरे अवस्थितोऽयं राष्ट्रिय-संस्कृत- संस्थानस्य लखनऊ-परिसरः स्वस्थापनादिवसात् (२ अगस्त १९८६ दिनाङ्कात्) भारतीयां संस्कृतिमभिरक्षयन् संस्कृत प्रचार- प्रसारादिषु क्षेत्रेषु महदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़ परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रे सरो वर्तते ।



अस्मिन् परिसरे १९९५ तमस्य ख्रिास्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभाग-स्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर १९९५ तः मई २०११ यावत् आसीत्। एतेषामागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवश्छात्राः ज्योतिषाचार्योपाधिं विद्यावारिध्युपाधिञ्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार प्रसारादिकर्मणि शास्त्राध्यापनादिकर्मणि च संलग्नाः विद्यन्ते । इमे श्रीकामेश्वरसिंहदरभङ्गाविश्वविद्यालयस्य कुलपतिपदे दिनांक 29 अप्रैल 2017 तः 30 मई 2020 शनिवासरं यावत् सेवां विधाय अद्यत्वे केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरस्य निदेशकपदस्य शोभामभिवर्धयन्ति। एतेषां निदेशकत्वे लखनऊ-परिसरस्य शोभा अनुदिनं शुक्लपक्षस्य चन्द्र इव वर्धमाना विद्यते।

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन-अध्यापन-निमित्तमाधुनिकयन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयन्त्रम् (२०१६-१७)सत्रे ज्योतिषविभागेन सम्प्राप्तम्। अनेन यन्त्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भवन्ति।

**सत्रेऽस्मिन् विभागीयाचार्याणां नामानि –**

अस्मिन् सत्रे लखनऊपरिसरे ज्योतिषविभागे सप्त अध्यापकाः सन्ति। तेषां सौजन्येन ज्योतिष-विभागस्य श्रीः अनुदिनं वर्द्धमाना विद्यते। अतस्तेषामाचार्याणां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः यथास्थलं लिख्यते। तद्यथा-

| नाम | पदम् | | परिसरेऽस्मिन् कार्यभारग्रहणतिथिः- |
|---|---|---|---|
| १. **प्रो. सर्वनारायणझाः** | **वरिष्ठाचार्यः** परिसर-निदेशकश्च | | २८ दिस. २०२० तः |
| २. **प्रो. मदनमोहनपाठकः** | **वरिष्ठाचार्यः** | | १० नव २०२३ तः |
| **३. प्रो. श्यामदेवमिश्रः** | आचार्यः | | |
| ४. **डॉ. हरिनारायणधरद्विवेदी** | आचार्यः | | २० अप्रैल २०२२ |
| ५. **डॉ. उमेशकुमारपाण्डेयः** | सहायकाचार्यः | (संविदा) | |
| ६. **डॉ.** (श्रीमती) **चन्द्रश्रीपाण्डेयः** | सहायकाचार्या | ,, | ०१ अगस्त २०१२ तः |
| ७. **डॉ. अनिरुद्धनारायणशुक्लः** | सहायकाचार्यः | ,, | १५ मार्च २०२२ तः |
| ८. **श्रीधवलशर्मा** | सहायकाचार्यः | (अतिथिसंकायः) | ६ अक्तुबर २०२५ तः |

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियते। यस्य प्रमाणस्वरूपं अत्रत्याश्छात्राः समग्रेऽपि भारते फलित-सिद्धान्तविभागद्वयोरपि परीक्षायां सर्वाधिकानङ्कानवाप्नुवन्ति।

अत्र परिसरे छात्राणां विकासाय बहुविधाः कार्यक्रमाः सञ्चाल्यन्ते। येन कार्यक्रमेण परिसरीयाः छात्राः एव नहि अपितु बहिस्थाः जना अपि लाभान्विताः भवन्ति। तेषां कार्यक्रमाणां विशदवर्णनं अग्रे विधाष्यते।

अत्र परिसरे ज्योतिषविभागीयछात्राणां नामानि उपस्थाप्यन्ते-

**प्राक्शास्त्रीद्वितीयवर्षस्य छात्राः**

१. अक्षयमिश्रः

२. अमितकुमारशर्मा

३. अंशिकामिश्रा

४. हेमन्तपाण्डेयः

५. नैतिकमिश्रः

६. प्रखरमिश्रः

७. उत्कर्षद्विवेदी

**शास्त्रीप्रथमवर्षे (फलितज्योतिषे)**

१. अभिषेक देवकोटा

२. अङ्कितमिश्रः

३. आकाङ्क्षा

४. अनुरागशुक्लः

५. कुलदीपदीक्षित

६. निश्चलः

७. प्रबलमिश्रः

८. लालुकुमारझा

९. शुभम् पालिवाल

१०. संगम त्रिगुण

११. सुमितकुमार

**शास्त्रीप्रथमवर्षे (सिद्धान्तज्योतिषे)**

१. रोलीमिश्रा

२. सर्वेशदीक्षित

शास्त्रीद्वितीयवर्षे **(सिद्धन्तज्योतिषे)**

१. अमनकुमारः

२. अर्जुनशुक्ला

३. ईशानसोनी

४. आनन्दीअग्रवाल

**शास्त्रीद्वितीयवर्षे (फलितज्योतिषे)**

१. अंशुकुमारचौबे

२. राजेशकुमारपाण्डेयः
३. ज्ञानतोषकुमार
४. रुद्रभिषेकः
५. पवनकुमारचौबे
६. शुभांशुपाण्डेयः
७. शिवम् तिवारी
८. अभिषेकशुक्लः
९. आकाशकुमारशुक्लः

**शास्त्रीतृतीयवर्षस्य छात्राः (फलितज्योतिषे)-**

१. अनुरागदीपद्विवेदी
२. हिमांशुकुमारः
३. सत्यममिश्रः
४. सुमितकुमारपाण्डेयः
५. सूरजअवस्थी
६. सूर्यप्रकाशमिश्रः

**शास्त्रीतृतीयवर्षस्य छात्रः (सिद्धान्तज्योतिषे)-**

१. सुरेशकुमारझाः

**आचार्यप्रथमवर्षस्य छात्राः (फलितज्योतिषे)-**

१. अनामिकामिश्रा
२. अंशिकात्रिपाठी

**आचार्यप्रथमवर्षस्य छात्राः (सिद्धान्तज्योतिषे)-**

१. अभिषेकगुप्ता
२. शिखातिवारी

**आचार्यद्वितीयवर्षस्य छात्राः (फलितज्योतिषे)-**

१. सुमतितिवरी
२. शैलकुमारीदुबे

**आचार्यद्वितीयवर्षस्य छात्राः (सिद्धान्तज्योतिषे)-**

१. निकुकुमारः
२. धवलशर्मा
३. अभिषेकअवस्थी

**ज्योतिष डिप्लोमा स्नातक (यू जी.)**

१. अभिषेकअवस्थी

२. अंकित मिश्रा

३. मनीष भार्गव

४. नवीन खंकरियाल

५. राजीव रायजादा

६. संतोष कुमार साहु

**ज्योतिष डिप्लोमा स्नातकोत्तर (पी. जी.)**

१. आदर्शतिवारी

२. अविनाशप्रहराज

३. आनन्दतिवारी

४. अनिलकुमारसिन्हा

५. अङ्कुरभारत

६. धीरेन्द्रशुक्ला

७. कलमेशकुमारबर्नवाल

८. नवीनकुमारशर्मा

९. निशान्तशुक्ला

१०. राम आशिष तिवारी

११. रवि प्रकाश मिश्रा

१२. सत्यप्रकाशशुक्ला

१३. सुधाकरपराशरी

**भास्कराचार्यपरिषद्-**

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति । अनेनापि छात्राः लाभान्विताः भवन्ति।

।। इति शम्

## भास्करोदयपत्रिकायाः सप्तम- अङ्कस्य लोकार्पणम् :-



सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकःडॉ.मदनमोहनपाठकश्च

**दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः**

---

## भास्करोदयपत्रिकायाः त्रयोदश- अङ्कस्य लोकार्पणम् :-



**भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च**

दिनाङ्कः - २२ नवम्बर २०१६ शनिवासरः, लखनऊ

---

## भास्करोदयपत्रिकायाः चतुर्दश- अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः चतुर्दश- अंकस्यं लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रभारिप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. ब्रजेशपाठकमहोदयाः, परिसरस्य वरिष्टाचाष्टाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।

दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ

गोवंशस्य परिरक्षणं कुरु। राष्ट्रस्य परिवर्धनं कुरु।।



भास्करोदयनामिकायाः ज्योतिष-शोधपत्रिकायाः विगताङ्काः-



ISSN No.:2278-0815